Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

| पृष्ठे | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १८ | ५ | अव: । | अय: । |
| १९ | १८ | स्त्राधनं | साधनं |
| २० | २३ | लिङ्गादि | लिङ्गादि |
| २१ | ११ | वीथ: | वीध: |
| २२ | १ | आर्ङ्घौ | आर्थौ |
| २२ | ६ | अतृत्यम् | अत्यम् |
| २३ | २४ | प्रर्तेव | प्रत्येव |
| २४ | १६ | तन्मात्रेण | तन्मात्रेण |
| २४ | २२ | तीतैंवं | तौत्येवं |
| २५ | ८ | पिव्रत | विव्रत |
| २५ | २० | तया | तथा |
| २६ | २ | तत्र | तत्त |
| २६ | ८ | निश्वा | निश्च |
| २८ | ८ | सकलो | सफलो |
| ३० | २ | प्राप्त | प्राप्त |
| ३१ | ४ | विधिलेतो | विधिल्वेनी |
| ५२ | ९ | प्रत्ये | प्रेत्य |
| ५७ | ७ | पठनीम् । | पठनीयम् । |
| ५७ | १७ | ध्यंश्रं | ध्यंश |
| ५७ | २३ | विभव्य | विभज्य |
| ५८ | १४ | यातया | यातये |
| ५९ | ११ | उपकार | उपकारक |
| ५९ | १८ | सौर्ष्यं | सौर्ष्यं |
| ६० | २१ | भाव: | भावा: |
| ६१ | ११ | आस्यति | आम्यति |

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# अर्थसंग्रहः ।

श्रीगणेशाय नमः ।

**वासुदेवं रमाकान्तं नत्वा लौगाक्षिभास्करः ।**
**कुरुते जैमिनिनये प्रवेशायार्थसंग्रहम् ॥**

---

## श्रीगणेशाय नमः ।

चित्याद्यैः स्वकलेवरैः परिणतैर्द्रव्याणि भूत्वा स्वयं
तत्त्यागं यजमानविग्रहधरः कुर्व्वन् विलासादिव ।
तद्वोढाहवनीयमूर्त्तिकतया यो देवतारूपत-
स्तान्येव स्वदते नमो भगवते तस्मै विचित्रात्मने ।
कमलाकेशवौ नाम्ना पितरौ प्रणमाम्यहम् ।
यद्भक्तिलेशसम्पर्कादन्तरायोऽस्तमृच्छति ।
यस्याध्यापनमहिमा सञ्चारयति विबुधेतरस्य धियम् ।
सोऽखिलशास्त्रविचाराच्छान्तभ्रान्तिर्गुरुर्जयति ।
नत्वा वाग्रूपिणीमर्थसंग्रहप्रतिपादिका ।
नामेयं क्रियते टीका श्रीकृष्णनाथशर्म्मणा ।
याचे साञ्जलिबन्धोऽहं यो यो दोषोऽत्र वर्त्तते ।
तत्संस्कारश्रमभिया सर्व्वं नोपेक्ष्यतां बुधैः ।

प्रारिप्सितपरिसमाप्तिकामोऽन्तरायसन्निशान्त्यै भगवत्प्रणतिरूपं मङ्गलमाचरन् शिष्यान् शिक्षयितुमनाः श्लोकेन प्रकाशयति वासुदेवमिति । लौगाक्षि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ परमकारुणिको भगवान् जैमिनि धर्म्मविवेकाय द्वादशलक्षणीं प्रणिनाय । तत्रादौ धर्म्मजिज्ञासां सूत्रयामास अथातो धर्म्मजिज्ञासेति । अत्राथशब्दो वेदाध्ययनान-

---

भास्करो रमाया लक्ष्म्याः कान्तं पतिं वासुदेवं हरिं नत्वा जैमिनिनये जैमिनिमहर्षिकृतकर्म्ममीमांसापदाभिधेयकर्म्मकाण्डीयविधिनिषेधप्रतिपाद्यधर्म्माधर्म्मविचारे प्रवेशाय बालानां मनःसन्धानाय अर्थानां तदुपयोगिकतिपयपदार्थानां नानास्थानस्थानां संग्रहमेकत्र निरूपणं कुरुते । तद्दर्शनाध्ययनोपयोगिकतिपयपदार्थानां प्रागपरिज्ञाने तत्र मनोनिवेशसौकर्य्यं न स्यादिति तदर्थोऽयमारम्भ इति भावः । निरूपणं लक्षणादिप्रकारेण ज्ञानानुकूलवचनम् । यथान्यः परोपकारपरायणो निस्वानां दुर्गमदेशविशेषप्रवेशाय वसुभिर्धनैर्दीव्यतीति वसुदेवस्तस्यापत्यं महाधनकुलोद्भूतं लक्ष्मीप्रियं विद्यमानधनसङ्कोचञ्च पुरुषविशेषं याचनया स्वस्यापकर्षं बोधयित्वा अर्थसंग्रहं धनसंग्रहं कुरुते तथाऽयमपीत्यभिधामूलव्यञ्जनया ध्वनितम् । लौगाक्षीति वंशशंसकम् । भास्कर इति प्रसिद्धं नाम । भास्करान्तरव्यावृत्तये वंशोल्लेखः । अत्राभिधेया जैमिनीयधर्म्मविचारोपयोगिनः पदार्थाः । प्रयोजनमधीतवेदानां धर्म्मविचारप्रवेशः । स च धर्म्माधर्म्मनिश्चयद्वारा इष्टोत्पादनानिष्टपरिहारजनकतया गौणः । सम्बन्धश्च ग्रन्थस्य पदार्थैः सह ज्ञाप्यज्ञापकभावः । धर्म्मविचारप्रवेशेन सह जन्यजनकभावः । एते चाभिधेयप्रयोजनसम्बन्धाः ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन इत्यनुशासनात् प्रदर्शिताः । ननु जैमिनिराचार्य्यो धर्म्मविचाराय कतमं ग्रन्थं प्रणीतवान् यदीयधर्म्मविचारप्रवेशायार्थसंग्रहः क्रियते इत्यपेक्षायां तत्प्रतिपादनमुखेन ग्रन्थमारभते अथेति । अथशब्दो ग्रन्थारम्भद्योतकः । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेति कोषात् । परमकारुणिकः संशयातिशयविषयेभ्यो दुर्गमकर्म्मकाण्डवेदवाक्येभ्यो धर्म्माधर्म्मविचयनमुत्तरकालीनानामतीव कष्टतरं सम्भाव्य तत्प्रहाणेच्छातिशययुक्तः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वेदाध्ययनेति। अत्र वचनशब्दोवाचकार्थः। यद्यपि अथ शब्दस्य पूर्ब्बवृत्तानन्तर्य्यवाचिता सर्व्वेषामवगम्यते तथाप्यत्र कस्यचिदपि प्रागवृत्तस्यानुपस्थितेर्यस्मिन् वृत्ते सति धर्म्मजिज्ञासा सम्भवति तदानन्तर्य्यस्यैव कल्पनौचित्यात् वेदाध्ययनानन्तर्य्यमुक्तम्। वेदैकगम्यस्य धर्म्मस्य वेदाध्ययनानन्तरमेव जिज्ञासासम्भवात्। दृष्टार्थत्वमिति, अर्थज्ञानरूपदृष्टप्रयोजनकत्वमित्यर्थः। ब्रूते हेतुमितिशेषः। वेदाध्ययनस्य दृष्टार्थत्वं हेतुं वक्तीत्यर्थः। तथाच यतो अनवगतवेदार्थो धर्म्मं विचारयितुं न शक्नुयादतो वेदाध्ययनानन्तरं धर्म्मजिज्ञासा कर्त्तव्येति समुदायार्थः।

ननुस्वाध्यायोऽध्येतव्य इति श्रुतिविहितवेदाध्ययनस्यार्थज्ञानरूपदृष्टार्थत्वे मानाभावादक्षरग्रहणरूपतैव वाच्या तत् कुतोवेदाध्ययनस्य दृष्टार्थत्वं धर्म्म जिज्ञासायां हेतुरुच्यत इत्यत आह स्वाध्याय इति। स्वकुलपरम्परया अध्ययनविषयः शाखाविशेषः स्वाध्यायः। यो यत्शाखाविशिष्टस्तेन स एव शाखाविशेषोऽध्येतव्य इत्यर्थः।

पारम्पर्य्यागतो येषां वेदः सपरिवृंहणः।
तच्छाखं कर्म्म कुर्व्वीत तच्छाखाध्ययनन्तथेति।
स्वीया शाखोज्झिता येन ब्रह्म तेनोज्झितं परम्।
ब्रह्महैव स विज्ञेयः सद्भिर्नित्यं विगर्हित इति

वशिष्ठस्मृतेः। ननु स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्व्वेदं सामवेदमाथर्व्वणमिति छान्दोग्ये नारदस्य चतुर्व्वेदाध्ययनाभिधानम् अधीत्य चतुरोवेदान् साङ्गोपाङ्गपदक्रमानिति वृहस्पतिवचनञ्च विरुध्येतेतिचेन्न। तच्छाखाध्ययनन्तथेति वचनस्य प्राथमिकवेदाध्ययनपरत्वात्। तथाचोक्तं वशिष्ठेन।

यः स्वशाखां परित्यज्य पारक्यमधिगच्छति।
स शूद्रवद्बहिष्कार्य्यः सर्व्वकर्म्मसु साधुभिरिति।
अधीत्य शाखामात्मीयां परशाखां ततः पठेदिति च॥

एवञ्च वेदाध्ययनारम्भप्रतिपादनवेलायां श्रुतौ स्वाध्यायपदोपादानं युक्तमेव। व्यवस्थापनात् भाष्यतन्त्रवार्त्तिकशास्त्रदीपिकाकारादिभिः सिद्धान्तनात्। तथाहि

For Private And Personal

स्वाध्यायोऽध्येतव्य इत्युक्तमध्ययनं किं स्वर्गाद्यदृष्टफलोद्देशेन गुरोः सकाशादक्षर-ग्रहणरूपं किम्वा अर्थज्ञानरूपदृष्टफलकत्वेन व्याख्याश्रवणरूपमिति संशये पूर्व्वपक्षः।

विनापि विधिना दृष्टलाभान्नहि तदर्थता।
कल्प्यस्तु विधिसामर्थ्यात् स्वर्गो विश्वजिदादिवदिति॥

अस्यार्थः। विमतं वेदाध्ययनमर्थज्ञानहेतुरध्ययनत्वात् भारताध्ययनवदित्य-नुमानेनैवार्थज्ञानरूपदृष्टप्रयोजनस्य विधिं विनापि लाभादध्ययनस्य तदर्थता अर्थज्ञानरूपदृष्टार्थता न। तस्माददृष्टार्थमेवाक्षरग्रहणरूपमध्ययनं विहितम्। ननु पारलौकिकभाव्याश्रवणात् कथमदृष्टार्थत्वमध्ययनस्येत्यत्राह कल्प्यस्त्वित्यादि। विधिसामर्थ्यात् विधेरिष्टसाधनताप्रकाशनसामर्थ्यात् स्वर्ग एव भाव्यः कल्प्यः। तत्र दृष्टान्तमाह विश्वजिदादिवदिति। यथा विश्वजिता यजेतेत्यादौ भाव्यविशेषा-श्रवणेपि विधिप्रत्ययसामर्थ्येन इष्टविशेषस्य भाव्यताया आवश्यकतया सर्व्वाभिलषितः स्वर्ग एव भाव्यः कल्प्य स्तद्वदत्रापि। तथाच यथा स्वर्गकामो विश्वजिता यजेतेति स्वर्गस्य नियोज्यविशेषणत्वं तथा स्वर्गकामेण स्वाध्यायोऽध्येतव्य इत्यत्रापीति।

अत्र सिद्धान्तः।

लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना।
विधेश्च नियमार्थत्वान्नानर्थक्यं भविष्यति॥

अर्थज्ञानरूपे दृष्टे फले लभ्यमाने विश्वजिदादिवददृष्टफलस्य कल्पना नोचिता। नन्वधीतव्याकरणाद्यङ्गसङ्गस्य पुरुषस्यार्थज्ञानावश्यम्भावात् स्वतएव तदर्थप्रवृत्ते र्विधेरानर्थक्यं स्यादित्यत आह विधेश्चेति। प्राप्तत्वात् विधित्वासम्भवेपि नियमार्थत्वेनाध्ययनविधेरानर्थक्यं न भविष्यतीत्यर्थः। तथाहि दर्शपौर्णमासप्रकरणे व्रीहीनवहन्तीति श्रूयते। अवघातो नाम कण्डनम्। तत्प्रयोजनञ्च वैतुष्यम्। एवञ्च व्रीह्यादीनां पुरोडाशसाधनद्रव्यत्वेनाभिधानात् वितुषीकरणानुकूलक्रियायां स्वतएव याज्ञिकानां प्रवृत्तिसम्भवेपि नखदलनादेरवघातस्य च नैरपेक्षेण तत्फल-जनकतया अवघाते पाक्षिकप्रवृत्तिसम्भवात् अवहन्तीति विधिर्नियमार्थो अवघातः कर्त्तव्य एवेति। तद्वदत्रापि स्वयं पाठस्य गुरुपूर्व्वकाध्ययनस्य च स्वातन्त्र्येणार्थ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तथाच वेदाध्ययनानन्तरं यतो अर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतो हेतो धर्म्मस्य वेदार्थस्य जिज्ञासा कर्त्तव्येति शेषः । जिज्ञासापदस्य विचारे लक्षणा । अतो धर्म्मविचारशास्त्रमिदमारम्भणीयमिति शास्त्रारम्भसूत्रार्थः ।

---

ज्ञानजनकत्वात् पक्षप्राप्तमध्ययनं विधिना नियम्यते स्वाध्यायोऽध्येतव्य एवेति क्वानर्थक्यम् ।

नन्ववघातविधेर्दर्शपौर्णमासप्रकरणीयत्वेन अवघातस्य तच्छेषतया अवघातनिष्पन्नैरेव तण्डुलैरवान्तरापूर्व्वद्वारा दर्शपौर्णमासोपकारी नान्यथेति दर्शपौर्णमासापूर्व्वमेव नियमहेतुः । प्रकृते तु कमपि क्रतुविशेषमनारभ्याम्नातस्याध्ययनविधेः परोपकारार्थकत्वाभावेन वैषम्यम् । यदुच्यते अर्थावधारणद्वारा सर्व्वक्रत्वनुष्ठानोपपत्तिस्तथापि लिखितपाठजन्येनैवाध्ययनेन सर्व्वक्रत्वनुष्ठानसिद्धेरविशेषान्नियमहेतुर्नास्तीति चेन्न । यथा दर्शपौर्णमासजन्यपरमापूर्व्वमवघातनियमजन्यापूर्व्वस्य कल्पकं तथात्रापि गुरुपूर्व्वकाध्ययननिष्पन्नैरेवार्थज्ञानैरवान्तरापूर्व्वद्वारा सर्व्वक्रत्वनुष्ठानोपकार इत्यशेषक्रतुजन्यमपूर्व्वजातं क्रत्वनुष्ठानसाधनाध्ययननियमजन्यावान्तरापूर्व्वस्य कल्पकमित्यवैषम्यात् । तथाच गुरुपूर्व्वकाध्ययनजनितार्थज्ञानमन्तरेण न क्रत्वनुष्ठानसिद्धिरिति नियमफलमिति तात्पर्य्यम् । स्मृतिरपि । एवं दिने दिने व्याख्यां शृणुयान्नियतो नर इति ।

अथात इति सूत्रस्य पर्य्यवसितार्थमाह तथाचेति । वेदाध्ययनस्यार्थावबोधरूपदृष्टार्थत्वे सतीत्यर्थः । वेदाध्ययनेत्यादि । तदध्ययनं वेदाध्ययनं यतो अर्थज्ञानरूपदृष्टार्थकमतो वेदाध्ययनानन्तरं धर्म्मस्य वेदार्थस्य जिज्ञासा कर्त्तव्येत्यन्वयः । शेष इति । अध्याहर्त्तव्यमित्यर्थः । तथाच वेदार्थाधिगमानन्तरं पुरुषाणां या धर्म्मजिज्ञासा आवश्यकी सा मया कर्त्तव्येति प्रथमसूत्रेण प्रतिज्ञायते इति तात्पर्य्यम् । उत्तरकालकर्त्तव्यत्वप्रकारकबोधानुकूलवचनस्यैव प्रतिज्ञारूपत्वात् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथ को धर्म्मः किं तस्य लक्षणमितिचेत्। उच्यते यागादिरेव धर्म्मः। तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म्म इति। प्रयोजनेऽतिव्याप्तिवारणाय प्रयोजनवदिति। भोजनादावतिव्याप्तिवारणाय वेदप्रतिपाद्य इति। अनर्थफलकत्वादनर्थभूते श्येनादावतिव्याप्तिवारणायार्थ इति।

---

ननु धर्म्मजिज्ञासा धर्म्मस्वरूप, तल्लक्षण, तत्प्रमाण, तत्साधन, तत्फलविषयकज्ञानेच्छा सा कथं प्रतिज्ञायते तदिच्छायाः प्रागेवोत्पन्नतया उत्तरकालोत्पादनीयत्वासम्भवादत आह जिज्ञासापदेनेति। विचारे तत्त्वनिर्णयानुकूलव्यापारे। लक्षणेति। धर्म्मज्ञानेच्छाप्रयोज्यत्वेन धर्म्मजिज्ञासापदेन तद्विचारलक्षणेत्यर्थः। लक्षणाफलमाह अत इति। शास्त्रारम्भसूत्रार्थ इत्यनेनान्वितम्। धर्म्मविचारशास्त्रं धर्म्मस्वरूपादिविषयकतत्त्वनिर्णयोपयोगिशास्त्रम्। आरम्भणीयमुपक्रमणीयम्। शास्त्रारम्भसूत्रस्य शास्त्रप्रतिज्ञासूत्रस्य।

जैमिनिमहर्षिणा "चोदनालक्षणोऽर्थो धर्म्म" इति द्वितीयसूत्रेण धर्म्मस्वरूपं तल्लक्षणं तत्प्रमाणञ्च विचारितम्। उत्तरोत्तरग्रन्थेन धर्म्मसाधनानि धर्म्मफलानि च विचारयिष्यन्ते। तत्र चोदनालक्षणोऽर्थो धर्म्म इत्यत्र विनियोगवाचकेन चोदनापदेन प्रवर्त्तकम् निवर्त्तकञ्च वेदवाक्यमुच्यते। लक्ष्यते प्रमीयते अनेनेति लक्षणं प्रमाणम्। चोदनैव लक्षणं प्रमाणमस्यासौ चोदनालक्षणः। तथाभूतो योऽर्थः स धर्म्मः। अर्थ इष्टसाधनम्, कोऽर्थो यो निःश्रेयसायेति भाष्योक्तेः। तथाच यागादिरेव धर्म्मस्वरूपम्। वेदगम्यत्वे सति अर्थत्वमिति धर्म्मलक्षणम्। वेदमात्रस्य तत्प्रमाणत्वञ्च निरूपितम्। अर्थमात्रस्य धर्म्मत्वे घटपटादाविष्टसाधनमात्रेऽतिव्याप्तिरिति सत्यन्तम्। वेदगम्यमात्रस्य धर्म्मत्वे निषेधवाक्यै र्नहिंस्यात् सर्व्वा भूतानीत्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्म्मत्वं स्यादिति तद्व्यावृत्त्यर्थं य एवार्थरूपेण प्रवर्त्तकवाक्यैर्लक्ष्यते तस्यैव धर्म्मत्वं प्रतिपादयितुमर्थ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पदम्। एतेन चोदना लक्षणोऽनर्थो अधर्म्म इति अधर्म्मलक्षणमपि सूचितम्। एवमेव व्याख्यातं भाष्यशास्त्रदीपिकान्यायमालाकृद्भिः। एतत् सूत्रार्थमूलकधर्म्मस्वरूपलक्षणप्रमाणानि प्रतिपादयितुं पृच्छति अथ को धर्म्म इत्यादि। अथ शब्दोऽत्र प्रश्नद्योतकः। उत्तरयति उच्यत इति। तत्रादौ धर्म्मस्वरूपमाह यागादिरेवेति। तस्यैव वेदवाक्येन इष्टसाधनतया प्रतिपादितत्वादितिभावः, एवकारेण वैशेषिकतन्त्रोक्तं यागादिजन्यमात्मनिष्ठगुणविशेषरूपं वेदान्ताभिमतं तथाभूतसन्तःकरणवृत्तिविशेषरूपञ्चादृष्टं व्यावर्त्त्यते।

वेदप्रतिपाद्य इति। वेदवाक्यजन्यबोधविषय इत्यर्थः। एतेन धर्म्मे वेदा एव प्रमाणमिति दर्शितम्। प्रयोजनवदर्थ इति। प्रयोजनमिष्टं ज्योतिष्टोमादेः स्वर्गादि। तद्वान् तन्निष्ठजन्यतानिरूपितजनकतासम्बन्धेन तद्विशिष्टो यो अर्थः स धर्म्म इत्यर्थः। तथाच प्रयोजनवानर्थ एव धर्म्मः सोऽर्थश्चेद्वेदगम्यः स्यादिति फलितम्। लक्षणघटकपदव्यावर्त्त्यं प्रकाशयति प्रयोजन इति। स्वर्गादिफले इत्यर्थः। अतिव्याप्तीति। वेदप्रतिपाद्योऽर्थ इत्युक्ते स्वर्गादिफलेऽतिव्याप्तिः स्यात्। तस्यापि वेदबोध्यत्वादर्थत्वाच्चेतिभावः। प्रयोजनवदितीति। अर्थस्य प्रयोजनवत्त्वविशेषणात् स्वर्गादौ नातिव्याप्तिः। स्वर्गादेः प्रयोजनान्तराजनकतया प्रयोजनवदर्थत्वाभावात्। ननु सुखात्मकस्वर्गस्य प्रयोजनवत्त्वाभावेन तत्रातिव्याप्तिवारणेपि पुत्रकामः पुत्रेष्टिं कुर्य्यादित्यादिश्रुतिबोधितपुत्रादिफलेऽतिव्याप्तिर्दुर्व्वारा तस्य वेदप्रतिपाद्यत्वात् पुत्रादेरैहिकामुष्मिकविविधेष्टसाधनतया प्रयोजनवदर्थत्वाच्चेतिचेन्न यतो वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म्म इत्युक्ते प्रयोजनवदर्थत्वेन वेदजन्यबोधविषयः प्रयोजनवदर्थो धर्म्म इत्येव प्रतीयते न तु येन केनापि प्रकारेण वेदजन्यबोधविषयः प्रयोजनवदर्थो धर्म्म इति प्रतीयते। तथात्वे दम्पती क्षौमे वसानावग्निमादधीयातामित्यादि श्रुतेः क्षौमस्यापि धर्म्मत्वापत्तेः। तस्य वेदजन्यबोधविषयत्वात् इष्टसाधनीभूतार्थत्वाच्च। एवञ्च पुत्रादेः प्रयोजनवदर्थत्वेपि पुत्रकामः पुत्रेष्टिं कुर्य्यादित्यादि वेदवाक्यैस्तद्रूपेण बोधितत्वाभावान्नातिव्याप्तिः।

वस्तुतस्तु प्रयोजनवदित्यनर्थकं पुनरुक्तञ्च कोऽर्थो यो निःश्रेयसायेति भाष्योक्तेरर्थशब्दस्यैव इष्टसाधनतापरतया तेनैव स्वर्गफले पुत्रादिफले चातिव्याप्तिवारणात्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तेषां निःश्रेयससाधनत्वेन वेदप्रतिपाद्यत्वाभावात्। यदुच्यते अर्थपदं नेष्टसाधनपरं किन्तु वस्तुपरं प्रयोजनवत्पदञ्चेष्टसाधनपरं तेन इष्टसाधनपदार्थ इति लभ्यते। अत इष्टसाधनपरार्थशब्दस्य प्रयोजनवदर्थशब्दस्य च तुल्यार्थतेति। तर्हि अर्थपदानर्थक्यम्। अर्थपदं लक्षणाघटकमिति चेत् तदा तत्पदेनानर्थश्येनादिव्यावर्त्तनानुपपत्तिरिति विभाववीयम्। भोजनादाविति। आदिपदात् घटादिग्रहणम्। वेदप्रतिपाद्य इतीति। भोजनादेरिष्टसाधनत्वेपि तथात्वेन वेदबोध्यत्वं नास्तीतिभावः। अर्थपदव्यावर्त्यमाह अनर्थेति। अनर्थो अनिष्टं फलं यस्य तथाभूतत्वादित्यर्थः। अनर्थभूते अनिष्टसाधनरूपे। श्येनादाविति। श्येनादयः श्येन, सन्दंश, गवादिनामका आभिचारिकयागविशेषाः। अथैष श्येनेनाभिचरन् यजेत अथैष सन्दंशेनाभिचरन् यजेत अथैष गवाभिचरन् यजेतेति मीमांसाभाष्यप्रथमाध्यायचतुर्थपादधृतश्रुतिविहिताः। तेषाञ्च शत्रुवधः फलम्। तथाच तत्रैव श्रूयते। यथा वै श्येनोनिपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते यमभिचरन्ति श्येनेनेति। एवं सन्दंशेन यथा दुरादानमादत्ते इत्यादि। एवं गावो यथा गोपायन्ति इत्यादि। दुरादानं दुःखेनादातव्यम् तप्तलौहम्। एवञ्च श्येनादिभिः शत्रुवधः शत्रुवधाच्च नरकमिति श्येनादिफलस्य शत्रुवधस्य नरकजनकत्वादनिष्टफलकत्वेन श्येनादयोप्यनर्था एव। अतएव अभिचारो मूलकर्म्म चैत्यादिवाक्ये मन्वादयस्तेषामुपपातकत्वं स्मरन्ति। अतस्तेषां निःश्रेयससाधनत्वरूपार्थत्वाभावान्नातिव्याप्तिरितिभावः।

नन्वास्तां शत्रुवधस्य नरकजनकत्वं यस्य शत्रुवधे बलवतीच्छा जायते तस्य तद्वधरूपेष्टसाधनस्य श्येनादेरर्थपदवाच्यत्वमवश्यमभ्युपेतव्यम्। तत् कथं तत्र लक्षणातिव्याप्तिरर्थपदेन परिह्रियते इति चेन्न बलवदनिष्टाननुबन्धीष्टसाधनस्यैवार्थपदार्थतया तेषां बलवदनिष्टाननुबन्धीष्टसाधनत्वाभावात्। अतएव भाष्यकारैरपि कोऽर्थो यो निःश्रेयसायेत्यत्र निःश्रेयसपदं प्रयुक्तम्। अनिष्टाननुबन्धिश्रेयोहि निःश्रेयसम्। ननु यद्यनर्थाः श्येनादयः, कथं तर्हि कर्त्तव्यतयोपदिश्यन्त इति चेत् अत्र भाष्यकाराः। नैव श्येनादयः कर्त्तव्या विज्ञायन्ते। यो हि हिंसितुमिच्छेत् तस्यायमभ्युपायः। इति हि तेषामुपदेशः श्येनेनाभिचरन् यजेतेति।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अयमत्र भाष्यकाराशयः। श्येनादयः शत्रुवधाभ्युपायत्वेन निर्द्दिष्टाः। ये मानवा आत्मानं सततं गोपायीतेति श्रुतिमूलाभिः

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥

इत्यादिस्मृतिभिराततायिवधाय तानभ्युपायानवलम्बन्ते तेषां श्येनादयो-ऽर्था एव बलवदनिष्टाननुबन्धीष्टसाधनत्वात्। विधिमन्तरेण तु तानवलम्बमानाना-मनर्था एव ते भवन्ति हिंसात्मकत्वेन नरकरूपबलवदनिष्टानुबन्धित्वादिति।

अत्र अर्थपदस्यानर्थफलकश्येनाद्यतिव्याप्तिवारकत्वाभिधानमुपलक्षणम्। निवर्त्तकवेदवाक्यप्रतिपाद्यहिंसादिनिषिद्धकर्म्ममात्रातिव्याप्तिवारकत्वात्तस्य। अतएव पार्थसारथिमिश्रैः चोदनापदेन प्रवर्त्तकम् निवर्त्तकञ्च वाक्यमुच्यते। ततश्च निषेधवाक्यैर्न हिंस्यादित्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्म्मत्वं स्यात् तद्व्यावृत्त्यर्थं य एवार्थत्वेन प्रवर्त्तकवाक्यैर्लक्ष्यते तस्यैव धर्म्मत्वं वक्तुमर्थग्रहणमित्युक्तम्। भाष्ये च उभयमिह चोदनया लक्ष्यते अर्थो अनर्थश्च। कोऽर्थो यो निःश्रेयसाय ज्योतिष्टोमादिः। कोऽनर्थो यः प्रत्यवायाय श्येनोवज्र इषुरित्यादिः। तत्रानर्थोधर्म्म उक्तोमाभूदित्यर्थग्रहणम्। कथम् पुनरसावनर्थः, हिंसा हि सा। हिंसा च प्रतिषिद्धा इत्यभिहितम्।

नच ज्योतिष्टोमादावग्नीषोमीयं पशुमालभेतेत्यादिश्रुत्युक्तहिंसाया अपि न हिंस्यादितिनिषेधविषयतया अनर्थत्वमस्तु वेदविहितस्यापि श्येनादेरनर्थत्ववदिति वाच्यम्। अङ्गविधेः क्रत्वर्थत्वानङ्गीकारेपि ज्योतिष्टोमेन यजेतेत्यादिविधिभि-र्हिंसाद्यङ्गसहितज्योतिष्टोमादेर्बलवदनिष्टाननुबन्धीष्टसाधनतायां प्रतिपादितायां तदङ्गहिंसायामपि तत्प्रतिपत्तौ न हिंस्यादिति सामान्यनिषेधस्य विरोधेन तत्राप्रवृत्त्या रागप्राप्तहिंसामात्रविषयकत्वावश्यकत्वात्। नहि हिंसां वर्ज्जयित्वा ज्योतिष्टोमादयः कथमप्यनुष्ठातुम् शक्यन्ते। श्येनादौ तु कामम् विधिप्रवृत्तिरस्तु। हिंसात्मके तत्फलांशे विधिस्पर्शाभावेन निषेधप्रवृत्तौ बाधकविरहात् निषिद्ध-फलकत्वेनानर्थत्वमुचितमेव। नापि वाच्यं श्येनस्य विधेयत्वे तत्फलस्यापि विधेयत्वमिति। अनाततायिशत्रुवधरूपफलस्य रागाधीनया विधेयत्वासम्भवात्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नच चोदनालक्षणोऽर्थो धर्म्म इति सौत्रलक्षणविरोधः, चोदनापदस्य विधिरूपवेदैकदेशपरत्वादिति वाच्यम् ।

तत्रापि चोदनाशब्दस्य वेदमात्रपरत्वात् । सर्व्वस्य वेदस्य धर्म्मतात्पर्य्यकत्वेन धर्म्मप्रतिपादकत्वात् ।

---

आततायिवधस्य तु विधेयतया निषेधविषयत्वाभावेन तज्जनकश्येनादेरर्थत्वमिष्टमेवेत्युक्तम् प्राक् ।

सौत्रधर्म्मलक्षणस्य महर्षिकृतधर्म्मलक्षणेन सह विरोधाभासं परिहरति न चेति । विरोधे हेतुमाह चोदनापदस्येति । सूत्रस्थस्येति शेषः । विधिरूपेति । अत्रायमाशयः । मन्त्रब्राह्मणभेदेन वेदस्य द्विधा विभागस्तत्र मन्त्रा अभियुक्तसमाख्यानप्रसिद्धाः । ब्राह्मणं तदितरवेदभागः । तथाच सूत्रम्, शेषे ब्राह्मणशब्द इति । वृत्तिकारैस्तु शिष्यहितार्थं ब्राह्मणस्य कतिचित् विभागाः संगृहीताः । यथा ;—

हेतुर्निर्व्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारणकल्पना ।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु । इति ।

भाष्यकारमते तु एतदपि प्रायिकम् इतोपि विभागान्तरमस्ति । तत्र प्रवृत्तिनिवृत्त्यन्यतरफलकम् स्वार्थपालननियोगपरं लिङादिपदघटितवाक्यं विधिः । स एव चोदनापरनामा । स्वाध्यायोऽध्येतव्यः न हिंस्यात् सर्व्वाभूतानीत्यादिरूपः । विहितस्य कर्म्मण उपादेयत्वबोधकम् वाक्यं प्रशंसा । सैव स्तुत्यर्थवादनाम्नी वायुर्वै क्षेपिष्ठा देवतेत्येवमादिः । प्रतिषिद्धकर्म्मणो हेयत्वबुद्धिदार्ढ्यजनकम् वाक्यम् निन्दा । निन्दार्थवाद इत्यनर्थान्तरम् । सोऽरोदीदित्येवमादिः । अन्येषामपि स्वरूपं भाष्ये द्रष्टव्यम् ।

तत्र विधिरूपो यो वेदैकदेशश्चोदनापदस्य तत्परत्वावश्यकतया सूत्रकारमते तत्प्रतिपाद्यस्यैव धर्म्मत्वं नतु तदितरवेदप्रतिपाद्यस्य । भवन्मते तु विधीतरांश-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**स च यागादिर्यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य पुरुषं प्रतिविधीयते ।**

---

प्रतिपाद्यस्यापि धर्म्मत्वमितिविरोधः। अविरोधे हेतुमाह तत्रापीति। सौत्रलक्षणेपीत्यर्थः। वेदमात्रपरत्वात् वेदमात्रोपस्थापकत्वात्। ननु वेदैकदेशवाचिनश्चोदनापदस्य कथम् निखिलवेदपरत्वमित्यत आह सर्व्वस्येति। कर्म्मकाण्डीयस्येतिशेषः। तेन अविनाशी वा अरे आत्मा, सर्व्वं खल्विदं ब्रह्मेत्याद्युपनिषदां धर्म्मप्रतिपादकत्वाभावेपि न क्षतिः। तासां ब्रह्मप्रतिपादकत्वेन धर्म्मप्रतिपादकत्वाभावस्य भगवच्छङ्कराचार्य्यैः साधितत्वात्। धर्म्मतात्पर्य्यकत्वेन धर्म्माधर्म्मप्रतीतिजननयोग्यत्वेन। धर्म्मप्रतिपादकत्वात् साक्षात्परम्परौदासीन्येन धर्म्माधर्म्मबोधकत्वात्। तथाच क्रतुविधीनां साक्षादेव धर्म्माधर्म्मप्रतिपादकत्वम्। मन्त्रार्थवादादीनान्तु न साक्षात् तत्प्रतिपत्तिजनकता। किन्तु विधिकल्पकतया क्रतुविध्युपकारकतयाचेति परम्परयेति सर्व्वेषामेव वेदानां धर्म्मप्रतिपादकतया धर्म्मस्य वेदप्रतिपाद्यत्वोक्तिरविरुद्धा। सूत्रकृतातु प्राधान्याच्चोदनेत्युक्तमितिभावः।

यागादिरेव धर्म्म इत्यनेन धर्म्मस्वरूपतयाभिहिते यागादौ लक्षणं सङ्गमयति स चेति। धर्म्मस्वरूपतया प्रागुक्त इत्यर्थः। स्वर्गमुद्दिश्य स्वर्गस्य फलत्वमभिप्रेत्य। पुरुषं प्रति तदर्थिपुरुषसम्बन्धे। विधीयते इष्टसाधनत्वेन प्रतिपाद्यते। तथाच यागादेः स्वर्गरूपेष्टसाधनत्वेन वेदप्रतिपाद्यत्वात् धर्म्मत्वमितिभावः। आदिपदात् दध्ना जुहोति शुचिना कर्त्तव्यम् नातिरात्रे षोड़शिनं गृह्णातीत्यादि श्रुतिभि र्ये ये कर्म्मातिरिक्ता द्रव्यगुणाभावादयः क्रतूपकारादिकमुद्दिश्य पुरुषं प्रति विधीयन्ते तेषाम् परिग्रहः।

नन्वाशुविनाशिनो यागादेः कथम् कालान्तरभावि स्वर्गादिफलसाधनत्व सुपपद्यते। वेदवाक्यवशात् यागादेरेव स्वर्गपर्य्यन्तस्थायित्वं विनष्टस्यापि फलजनकत्वं वा नाङ्गीकरणीयम्। आप्तवचनशतेनापि वस्तुनोऽन्यथाकरणाशक्तेः। अतएवोक्तम्—

विनष्टस्यासत स्तावन्न कार्य्यारम्भसम्भवः।
क्षणिकत्वेन सिद्धस्य नावस्थानञ्च युक्तिमदिति॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अत्रोच्यते। यथा चिरविनष्टस्याप्यनुभवस्य संस्कारद्वारा स्मृतिं प्रति हेतुत्वं तथा यागादेरप्यपूर्व्वद्वारैणैव स्वर्गादिसाधनतावधार्य्या। वेदोक्तस्वर्गादिसाधनत्वान्यथानुपपत्त्या श्रुतार्थापत्तिप्रमाणेन कल्प्यमानमपूर्व्वं नाप्रामाणिकं शङ्कनीयम्। तच्च यागादेः शक्तिरूपम्। फलभागिनिष्ठं सत् स्वर्गादिजनकम्। ननु शक्तिमदितरत्र शक्तेरवस्थानानौचित्यात् कथं शक्तिमति यागादौ विनष्टेपि फलभागिनिष्ठा शक्तिरङ्गीकरणीयेति चेन्न। शक्तेः कार्य्यानुमेयतया यत्र कार्य्यमुत्पद्यते तत्रैवानुमेयत्वात्। लोकेपि विलोनेप्यनले तच्छक्तिरुष्णत्वं सलिलगतं सत् सन्तापयतीति दृश्यते। यद्वा दण्डादे र्भ्रमिरिव यागादेरवान्तरव्यापाररूपं तत्। तच्च यागादिजन्यं फलाश्रयसमवेतं स्वर्गादिपर्य्यन्तस्थायि स्वर्गजनकम्।

नच स्वर्गकामो यजेतेत्यादिना यागादेः स्वर्गादिसाधनत्वं बोध्यते। अपूर्व्वस्य तत्साधनत्वकल्पने तद्विरोध इति वाच्यम्। व्यापारानुबन्धेन यागादीनामेव तत्तत्फलपर्य्यन्तस्थायित्वाभ्युपगमेन स्वर्गादिफलसाधनत्वाभिमानात्। व्यापारेण व्यवधानानङ्गीकाराच्च। अतएव यागादे र्नान्यथासिद्धत्वमपि व्यापारेण व्यापारिणो ऽनन्यथासिद्धत्वात्।

तच्चापूर्व्वमाख्यातपदप्रतिपाद्यमेव। तथाहि स्वर्गकामो यजेतेत्याख्यातेन यागेन स्वर्गं भावयेदिति बोधिते यागस्य व्यापारवत्कारणत्वरूपकरणत्वाक्षेपात् तज्जन्यव्यापाररूपापूर्व्वमप्याक्षिप्तम्। अन्यथा करणत्वमेव नोपपद्यते। इत्थम पूर्व्वस्याख्यातपदप्रतिपाद्यत्वं द्वितीयाध्यायप्रथमपादभाष्ये सिद्धान्तितम्। व्यक्तमुक्तम् न्यायमालायाम्। अर्थभावनायाः स्वर्गस्य भाव्यत्वं कर्म्मयोगादवगम्यते। धात्वर्थस्य करणत्वं तृतीयाश्रुत्या। यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत चित्रया यजेत पशुकाम इति। तच्च करणत्वमपूर्व्वकल्पनामन्तरेण न सम्भवतीत्यभिधास्यते। तस्मादाख्यातप्रत्ययात् भावार्थादपूर्व्वं गम्यत इति।

एवञ्चाङ्गविधिषु प्रधानविधिषु चाख्यातप्रत्ययश्रवणात् सर्व्वत्रैवापूर्व्वबोधो ऽङ्गापूर्व्वत्वेन प्रधानापूर्व्वत्वेन च। तत्राङ्गापूर्व्वाणि परमापूर्व्वोपकारं सम्पादयन्ति प्रधानापूर्व्वन्तु फलमुत्पादयतीति विशेषः। अत्रायं प्रकारः। प्रधानपूर्व्वापरकालक्रियमाणान्यङ्गानि इतरनिरपेक्षं स्वीयं स्वीयमपूर्व्वं जनयन्ति। मध्यवर्त्ति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रधानञ्चेतरनिरपेक्षं स्वापूर्व्वमुत्पादयति। ब्राह्मणतर्पणान्तकर्म्मसमाप्तौ तु पूर्व्वापरकालकृताङ्गापूर्व्वाणि युगपदेव प्रधानापूर्व्वस्य फलजननोन्मुखत्वरूपमतिशयमुत्पाद्य विनश्यन्ति। तच्च प्रधानापूर्व्वातिशयाधानमुपकार इति अनुग्रह इति चोच्यते। तस्यैवाङ्गापूर्व्वफलत्वेन तदनन्तरमेवाङ्गापूर्व्वाणां विनाशावश्यकत्वात्। अपूर्व्वाणां फलनिष्पत्त्यनन्तरमेव विनाशस्याभाव्यात्। तथोपकृतं प्रधानापूर्व्वन्तु स्वर्गादिफलोत्पत्तिपर्य्यन्तमक्षीणभावेन विद्यमानं फलोत्पत्त्यनन्तरं तद्भोगात् क्रमशोऽपक्षीयते। भोगावसानेतु नितरां निवर्त्तते।

नन्वङ्गापूर्व्वप्रधानापूर्व्वाणि समस्तान्येव स्वर्गादिफलं जनयन्तु न पुनरङ्गापूर्व्वाणि प्रधानापूर्व्वातिशयं विधाय विनश्यन्त्विति चेन्न अङ्गानां प्रधानोपकारत्वव्याघात्। न चाङ्गापूर्व्वाणां सान्निध्यवशात् फलमुत्पादयत् प्रधानापूर्व्वमङ्गोपकृतं भवतीति वाच्यम्। फलजननासमर्थरूपेणोत्पन्नस्य प्रधानापूर्व्वस्य अङ्गापूर्व्वसान्निध्यमात्रेण फलजननसामर्थ्योदयासम्भवात्। नहि जलविन्द्वादिवदपूर्व्वाणि मिलित्वा वृहत्त्वं फलजननशक्तिमत्त्वञ्चापद्यते। अदृष्टापूर्व्वपदवाच्यत्वेन तस्यालौकिकपदार्थतया तत्र लौकिकदृष्टान्तानुपपत्तेः। एतस्मादेव कारणादेकफलस्यैकापूर्व्वजन्यत्वनियमः। अतएव दर्शादियागस्थले आग्नेयादियागत्रयजन्यमुत्पत्त्यपूर्व्वत्रयमेकमपूर्व्वान्तरं जनयित्वा विनश्यतीति सिद्धान्तः।

तथाहि पौर्णमासयागसमाप्तौ पूर्व्वोक्तन्यायेन स्वस्वाङ्गापूर्व्वानुगृहीतमाग्नेयादियागत्रयजन्यमुत्पत्त्यपूर्व्वत्रयमुत्पद्यते। तच्च महत्तरमेकमपूर्व्वं समुदायापूर्व्वनामकं जनयित्वा विनश्यति। एवममावास्यानिष्पन्नोत्पत्त्यपूर्व्वत्रयमपि एकं समुदायापूर्व्वमुत्पाद्य निवर्त्तते। अनन्तरञ्च पौर्णमास्यमावास्यायागीयसमुदायापूर्व्वद्वयं महत्तरमेकमपूर्व्वं जनयित्वोपरमते। तदेव परमापूर्व्वमुच्यते फलपर्य्यन्तस्थायि फलजनकञ्च। एवमेव द्वितीयाध्यायप्रथमपादे वार्त्तिककाराः। उक्तञ्च तत्रैव

प्रमाणवन्त्यदृष्टानि कल्प्यानि सुवहून्यपि।
अदृष्टशतभागोपि न कल्प्यो ह्यप्रमाणकः॥

एतत् सिद्धान्तानुवर्त्तिन एव शास्त्रदीपिकान्यायमालाकारादयः। स्मार्त्तवर्गैरप्येतत्सिद्धान्तानुसारेणैव प्रेतत्वनाशं प्रति आद्यादिश्राद्धजन्यकलिकापूर्व्वजन्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



परमापूर्व्वस्य कारणत्वमङ्गीक्रियते। न तु समस्तानां कलिकापूर्व्वाणाम्। तत्परमापूर्व्वस्य न प्रेतत्वनाशरूपफलजनने विलम्बित्वं फलस्य कालान्तरभावित्वाभावेन प्रतिबन्धकविरहात्। शुभापूर्व्ववद्दुरितापूर्व्वाणामप्येषेव रीतिः। तथाहि लघुप्रायश्चित्तनाश्ये यत्रोपपातकादौ पततीतिश्रुतिरस्ति तत्राप्यसततत्तत्कर्म्मण एव पातित्यजनकताया अयश्यकल्पनीयतया पूर्व्वपूर्व्वोत्पन्नपापव्यक्तिसहकृतमुत्तरोत्तरं तत्तत् कर्म्म पूर्व्वपूर्व्वपापव्यक्त्यपेक्षया महतीं महतीं पापव्यक्तिमुत्पादयति। अनन्तरञ्च पूर्व्वपूर्व्वा विनश्यति। एवं क्रमेण यदा द्वादशवार्षिकमहाव्रतनाश्यमहापातकसमाना पापव्यक्तिरुत्पद्यते तदैव पातित्यमाधत्ते। पातित्यस्य एकपापव्यक्तिसाध्यत्वात्। अतएव महापातकसंसर्गे शूलपाणिनाप्येषैव रीतिरवलम्बिता। पततीति श्रुतिविरहेतु सहस्रशोपुप्रपपातकव्यक्तयो न जनयितुं शक्नुवन्ति पातित्यम्। एकतमस्यापि तथाविधबलवत्त्वाभावात्। एवमन्यत्राप्यूह्यम्। तदितो विरमतु प्रासङ्गिकविस्तरावतारः।

ननु वैशेषिकतन्त्रे "तस्य गुणा बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्म्माधर्म्म-संस्कार-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-वियोगा इति प्रशस्तपादाचार्य्यैर्धर्म्माधर्म्मयोरात्मवृत्तिगुणविशेषत्वमभिहितम्। अक्षपादतन्त्रे च तथैवाभ्युपगतम्। एवञ्च अप्रतिषिद्धं परमतमनुमतं भवतीति तन्त्रयुक्तौ जैमिनेरप्याचार्य्यस्य तत्रैव तात्पर्य्यावधारणौचित्यात् धर्म्मलक्षणगतार्थपदेन कर्म्मजन्यापूर्व्वमेव व्याख्यायतामविरोधादितिचेत्। अत्रोच्यते। गुरुमतानुयायिभिः प्राभाकरैस्तथैव व्याख्यातम्। भाष्यकारवार्त्तिककारैस्तु यागादेरेव धर्म्मत्वमुक्तम्। तन्मतानुयायित्वात् पार्थसारथिमिश्रमाधवाचार्य्यादिवदेतद्ग्रन्थकृतापि यागादेरेव धर्म्मत्वमङ्गीकृतम्। भाष्यकारैः साधितञ्च यागादेरेव धर्म्मत्वं यथा "यो हि यागादिकमनुतिष्ठति तं धार्म्मिक इति समाचक्षत इति" तथा "न केवलं लोके वेदेपि यज्ञेन यज्ञमजयन्त देवास्तानि धर्म्माणि प्रथमान्यासन्निति यजतिशब्दवाच्यमेव धर्म्मं समामनन्ति" इति च। अतएव धर्म्ममाचरेदित्यादौ धर्म्मस्याचरणक्रियायां कर्म्मतयान्वयः सुघटः।

ननु धर्म्माधर्म्मयोरतीन्द्रियत्वं सर्व्वतन्त्रसिद्धम्। यागादेर्धर्म्मपदवाच्यत्वे तद्व्याघातः स्यात् यागादेरिन्द्रियग्राह्यतया अविवादविषयत्वादितिचेन्न। निःश्रेयससाधनत्वेनैव यागादेर्धर्म्मत्वान्निःश्रेयससाधनतायाश्च तेषां वेदमात्रगम्यतया इन्द्रियागोचरत्वात्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शाभ्यां भावनैवोच्यते। भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः। सा च द्वेधा शाब्दी भावना आर्थी भावनाचेति। तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापार विशेषः शाब्दीभावना। सा च लिङ्शेणोच्यते। लिङ्-श्रवणे अयं मां प्रवर्त्तति मत्प्रवृत्त्यनुकूलव्यापारवानिति नियमेन प्रतीतेः। यद्यस्माच्छब्दान्नियमतः प्रतीयते तत्तस्य वाच्यम्। यथागामानयेत्यस्मिन् वाक्ये गोशब्दस्य गोत्वम्।

---

व्याप्यत्वं विशदयति आख्यातत्वमिति। दशलकाराः लडादयः सर्वे लकाराः। अंशाभ्यां लिङ्त्वाख्यातत्वाभ्याम्। भावनैवेति। उत्पादनैवेत्यर्थः। णिजन्तस्य भवतेरूपत्वात्। उच्यते प्रत्याय्यते। भावनास्वरूपमुपदर्शयितुमाह भावना नामेति। भवितुरित्यादि। भवितुः फलस्य। भवनमुत्पत्तिः। तदनुकूलस्तज्जनको यो भावयितुरुत्पादयितुर्व्यापारविशेषः स एव भावना नामेत्यर्थः।

ननु यद्युभाभ्यामेवांशाभ्यामेकैव भावना प्रतीयेत तर्हि तत्र द्वयोर्हेतुत्वाङ्गीकारो निरर्थक इत्यतो भावनाद्वैविध्यमाह सा च द्वेधेति। तत्प्रकारमाह शाब्दीत्यादि। तत्र तयोर्भावनयोर्मध्ये। शाब्दीं भावनां लक्षयति पुरुषेति। पुरुषस्य यागादिकर्त्तुर्यागादौ या प्रवृत्तिरादरातिस्तदनुकूलस्तज्जनको य उत्पादकयितुर्व्यापारविशेषः सैव शाब्दी भावनेत्यर्थः। ननु तथाविधा शाब्दी भावना किं लिङ्त्वेन रूपेण उताख्यातत्वेन रूपेणोच्यत इत्यत्राह साच लिङ्शेनेति। लिङ्पदात् तथाविधभावनाप्रतीतौ हेतुमाह लिङिति। नियमेनेति। अन्वयव्यतिरेकाभ्यामित्यर्थः। अयमाशयः। विधिनिमन्त्रणेतिसूत्रेण विधौ लिङ् अनुशिष्टा। विधिश्च प्रवर्त्तनाख्यः। प्रवर्त्तनाच प्रवृत्त्यनुकूलोव्यापारः। एवञ्च यं पुरुषं प्रति लिङ्पदं प्रयुज्यते तेन लिङ्पदश्रवणानन्तरमेव माम्प्रतीयं प्रवर्त्तनेत्यवबुध्यत इति लिङ्पदश्रवणसत्त्वे प्रवर्त्तनावबोधस्तदसत्त्वे च इन्द्रोवृत्रमहन्नित्यादिवाक्यश्रवणान्नतदवबोध इत्यन्वयव्यतिरेकाभ्यां लिङ्पदादेव प्रवर्त्तनाख्यभावना प्रतीतिरिति।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स च व्यापारविशेषो लौकिकवाक्ये पुरुषनिष्ठोऽभिप्रायविशेषः । वैदिकवाक्येतु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव ।

---

ननु लिङ्पदात् भावनाप्रतीतावपि तस्या लिङ्वाच्यत्वे किं मानम् । तदवाच्यत्वे सा च लिङ्पदेनोच्यत इत्यसङ्गतमित्यतस्तदुपपादयति यत् यस्मादिति । अयमाशयः । न खलु वर्णमयानां पदानां वागिन्द्रियमस्ति येन अयं गौरयमश्व इत्यादि ब्रूयुः । परन्तु यत्पदश्रुत्या योऽर्थोऽन्येनानुपदिष्टोपि अव्यभिचारेण प्रतीयते तत्प्रत्यायितः सोऽर्थस्तद्वाच्य इति व्यपदिश्यते । यथा गामानयेति वाक्यश्रवणात् प्रयोज्येन गवानयने कृते अनन्तरञ्च गां वधान अश्वमानयेति श्रुत्वा गां वद्ध्वा आनीते अश्वे व्युत्पित्सुना केनाप्यनुपदिष्टेनापि शब्दमहिम्ना अन्वयव्यतिरेकाभ्यां गोपदात् सास्नादिमत्पशुत्वं प्रतीयते इति गोत्वं प्रत्याय्यतया गोपदवाच्यत्वेन व्यवह्रियते । तथाच लिङ्पदश्रवणादयं लिङ्शब्दो मां प्रवर्त्तयतीति पुरुषप्रवृत्त्यनुकूललिङ्निष्ठव्यापारविशेषरूपाया भावनाया नियमेन प्रतीतेः तस्या लिङ्पदवाच्यत्वमवधार्यम् । लिङ्निष्ठोऽसौ भावनाख्यव्यापारः शक्तिरूप एव । एवञ्च लिङि स्वगतायाः पुरुषप्रवृत्त्युत्पादकतारूपाया भावनायाः प्रतिपादकताशक्तिः पुरुषप्रवृत्त्युत्पादकताच शक्तिर्वर्त्तते । सा च शक्तिरेकैवाभिधारूपा नतु नाना । अभिधाहि शब्दस्य मुख्यार्थबोधकताशक्तिरित्युच्यते । तयैवाभिधाख्यया शक्त्या स्वगतां स्वार्थभूताञ्च प्रवृत्त्युत्पादकतां बोधयन्ती लिङ् पुरुषप्रवृत्तिमुत्पादयति । लिङः प्रवृत्त्युत्पादकताबोधनमन्तरेण पुरुषस्य प्रवृत्त्यनुत्पत्तेः । तदुक्तं भट्टपादैः ।

अभिधाभावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्व्वाख्यातेषु गम्यते ।

व्याख्यातञ्चैतत् तन्त्रवार्त्तिके स्वयमेव । "अर्थात्मिकायां भावनायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्म्मो अभिधात्मिका भावना विधिरुच्यत" इति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मेकप्रत्ययगम्यत्वेप्ययोग्यत्वान्न साध्यत्वेनान्वयः । साधनाकाङ्क्षायां लिङादिज्ञानं करणत्वेनान्वेति । तस्य च करणत्वं न भावनोत्पादकत्वेन । तत्पूर्व्वमपि तस्याः शब्दे सत्त्वात् ।

---

रेकशब्दगम्यत्वं तथावापि इयोरेव भावनयोरेकलिङ्पदगम्यत्वमितिभावः । तथाच प्रकृतार्थतया यागादेः सन्निहितत्वेपि भिन्नपदोपस्थितत्वात् एकपदोपस्थितत्वेनार्थभावनायास्ततोपि सन्निहितत्वमितिभावः ।

ननु यजेतेत्यादिलिङा यथा आर्थभावना प्रतिपाद्यते तथा एकत्वादिसङ्ख्या वर्त्तमानादिकालश्च प्रत्याय्यते । एवञ्चार्थभावनावत् सङ्ख्यादीनामप्येकप्रत्ययगम्यत्वेन सन्निहितत्वात् कथं साध्यत्वेनान्वयो नाङ्गीक्रियतामित्यत आह सङ्ख्यादीनामिति । अयोग्यत्वादिति । यजेतेति लिङा कर्तृगतैकत्वसङ्ख्यायाः कालस्य च बोध्यत्वेपि तयोरुत्पाद्यत्वासम्भवादितिभावः । साधनाकाङ्क्षायां केनेति करणाकाङ्क्षायाम् । लिङादिज्ञानं लिङादिश्रवणम् । ननु व्यापारवत्कारणस्यैव करणत्वात् कारणस्य च पूर्व्ववर्त्तितानियमात् लिङादिज्ञानस्य प्रवृत्त्युत्पादकतारूपशाब्दभावनाकारणत्वे अङ्गीकृते तदुत्पादकताप्यायाति किं तदेवेष्टमित्यत आह तस्य चेति । लिङादिज्ञानस्येत्यर्थः । लिङादिज्ञानस्य भावनोत्पादकत्वाङ्गीकारे दोषमाह तत्पूर्व्वमपीति । लिङादिज्ञानात् पूर्व्वमपीत्यर्थः । तस्याः भावनायाः । शब्दे सत्त्वादिति । एतन्मते शब्दस्य नित्यतया शक्तिरूपाया भावनायास्तत्र नित्यविद्यमानत्वादितिभावः । तर्हि कथंकारमस्य कारणत्वमित्यत आह किन्त्विति । भावनाज्ञापकत्वेन प्रवृत्तिभावकताज्ञानजनकत्वेन । लिङादिश्रवणानन्तरमेव लिङ्निष्ठायाः प्रवृत्तिजनकताया ज्ञानावश्यम्भावादितिभावः ।

ननु करणत्वं कारणताविशेष एव नतु ज्ञापकत्वम्, अत तद्रूपत्वे लाक्षणिकत्वापत्तिः । मुख्यकरणस्यैव केनेत्याकाङ्क्षाविषयत्वौचित्येन लाक्षणिकस्याकाङ्क्षाविषयत्वानुपपत्तिश्चेत्यतः कल्पान्तरमाह शब्दभावनेति । लिङादिशब्दनिष्ठाया भावनाया यद्भाव्यमुत्पाद्यं पुरुषप्रवृत्तिरूपं तस्य निर्व्वर्त्तकत्वेन निष्पादकत्वं नेतार्थः । अयमाशयः । फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः । फले प्रधानं व्यापार-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



किन्तु भावनाज्ञापकत्वेन शब्दभावनाभाव्यनिर्व्वर्त्तकत्वेन वा । इतिकर्त्तव्यताकाङ्क्षायामर्थवादज्ञाप्यप्राशस्त्यमितिकर्त्तव्यतात्वे-

---

लिङर्थस्तु विशेषणमित्युक्तेः फलं व्यापारश्च द्वयमेव धात्वर्थः। करणन्तु सर्व्वत्रैव फलं प्रत्येव व्यापारवत्कारणत्वेन। नतु व्यापारं प्रति। यथा खड्गेन च्छिनत्तीत्यत्र उद्यमननिपातनाख्यव्यापाररूपच्छिदाक्रियानिष्पादकत्वेन खड्गस्य न करणत्वं किन्तु द्वैधीभावरूपफलनिष्पादकत्वेन च्छिदाक्रियाकरणत्वव्यवहारः। यथा वा अश्वेन गमयतीत्यत्र गमनानुकूलव्यापाररूपाया गमनप्रेरणाया निष्पादकत्वेन नाश्वस्य करणत्वं किन्तु निजन्तगमधात्वर्थफलभूतगमननिष्पादकत्वेनैव गमनाकरणत्वव्यवहार-स्तथात्रापि लिङादिज्ञानस्य करणत्वं भवनक्रियायामेव न तु भावनायाम्। एवञ्च लिङादिज्ञानकरणकं यत् प्रवृत्तेर्भवनं तदनुकूलव्यापारवान् लिङादिरित्येवं बोधः पर्य्यवस्यतीति ।

अत्रेदं बोध्यम्, लिङादिज्ञानं प्रवृत्त्युत्पत्तौ न करणम्, व्याकरणाद्यनधीतवतः पुरुषस्य सहस्रकृत्वो लिङादिश्रवणेपि अयं शब्दोमाम् प्रवर्त्तयतीति बोधासम्भवात् प्रवृत्तिर्नोत्पद्यते। किन्तु लिङादेः प्रवर्त्तनाशक्तिमत्त्वज्ञानमेव करणम्। सम्बन्ध-बोधः करणमित्युक्तेः। तत्रावान्तरव्यापारस्तु चिकीर्षा तथाच लिङादयः स्वार्थ-ज्ञानद्वारा पुरुषप्रवृत्तिं भावयन्तीत्यत्र लिङाद्यर्थज्ञानकरणिका चिकीर्षाजन्या या पुरुषप्रवृत्तिस्तामुत्पादयन्तीति प्रतिपत्तिरुदेति। तस्मादादौ लिङादिश्रवणम् अनन्तरम् लिङादिपदं प्रवर्त्तनाशक्तमितिज्ञानं तदनन्तरञ्च चिकीर्षा तदुत्तरकाले च यागादिविषयिणी प्रवृत्त्याख्या कृतिरितिपर्य्यायेण लिङादेः प्रवृत्तिजनकता द्रष्टव्येति ।

इतिकर्त्तव्यताकाङ्क्षायां कथमित्युपकारकाकाङ्क्षायाम्। अर्थवादेति। अर्थ-वादेन स्तुत्यर्थवादेन ज्ञाप्यं प्रतिपाद्यं यत् प्राशस्त्यं कर्म्मणो बलवदनिष्टाननुबन्धीष्ट साधनत्वं तदेव इतिकर्त्तव्यतात्वेन उपकारकत्वेनान्वेतीत्यर्थः। एवञ्च यथा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**नान्वेति । प्रयोजनेच्छाजनित क्रियाविषयव्यापार आर्थी भावना ।**

---

लिङादयः प्रवृत्तिजनकास्तथा अर्थवादा अपि प्रवृत्तिजनने उपकारका इत्यर्थवाद-सापेक्षा लिङादयः पुरुषप्रवृत्तिं भावयन्तीत्यवधार्यम् । पुरुषश्च यथा लिङाद्यर्थ-प्रवर्त्तनाज्ज्ञानात् प्रवर्त्तते तथा स्तुत्यर्थवादार्थज्ञानादपीति लिङाद्यर्थज्ञानमिव स्तुत्यर्थवादार्थकर्म्मप्राशस्त्यज्ञानमपि प्रवृत्तिहेतुरित्यर्थवादज्ञाप्यप्राशस्त्यम् प्रवृत्ता वुपकारकमितिभावः ।

ननु निरपेक्षप्रमाणभूतविधिवाक्यस्य पुरुषप्रवृत्त्युत्पादकतायां कथमर्थवाद-सापेक्षताऽङ्गीक्रियत इति चेत्, उच्यते स्वर्गकामो यजेतेत्यादिश्रुतिभिरर्थवादा नापेक्ष्यन्तां नाम । फलश्रुतिवशादेव रागिणां तत्र प्रवृत्तेर्निष्प्रत्यूहत्वात् । अश्रुत फलकेषु सन्ध्यावन्दनादिनित्यकर्म्मसु तु प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्त्तत इति पुरुषा न प्रवर्त्तन्ते कष्टं कर्म्मेति न्यायेन तद्विषयकबलवद्द्वेषस्य प्रतिबन्धकत्वात् । तत्र विधीनां निष्फलारम्भतया प्रवर्त्तकता शक्तिरवसीदतीत्येव । तदानीमर्थवादैः कर्म्मणः प्राशस्त्यप्रतिपादनपरैः पुरुषाणां बलवद्द्वेषस्य प्रवृत्तिप्रतिबन्धकस्य निराकरणात्मकसहकारिसम्पादनद्वारेण इयमवसीदन्ती विधिशक्तिरुत्तभ्यत इति तत्सापेक्षत्वं विधेर्नानुचितमेव । तथाचोक्तम्—

लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्यां पुरुषप्रवृत्तिः ।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते ॥

अभिधा शक्तिः । सम्बन्धबोधः शक्तिज्ञानम् । प्ररोचना स्तुत्यर्थवादः । अङ्गतया अवसीदद्विधिशक्त्युत्तम्भकतया । उपयुज्यते कर्म्मप्रवृत्तावुपकारिणी भवति । एवं निन्दार्थवादानामपि निषेधप्रतिपाद्यनिवृत्तिजननोपकारकत्वं द्रष्टव्यम् । एत-देवार्थवादानां प्रामाण्यबीजमिति वक्ष्यते ।

आर्थीं भावनां लक्षयति प्रयोजनेच्छेति । यद्यपि भवितुर्भवनानुकूलभावक-व्यापारविशेषोभावनेति सामान्यत एव द्वयोरेव भावनयो र्लक्षणमुपदर्शितं तथापि शाब्दभावनायां भविता पुरुषप्रवृत्तिरूपः । भावको लिङादिः । तदीयव्यापार-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सा चाख्यातत्वांशेनोच्यते आख्यातसामान्यस्य व्यापारवाचित्वात्। साप्यंशत्रयमपेक्षते साध्यं साधनमितिकर्त्तव्यताञ्च किं भावयेत् केन भावयेत् कथं भावयेदिति। तत्र साध्याकाङ्क्षायां स्वर्गादिफलं साध्यत्वेनान्वेति। साधनाकाङ्क्षायां यागादिः करणत्वेनान्वेति।

---

विशेषश्च लिङादिनिष्ठोऽभिधारूपः। अर्थभावनायान्तु भविता स्वर्गादिः। भावकः स्वर्गकामादिपुरुषः। तदीयव्यापारविशेषश्च यागादिविषयकप्रवृत्त्याख्यकृतिविशेष इति भेदात् विशेषणोपदर्शयति। तत्र प्रयोजनेच्छाजनितेति विशेषणेन स्वर्गाद्यनुकूलत्वं बोध्यते। क्रियाविषयेति विशेषणेन च यागादिरूपं व्यापारं व्यावर्त्त्य तदनुकूलप्रवृत्त्याख्यकृतिरूपत्वं व्यापारस्य प्रतिपाद्यते। तथाच भवितुः स्वर्गादिफलस्य यत् भवणं तदनुकूलोभावकस्य स्वर्गादिकामस्य यो व्यापारविशेषः यागादिक्रियाविषयकप्रवृत्त्याख्यकृतिरूपः सैवार्थी भावनेति पर्य्यवसितम्। तस्या न शब्दनिष्ठत्वं किन्तु स्वर्गकामादिपदार्थनिष्ठत्वमत एवार्थी भावनेत्युच्यते। लिङ्त्वाख्यातत्वरूपयोरुभयोरपिलिङंशयोर्भावनावाचकत्वमभिधाय शब्दभावनाया लिङंशवाच्यत्वप्रतिपादनात् परिशेषादर्थभावनाया आख्यातत्वांशवाच्यत्वमर्थात् प्राप्तम्। तदेव व्यक्तमाह साचेति। आख्यातत्वांशेन आख्यातत्वरूपसामान्यधर्म्मवत्त्वेन। आर्थभावनाया आख्यातत्वांशवाच्यत्वे बीजमाह आख्यातसामान्यस्येति, आख्यातमात्रस्येत्यर्थः। व्यापारवाचित्वात् क्रियाविषयकव्यापारवाचित्वात्। भावनापरपर्य्यायप्रवृत्त्याख्यकृतिवाचित्वादिति यावत्। तथाचोक्तम्, भावनैव हि यत्नात्मा सर्व्वाख्यातस्य गोचर इति।

शब्दभावनावदस्या अप्यंशत्रयापेक्षित्वमाह सापीति। आर्थी भावनापीत्यर्थः। अंशत्रयं दर्शयति साध्यमित्यादि। आकाङ्क्षाप्रकारमाह किमित्यादि। तत्र साध्यसाधनेतिकर्त्तव्यतासु मध्ये। स्वर्गादिफलमिति। तत्तद्विधिबोधितफलमित्यर्थः। यस्य कर्म्मणो यत्फलसाधनत्वं तत्फलार्थिनं प्रत्येव तत्कर्म्म उपदिश्यते यथाभोजनार्थिनं प्रत्येव पचनम्। उत्तरसंयोगार्थिनं प्रत्येव च गमन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**अथ को वेद इति चेत् । उच्यते अपौरुषेयं वाक्यम् वेदः ।**

---

युक्तं द्रव्यादिषु लाक्षणिकं क्रियासम्बन्धात् । तथाच स्वर्गकामो यागेनेतिकर्त्तव्यतासहकृतेन स्वर्गं भावयेदिति बोधः । यागस्य करणत्वं अवान्तरव्यापारो अर्थापत्तिसिद्धमपूर्व्वम्, तदुक्तं भट्टपादैः ।

श्रुतार्थापत्तिरेवैका प्रमाणं तस्य चेष्यते ।
शब्दैकदेशभावाच्च स्वार्थे त्वागम एव सः ॥

निष्कृष्टश्चैतत् स्वयमेव । येन वाक्येन यागात् स्वर्गो भवति प्रयाजादिभिश्च प्रधानोपकारो भवतीत्येतच्चोद्यते तेनावश्यं विनष्टानामविनष्टानामपि चैषां कापि स्वकार्य्योत्पादनशक्तिरस्तीत्यभ्युपगन्तव्यमिति ।

वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म्म इत्युक्तं तत्र वेदपदार्थं निरूपयितुं पृच्छति अथ को वेद इति । अपौरुषेयं पुरुषविशेषाविरचितम् । ननु वर्णानां कण्ठताल्वाद्यभिघातजन्यत्वात् तदभिघातस्य च पुरुषविशेषजन्यत्वात्, वर्णप्रचयात्मकस्य वेदवाक्यस्य कथमपौरुषेयत्वसम्भव इति चेत् । अत्रोच्यते, मीमांसाप्रथमाध्यायप्रथमपादे आचार्य्येण "नित्यस्तु स्यात्"दिति सूत्रेण शब्दानां नित्यत्वस्य सिद्धान्तितत्वात् सोऽयं गकार इत्यादिप्रत्यभिज्ञानात् त्रिर्गोशब्द उच्चारित इत्यादिव्यवहाराच्च मीमांसकमते शब्दानां नित्यत्वमेव । कण्ठताल्वाद्यभिघातजन्यतदुच्चारणन्तु शब्दानामभिव्यञ्जकम् । अतएव सर्व्वदा न तदभिव्यक्तिः । उच्चारणरूपाभिव्यञ्जकाभावात् । ननु शब्दनित्यतावादिमते वर्णानां नित्यत्वमस्तु परन्तु वर्णविशेषानुपूर्व्व्या अर्थप्रत्यायकतया ग्रन्थनस्य पुरुषसाध्यतया तथाविधग्रन्थस्य पौरुषेयत्वं न सम्भवत्येव । वेदः पौरुषेय एव अर्थप्रत्यायकतया वर्णविशेषानुपूर्व्व्या ग्रथितत्वात् रघुवंशादिवदित्यनुमानेन पौरुषेयत्वस्यैव सिद्धेरिति चेन्न । रघुवंशादिप्रणेतुः कालिदासादेरिव वेदप्रणेतुर्लोकप्रसिद्ध्यभावात् वर्णानां नित्यतासम्भवे तत्तदानुपूर्व्वीकवर्णसंघातस्यापि नित्यत्वसम्भवात् पूर्व्वकालेऽपि न वेदशून्यः

४

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**स च विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पञ्चविधः । तत्राज्ञातार्थज्ञापकोवेदभागोविधिः । स च तादृशप्रयोजनवदर्थविधानेनार्थवान् यादृशञ्चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते ।**

---

पेक्षोच्चारणविषयत्वं सजातीयोच्चारणापेक्षोच्चारणविषयत्वमित्येतयोरेव पौरुषेयत्वा पौरुषेयत्वप्रयोजकत्वात् । तथाहि पूर्व्वस्मिन् कल्पे वेदानां यथोदात्तादिस्वरभेदेनोच्चारणमासीत् एतस्मिन् कल्पे परमेश्वरस्तथैवोच्चारितवान् इति सजातीयोच्चारणापेक्षोच्चारणविषयत्वं नापौरुषेयत्वं वेदानाम् । महाभारतादीनान्तु तथाविधस्वरभेदेनोच्चारणानुपदेशात् सजातीयोच्चारणानपेक्षोच्चारणविषयतया पौरुषेयत्वम् । तदुक्तम्—

लौकिकव्यवहारेषु यथेष्टं चेष्टतां जनः ।
वैदिकेषु तु मार्गेषु विशेषोक्तिः प्रवर्त्तताम् ॥

वेदं विभजते सचेति । पञ्चविध इति । यद्यपि मन्त्रब्राह्मणभेदेन द्विधा विभक्तयोर्व्वेदयो र्ब्राह्मणस्यैव दशाधिकविभागाः सन्तीति प्राक् प्रतिपादितं तथापि मीमांसाप्रथमाध्याये विध्यर्थवादमन्त्रनामधेयानां प्राधान्येन धर्म्मप्रमाणतया निरूपितत्वादेतद्ग्रन्थेपि तेषामेव निरूपणीयतया तत्र निषेधस्य विधिष्वेवान्तर्भावितत्वेपि किञ्चिद्वैलक्षण्यवशेन पृथग्विभागमभ्युपेत्य पञ्चविधत्वोक्तिः । तत्र विधिं लक्षयति तत्रेति । तेषु विभागेषु मध्ये इत्यर्थः । अज्ञातेति अज्ञातः प्रमाणान्तरेणाप्रतीतो यो अर्थ इष्टसाधनं तज्ज्ञापक इत्यर्थः । तथाच इष्टसाधनत्वेन प्रमाणान्तराप्रतीतस्य इष्टसाधनत्वप्रकारकवोधजनकवाक्यत्वं विधित्वमिति विधिलक्षणम् । यागादेस्त्यागत्वादिप्रकारेण लौकिकप्रमाणसिद्धत्वेपि स्वर्गादिरूपेष्टसाधनत्वेन प्रागप्रतीतत्वात् तस्य तत्त्वप्रकारेण वोधजनकस्य स्वर्गकामो यजेतेत्यादिवाक्यस्य विधित्वम् । तेन तत्तद्वाक्यघटकपदप्रतिपाद्येषु मध्ये सर्व्वांशे न विधित्वं किन्तु अज्ञातांश एवेति प्रतिपादयति सचेति । प्रमाणान्तरेणा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यथाग्निहोत्रं जुहुयात् स्वर्गकामइति विधिर्मानान्तरेणा-प्राप्तं स्वर्गप्रयोजनवद्धोमं विधत्ते । अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः । यत्र कर्म्म मानान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते । यथा दध्ना जुहोतीति अत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानम् दध्ना होमं भावयेदिति ।

---

प्राप्तं प्रागप्रतीतं यादृशमर्थं विधत्ते इष्टसाधनतया बोधयति तादृशस्य प्रयोजनवदर्थस्य विधानेन अर्थवान् सफलो भवतीत्यन्वयः । तथाच यस्येष्टसाधनत्वं प्राक् प्रमाणान्तरेण प्राप्तं तदंशे विधेर्नार्थक्यम् । किन्त्वनुवादतामात्रमितिभावः । सचानुवादो विधेयान्वयस्थानसमर्पणार्थत्वेन न दोषाय ।

तदुक्तम् ।

अनुवाद्यमनुक्त्वातु न विधेयमुदीरयेत् ।
नह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥

विधिमुदाहरति यथेति । स्वर्गप्रयोजनवद्धोमं स्वर्गसाधनमग्निहोत्रनामकं होमम् । विधत्ते प्रतिपादयति, स्वर्गसाधनताप्रतिपादकतां दर्शयति अग्निहोत्रहोमेनेति । प्रधानविधौ विधित्वमुपपाद्य गुणविधौ तदुपपादयति यत्रेति । तदुद्देशेन तदनुवादेन । गुणमात्रमङ्गमात्रम् । मात्रपदेन प्रधानं कर्म्म व्यावर्त्त्यते । विधत्ते इष्टसाधनतया बोधयति । तदुपदर्शयति यथेति । होमस्य दध्ना जुहोतीत्युक्तहोमस्य । मानान्तरेण प्राप्तिं दर्शयति अग्निहोत्रं जुहुयादिति । एतद्विध्युत्थिततया कथं भावयेदित्याकाङ्क्षया दध्ना जुहोति पयसा जुहोतीत्याद्यङ्गविधीनामुत्थानादितिभावः । दधिमात्रविधानम् इष्टसाधनतया अप्राप्तस्य दध्नएव इष्टसाधनतया बोधनम् ।

ननु दध्नः कतमस्येष्टस्य साधनत्वं विधौ फलाश्रवणादित्यत आह दध्नेत्यादि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



होमं भावयेदिति। तथाचाङ्गविधौ फलसमभिव्याहाराभावेपि धात्वर्थस्य सन्निहितत्वात् स्वर्गादीच्छाधीनेच्छाविषयतया इष्टत्वाच्च तत्साधनतयैवेष्टसाधनत्वं दध्याद्यङ्गानामितिभावः। एवञ्चाङ्गविधौ स्वजन्यकलिकापूर्व्वरूपव्यापारानुबन्धेन दध्याद्यङ्गानामेव करणत्वं धात्वर्थस्य तु भाव्यत्वमिति सिध्यति। धात्वर्थः करणं तच्चेति तु प्रधानविध्यभिप्रायमितिवक्ष्यते। अन्यत्र तु यस्य यत्रेष्टसाधनत्वविधानं तत्र तत्परमिति बोध्यम्।

ननु तरति ब्रह्महत्यां योऽश्वमेधेन यजेतेत्याद्यर्थवादानामपि विधित्वापत्तिः। आख्यातमात्रस्यैव भावनावाचकतया भावयतीति बोधिते धात्वर्थस्य करणतया। स्ववाक्यावगतब्रह्महत्यापापक्षयस्य च कर्म्मतयाऽन्वयात् अश्वमेधयागेन ब्रह्महत्या-पापक्षयं भावयतीति प्रतीतेरश्वमेधयागस्य इष्टसाधनतावगमात् तद्बोधकवाक्यस्य इष्टसाधनताबोधकत्वस्य स्फुटत्वादिति चेन्न। अर्थवादघटकाख्यातस्य भावना बोधकत्वेपि तत्र धात्वर्थस्य करणत्वेन फलस्य च भाव्यत्वेनान्वयासम्भवेनार्थवादस्येष्ट-साधनताबोधकत्वाभावात्। तथाहि यथा देवदत्तो ग्रामं गच्छतीत्यादावाख्यातार्थ-कृत्यपरपर्य्यायभावनायां धात्वर्थस्य भाव्यतयान्वयात् ग्रामगमनं भावयति ग्राम-कर्म्मकगमनानुकूलकृतिमान् देवदत्त इत्यादिबोधोजायते तथा अश्वमेधेन यजते इत्यत्रापि आख्यातार्थभावनायां यागस्यैव कर्म्मतयान्वयात् यागं भावयति यागानुकूलकृतिमान् इत्येवमेव प्रतीयते न तु यागेन भावयतीत्येवम्। तत् कथमिष्टसाधनत्वेनाज्ञातस्य यागस्येष्टसाधनत्वेन ज्ञापकत्वरूपं विधित्वमर्थवादस्या-पद्यते। प्रवर्त्तकवाक्यघटकलिङादिरूपाख्यातार्थभावनायान्तु धात्वर्थस्य भाव्यतया-न्वयो न सम्भवत्येव कृतिरूपाया भावनाया इच्छाजन्यतया बहुवित्तव्ययायाससाध्य-धात्वर्थयागादाविच्छाविषयत्वासम्भवात् भावनाविषयत्वानुपपत्तेः। विधिवाक्ये नेष्टसाधनतयावगते यागादौ पुरुषप्रवृत्तेरवश्यम्भावित्वात्। योऽश्वमेधयागं भावयति स ब्रह्महत्यां तरतीत्यर्थवादवाक्यार्थबोधः सुघटः। प्रथमप्रवृत्तिजनकविधिवाक्यार्थ-ज्ञानात् पूर्व्वन्तु यागादेरिष्टसाधनताज्ञानस्य कथञ्चिदप्यसम्भवात् विधिवाक्ये यागं भावयेत् यागानुकूलप्रवृत्तिं कुर्य्यादित्ययं बोधो दुर्घटः। तस्मात् प्राथमिक-प्रवृत्तिजनकवाक्यस्य यजेत स्वर्गकाम इत्यादेर्यागेन स्वर्गं भावयेदित्यर्थकतया

For Private And Personal

न च ज्योतिष्टोमेन स्वर्गकामो यजेतेति विधिना प्राप्तयागोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति । किं मत्वर्थलक्षणयेति वाच्यम् । तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात् । ननूद्भिदा यजेत पशुकाम इत्यस्येव ज्योतिष्टोमेनेत्यस्यापि उत्पत्त्यधिकारविधित्वमस्त्विति चेन्न । दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात् ।

---

स्यात् । सोमस्य विधेयतया व्यवहारस्तु विधेयतावच्छेदकतया । न तु स्वातन्त्र्येण । स्वतन्त्रयोरेव विधेययोरेकेन वाक्येन विधातुमशक्यत्वादितिभावः । मत्वर्थलक्षणागौरवात् दध्ना जुहोतीतिवत् गुणविधित्वमेवास्त्वित्यापादनं निरस्यति नचेति । प्राप्तकर्म्मण्येव गुणविधानसम्भवात् गुणविधित्ववादी प्रमाणान्तरप्राप्तकर्म्मोपदर्शयति ज्योतिष्टोमेनेत्यादि । गुणविधित्वनिरासकं हेतुमाह तस्येति । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्येत्यर्थः । अधिकारविधित्वेन फलसम्बन्धबोधकविधित्वेन । उत्पत्तिविधित्वासम्भवात् कर्म्मणः स्वरूपज्ञापकरूपोत्पत्तिविधित्वासम्भवात् । तथाच सोमेन यजेतेति विधिरेवोत्पत्तिविधिः । ज्योतिष्टोमेनेति विधिस्तु तत्फलसम्बन्धबोधकतया अधिकारविधिरेव । एवञ्च उत्पत्तिविधावेव कर्म्मणो विधेयतया तत्र तदनुवादेन विध्यन्तरं गुणविशेषविधानाय प्रभवति । अधिकारविधौ तु उत्पत्तिविधिविहितकर्म्मणोऽनूद्यमानत्वात् तदनुवादेन गुणविधानं न सम्भवति । अनूदितस्यानुवाद्यत्वायोगादितिभावः । ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यस्य उद्भिदा यजेत पशुकाम इत्यस्येव कर्म्मस्वरूपज्ञापकत्वात् फलसम्बन्धबोधकत्वाच्च उत्पत्त्यधिकारविधित्वलक्षणाक्रान्ततया उभयरूपत्वमङ्गीकृत्य उत्पत्तिविधित्वमादाय तत्र सोमेन यजेतेत्यस्य गुणविधायकत्वं सुवचमित्याशङ्कते नन्विति । एकस्य विधेरुभयरूपत्वे दृष्टान्तमाह उद्भिदेति । उद्भिच्छब्दो ज्योतिष्टोमवत् कर्म्मनामधेयमित्यग्रे वक्ष्यते । तथाच यागस्य तन्नामकत्वकीर्त्तनेन कर्म्मस्वरूपज्ञापकत्वं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**किञ्च ज्योतिष्टोमेनेत्यस्योभयविधित्वे अनेनैव यागस्तत् फलसम्बन्धोपि वोधनीय इति सुदृढोवाक्यभेदस्तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम् ।**

---

पशुकाम इत्यनेन फलसम्बन्धवोधकत्वञ्चेत्युभयरूपत्वमितिभावः। आग्नेयीं निराकरोति नेति। दृष्टान्तं उद्भिदा यजेतेत्यत्र। अन्यथा उभयविधित्वानङ्गीकारेण। अनुपपत्त्या केवलाधिकारविधित्वासम्भवेन। तथात्वाश्रयणात् उभयविधित्वाङ्गीकारात्।

ननूद्भिदा यजेतेत्यस्येव ज्योतिष्टोमेन यजेतेत्यस्यापि उत्पत्तिविध्यन्तराभावादुभयविधित्वं स्यात्। नच सोमेन यजेतेत्ययमेवोत्पत्तिविधिः श्रूयत इति वाच्यम्। तस्य मत्वर्थलक्षणाभयात् गुणविधित्वस्यैष्टत्वादित्यत आह किञ्चेति। तेनैव ज्योतिष्टोमेनेति विधिनैव। यागो ज्योतिष्टोमनामा यागः। फलसम्बन्धः स्वर्गफलसम्बन्धः। वाक्यभेद इति। गौरवलक्षणो वाक्यभेद इत्यर्थः। विधिवाक्यस्य पदार्थद्वयवोधनरूपव्यापारभेदादितिभावः। तथाचोक्तम्

श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
एकोक्त्यवसितानान्तु नार्थापेक्षा विरुध्यते॥

यद्यपि सोमेन यजेतेत्यस्योत्पत्तिविधित्वे प्रधानविधौ सोमपदे मत्वर्थलक्षणा ज्योतिष्टोमेन यजेतेत्यस्योत्पत्तिविधित्वेपि वाक्यभेद इत्युभयथैव सदोषत्वं तथापि प्रधानविधौ लक्षणारूपपददोषापेक्षया प्रधानविधौ वाक्यभेदरूपवाक्यदोषस्य गुरुत्वात् लक्षणैवाङ्गीकार्य्या। अतएव ज्योतिष्टोमवाक्यस्याधिकारविधित्वसिद्धान्ते नाम्नः फलसम्बन्धस्य च वोधकतया गौरवलक्षणवाक्यभेदसम्भवेपि न क्षतिस्तस्य प्रधानविधित्वाभावात् उत्पत्तिविधौ वाक्यभेदस्यैव गौरवातिशयरूपत्वादित्येवमालोच्याभिहितं सुदृढ इति। लक्षणाया एव श्रेयस्त्वं प्रतिपादयति तद्वरमिति। तत् तस्मात् उत्पत्तिविधौ वाक्यभेदस्य गौरवातिशयरूपत्वादित्यर्थः। विशिष्टविधानं सोमविशिष्टयागविधानम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विधिश्चतुर्विधः । उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिश्चेति । तत्र कर्म्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः ।

यथा अग्निहोत्रं जुहोतीति । अत्र च विधौ कर्म्मणः करणत्वेनान्वयः । अग्निहोत्रहोमेनेष्टं भावयेदिति ।

---

विधिं विभजते विधिश्चतुर्विध इति । अज्ञातार्थज्ञापकत्वरूपविधित्वस्य सर्व्वानुगतत्वेपि विभाजकोपाधिभेदात् परस्परं भेदः । अतो विभाजकोपाधिभेदं प्रतिपादयितुमाह तत्रेति । तेषु विधिषु मध्ये इत्यर्थः । उद्देशक्रमप्राप्तमुत्पत्तिविधिमाह कर्म्मस्वरूपेति । कर्म्मणो यत् स्वरूपं तन्मात्रस्य बोधको ज्ञापको यो विधिः स उत्पत्तिविधिरित्यर्थः । उत्पत्तिः कर्म्मणः प्रवृत्तिविषयताप्रयोजकप्राथमिकप्रतीतिः । साच कर्म्मणो नाममात्रनिर्द्देशेन द्रव्यदेवताविशिष्टकर्म्मनिर्द्देशेन च सम्भवति । अतः कश्चित् कर्म्ममात्रोत्पादकः कश्चिच्च विधिर्द्रव्यदेवताविशिष्टकर्म्मोत्पादकः । तयोरुभयोरपि कर्म्मस्वरूपमात्रज्ञापकत्वम् । नाममात्रनिर्द्देशेन द्रव्यदेवताविशिष्टकर्म्मनिर्द्देशेन च कर्म्मणः स्वरूपज्ञानसम्भवात् । अतो मात्रपदं कर्म्मणः फलसम्बन्धव्यावर्त्तकम् । एवञ्च अग्निहोत्रं जुहोतीत्यादिविधेः आग्नेयोऽष्टाकपालोऽमावास्यायामित्यादिविधेश्च कर्म्मस्वरूपज्ञापकत्वाविशेषादुत्पत्तिविधित्वम् । एतदेवोदाहरणेन दर्शयति यथेति । एतच्च कर्म्ममात्रोत्पादकविध्युदाहरणम् । अस्य गुणविधित्वशङ्कामपाकर्त्तुमाह अत्रचेति । करणत्वेनेति आख्यातार्थभावनायामितिशेषः । तदेव दर्शयति अग्निहोत्रेणेति । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यधिकारविधिना स्वर्गरूपफलविशेषस्य श्रुतत्वेपि एतद्वाक्ये तदश्रवणादिष्टमिति सामान्यत उक्तम् । धात्वर्थस्य होमस्य करणत्वेनान्वयस्य सिद्धान्तितत्वप्रतिपादनादुत्पत्तिविधित्वमेवास्येति दर्शितं गुणविधित्वे धात्वर्थस्य भाव्यत्वेनैवान्वयौचित्यादितिभावः ।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ननु यागस्य द्वे रूपे द्रव्यं देवताच । तथाच रूपाश्रवणे अग्निहोत्रं जुहोतीति कथमुत्पत्तिविधिः । अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्वादिति चेन्न । रूपाश्रवणेप्यस्योत्पत्तिविधित्वात् । अन्यथा रूपश्रवणात् दध्ना जुहोतीत्ययमे-

---

कर्मस्वरूपमात्रबोधक इत्यत्र स्वरूपपदस्य रूपमात्रपरत्वमाकलय्य वादी शङ्कते नन्विति । रूपाश्रवणे द्रव्यदेवतयोरश्रवणे । अथाग्निहोत्रपदादग्निदेवताकत्व-प्रतीतेर्देवतारूपरूपश्रवणादेवास्योत्पत्तिविधित्वं सुघटमेवेत्यत आह अग्निहोत्रपद-स्येति । तत्प्रख्यन्यायेन "तत्प्रख्यञ्चान्यशास्त्र" मिति प्रथमाध्यायचतुर्थपादीय-सूत्रेण । नामधेयत्वादिति । अग्निहोत्रादिशब्दानां यागनामधेयताधिकरणे हि अग्नये होत्रमस्मिन्निति व्युत्पत्त्या अग्निहोत्रपदस्य देवतारूपगुणविधायकत्वमाशङ्क्य तत्प्रख्यञ्चान्यशास्त्रमिति सूत्रेण सिद्धान्तितम् । यस्मादन्यशास्त्रं यदग्नये च प्रजापतये च सायं जुहोतीतिशास्त्रान्तरं तत्प्रख्यं तं भवता विधातुमिष्टं देवतारूपं गुणं प्रचष्टे बोधयति तस्मान्नायं गुणविधिः । किन्तु कर्मनामधेयबोधकः प्रधानविधिरेवेति । वार्त्तिककृद्भिरप्युक्तम् ।

विधित्सितगुणप्रापि शास्त्रमन्यद् यतस्त्विह ।

तस्मात्तत्प्रापणं व्यर्थमिति नामत्वमिष्यतइति ।

एवं दृढीकृतां वादिनः शङ्कां निराकरोति नेति । रूपाश्रवणेपीति । तथाच कर्मस्वरूपेत्यत्र स्वरूपपदं रूपमात्रपरमित्येषा बुद्धिस्ते माभूत् । किन्तु कर्मणो विशेष-प्रतिपत्तिहेतुभूतधर्ममात्रपरम् । एवञ्च द्रव्यदेवतात्मकरूपस्येव नाम्नोपि विशेष प्रतिपत्तिप्रयोजकत्वात् तद्बोधकतयैवास्य कर्मस्वरूपबोधकत्वरूपोत्पत्तिविधित्वमक्षुण्ण-मिति भावः । स्वरूपपदस्य रूपमात्रपरत्वे बाधकमाह अन्यथेति । द्रव्यदेवता-प्रकाशकवाक्यस्यैवोत्पत्तिविधित्वाङ्गीकारे इत्यर्थः । रूपश्रवणात् दधिरूपद्रव्य-श्रवणात् । अयमेवेत्येवकारेण अग्निहोत्रं जुहोतीतिविधेरुत्पत्तिविधित्वव्यवच्छेदः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वोत्पत्तिविधिः स्यात् । तथाचाग्निहोत्रं जुहोतीति वाक्यमनर्थकं स्यात् ।

अङ्गप्रधानसम्बन्धबोधकोविधिर्विनियोगविधिः । यथा दध्ना जुहोतीति । सहि तृतीयया प्रतिपन्नाङ्गभावस्य दध्नो

---

इष्टापत्तौ दोषमाह तथाचेति । उक्तत्पत्तिविधित्वाभावे चेत्यर्थः । अनर्थकमिति । देवताविधायकत्वस्य प्राक् निराकृतत्वात् गुणान्तरविधायकत्वासम्भवाच्चेति भावः । न च दध्ना जुहोतीत्युक्तहोमस्य नाममात्रविधायकत्वमस्येति वाच्यम् ।

अनुवाद्यमनुक्त्वा तु न विधेयमुदीरयेत् ।

नह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठतीति

न्यायेन यत्र कर्म्मणि किञ्चिद्विधातव्यं तदनुवादस्यावश्यकतया अत्र होमविशेषानुवादविरहेण दध्ना जुहोतीत्युक्तहोमनामविधायकत्वानवगमात् । अनुक्तनामकहोममात्रस्याग्निहोत्रनामतापत्तेश्च । दध्ना जुहोतीत्यस्योत्पत्तिविधित्वे उत्पत्तिशिष्टदधिद्रव्यावरुद्धे तत्र कर्म्मणि पयसा जुहोतीत्यस्य गुणविधित्वासम्भवात् प्रधानविध्यन्तरत्वापत्तिरपि द्रष्टव्या । अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वेतु यदग्नये च प्रजापतये च सायं जुहोति यत् सूर्य्याय च प्रजापतये च प्रातर्जुहोति दध्ना जुहोति पयसा जुहोतीत्यादिश्रुतिबोधितानामङ्गानां खले कपोतन्यायेन युगपदेव प्रकृते अग्निहोत्राख्ये कर्म्मणि सम्बन्धान्न वाक्यभेदादिसम्भवः । अतः साधूक्तमग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वमिति ।

क्रमप्राप्तं विनियोगविधिं लक्षयति अङ्गेति । अङ्गप्रधानयोर्यः सम्बन्ध उपकारकोपकार्य्यभावस्तद्बोधक इत्यर्थः । सम्बन्धबोधकत्वमुपपादयति यथेति । स विनियोगविधिः । हि यस्मात् । तृतीयेति । तृतीयया तृतीयाविभक्त्या प्रतिपन्नः करणताप्रतीतिबलावगतो अङ्गभाव उपकारकभावो यस्य तादृशस्य दध्नो दधिद्रव्यस्य होमसम्बन्धं होमोपकारकत्वसम्बन्धं विधत्ते बोधयतीत्यर्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



होमसम्बन्धं विधत्ते दध्ना होमं भावयेदिति । गुणविधौ धात्वर्थस्य साध्यत्वेनान्वयः ।

क्वचिदाश्रयत्वेनापि । यथा दध्नेन्द्रियकामस्य जुहुयादिति । अत्र दधिकरणत्वेनेन्द्रियं भावयेत् । तच्च किन्निष्ठमित्याकाङ्क्षायां सन्निधिप्राप्तहोम आश्रयत्वेनान्वेति ।

---

बोधनप्रकारमाह दध्नेति । होमं भावयेदिति ।

भावनैव हि भाव्येन फलेनान्वेतुमर्हति ।
धात्वर्थः करणं तत्र लाघवात् सन्निकर्षत इत्युक्तेः

प्राप्ताया धात्वर्थस्य करणतायाः कथमत्र बाधः स्यादित्यत आह गुणविधौचेति । साध्यत्वेन भाव्यत्वेन । अयमाशयः । विधिप्रत्ययेनेष्टस्यैव भाव्यत्वमवगम्यते । उत्पत्तिविध्यवबोधात् प्राक् च कर्म्मरूपतया द्विष्टस्य धात्वर्थस्य न भाव्यत्वसम्भवः । अत उत्पत्त्यधिकारविध्योरेव धात्वर्थस्य करणत्वेनान्वयः स्वीकृतः । तत्र करणविशेषाश्रवणाच्च । गुणविधौतु उत्पत्तिविधिना धात्वर्थस्येष्टसाधनतायां प्रतिपादितायां सत्यामन्येच्छाधीनेच्छाविषयतया ईप्सिततमत्वात् सन्निधानात् विधौ फलान्तराश्रवणाच्च साध्यतयैवान्वयो न्याय्यः । करणाकाङ्क्षातु करणताबोधकतृतीयान्तपदेनैव निवृत्ते न करणत्वेन । अन्यथा दधिमता यागेनेष्टं भावयेदित्यन्वये अङ्गीक्रियमाणे दधिपदे मत्वर्थलक्षणाप्रसङ्गः । तृतीयाश्रुतिबोधितां दध्नः करणतामिष्टत्वेनोपस्थितस्य धात्वर्थस्य भाव्यताञ्चोपेक्ष्य धात्वर्थस्य करणत्वकल्पने इष्टान्तरस्य भाव्यत्वकल्पने च महत् गौरवं स्यादिति । अतएव यत्र गुणविधाविष्टविशेषश्रवणमस्ति तत्र धात्वर्थस्य भाव्यत्वाभावेपि न करणत्वेनान्वयः करणान्तरश्रवणात् । किन्तु आश्रयत्वेनैवेत्याह क्वचिदिति । तदुदाहरणमाह यथेति । इन्द्रियकामस्य यजमानस्य । जुहुयात् ऋत्विगितिशेषः । तदन्वयबोधप्रकारं प्रतिपादयति अत्रेति । दधीति । दधिकरणकेन दध्नः करणत्वेन । तच्च दध्नः करणत्वञ्च । किं निष्ठं किमाश्रितम् । आश्रयत्वेनेति । एवञ्च होमाश्रितेन दध्नः करणत्वेनेन्द्रियं भावयेदितिबोधात्

For Private And Personal

तत्र निरपेक्षोरवः श्रुतिः। सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री चेति।

तत्राद्या लिङाद्यात्मिका। द्वितीया व्रीह्यादिश्रुतिः। यस्य च शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोक्त्री।

---

श्रुतिं लक्षयति तत्रेति। तेषूक्तेषु प्रमाणेषु मध्ये। यद्यपि यदर्थस्याभिधानं शब्दस्य श्रवणमात्रादेवावगम्यते स श्रुत्यावगम्यते। श्रवणं श्रुतिरिति भाष्यकारा-स्तथापि कृदभिहितो भावो द्रव्यवत् प्रकाशत इति न्यायात् श्रवणमात्रे णार्थप्रत्यायक-शब्दे पि श्रुतिपदप्रयोगादाह निरपेक्ष इति। निरपेक्षः स्वार्थप्रतिपादने पदान्तरा-काङ्क्षारहितो यो रवः शब्दः सा श्रुतिरित्यर्थः। तथाचोक्तम्।

अभिधातु' पदेऽन्यस्मिन्निरपेक्षरवः श्रुतिरिति।

श्रुतिं विभजति साचेति।

यच्छब्दस्योक्तिसामर्थ्यं तल्लिङ्गं त्रिविधा श्रुतिः।

विध्युक्तिविनियोगाख्या वाक्यन्तु प्राङ्निदर्शितमिति

वार्त्तिककारैः श्रुतेस्त्रैविध्याभिधानादाह त्रिविधेति। विधात्री प्रवर्त्तयित्री। वार्त्तिके तत्र विधिपदप्रयोगात्। वार्त्तिके उक्तिपदं मुख्यपरप्रकृत्यभिप्रायमत आह अभिधात्रीति। अभिधया स्वार्थं प्रतिपादयन्तीत्यर्थः। विनियोक्त्री प्रधानेष्वङ्ग-सम्बन्धं बोधयन्ती। तासां स्वरूपमुपदर्शयति तत्रेत्यादिना। लिङाद्यात्मिकेति। आदिना विध्यर्थप्रत्ययान्तरस्य ग्रहणम्। लिङादीनां शब्दान्तरनैरपेक्ष्येण प्रवर्त्तना-रूप-स्वार्थप्रतिपादनद्वारा प्रवर्त्तकत्वात्। व्रीह्यादीत्यादिपदेन मुख्यार्थपरा अन्ये प्रातिपदिका धातवश्च प्रकृतिरूपा उच्यन्ते। प्रत्ययानां विधिपदेन विनियोगपदेन चोक्तत्वात्। तेषामपि स्वस्वार्थबोधने शब्दान्तरनिरपेक्षत्वात्। तृतीयविभागस्य स्वरूपमाह यस्य चेति। श्रवणादेव शब्दान्तरापेक्षां विना। सम्बन्ध उपकारकत्वम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सापि त्रिविधा। विभक्तिरूपा एकाभिधानरूपा एकपदरूपा चेति। तत्र विभक्तिश्रुत्या अङ्गत्वं यथा व्रीहिभिर्यजेतेति। तृतीयाश्रुत्या व्रीहीणां यागाङ्गत्वम्। तदपि पुरोडाशप्रकृतितया। यथा पशोर्हृदयादिरूपहविः-

---

तृतीयायाः पुनस्त्रैविध्यमाह सापीति। विभक्तिरूपा प्रथमादिविभक्तिरूपा। लिङ्गाद्याख्यातविभक्तीनामभिधात्री पदार्थत्वात्। एकाभिधानरूपा एकोक्तिरूपा। एकपदरूपेति। अत्र पदशब्दः सुप्तिङन्तं पदमिति व्याकरणस्मृतिबोधित-पदपरः। तथाच एकं यत्पदं सुबन्तं तिङन्तं वा तद्रूपा श्रुतिरित्यर्थः।

विभक्तिरूपां विनियोक्त्रीमुदाहरति तत्रेति। तासु विनियोगश्रुतिष्वित्यर्थः। व्रीहिभिर्यजेतेति। अत्र यद्यपि लिङा प्रवर्त्तनाप्रतीतिर्विधात्र्या श्रुत्या जायते। व्रीहिशब्देन च धान्यविशेषस्य यजिनाच कर्म्मविशेषस्य प्रतीतिरभिधात्र्या श्रुत्या। तत्तदर्थप्रत्यायने शब्दान्तरनिरपेक्षत्वात्। तथापि तयोः श्रुत्योरनायासगम्यतया व्रीहिभिरितिवाक्यस्य तदुदाहरणत्वमनुक्त्वा विभक्तिरूपविनियोगश्रुत्युदाहरणत्व-मुक्तम्। इदानीं तदुपपादयति तृतीयाश्रुत्येति। यागाङ्गत्वं यागोपकारकत्वम्। व्रीहिभिरितिवाक्येन व्रीहिभिर्यागं भावयेदिति व्रीहीणां यागं प्रतिकरणत्वावगमात् करणत्वस्य च कारणताविशेषत्वात् यागोपकारकत्वं व्यक्तमेवेतिभावः। ननु पुरोडाशेन यजेतेतिश्रुत्या पुरोडाशस्यैव द्रव्यतया यागोपकारकत्वं श्रुतं तत्कथं व्रीहीणां यागाङ्गत्वमुच्यते। तेषां पुरोडाशोपकारकत्वमेव न्याय्यमित्यत आह तदपीति। व्रीहीणां यागाङ्गत्वमपीत्यर्थः। पुरोडाशप्रकृतितया पुरोडाशोपादान-कारणतया। तथाच व्रीहीणां साक्षात् पुरोडाशोपकारकत्वेपि परम्परया यागोपकारकत्वमितिभावः। परम्परोपकारकाणामुपकारकत्वव्यवहारे दृष्टान्तमाह यथेति। पशोरिति यागाङ्गत्वमिति परेणान्वयः। हृदयादीति। ज्योतिष्टोमे श्रूयते। यो दीक्षितो यदग्नीषोमीयं पशुमालभेतेति। तत्रेदं समामनन्ति "हृदयस्याग्रे अवद्यति अथ जिह्वाया अथ वक्षस" इति। अनया श्रुत्या

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रकृतितया यागाङ्गत्वम् । अरुणयैकहायण्या पिङ्गाक्ष्या सोमं क्रीणातीत्यस्मिन् वाक्ये आरुण्यस्यापि तृतीयाश्रुत्या क्रयाङ्गत्वम् । तदपि गोरूपद्रव्यपरिच्छेदद्वारा न तु साक्षात् अमूर्त्तत्वात् ।**

---

एवमवगम्यते पशुमालभ्य तस्मात् हृदयादीन्यवदाय तेन जुहोतीति। एवञ्च हृदयादिरूपं यत् हवनीयद्रव्यं तस्य प्रकृतितया उपादानतया यथा पशोर्यागाङ्गत्वं तथा प्रकृतेपीत्यर्थः। ततश्च यत्र पशोर्हृदयादिग्रहणमभिहितं तत्रैव पशोः परम्परोपकारकत्वं न सर्व्वत्रैव तथा। अतएव त्वाष्ट्रं पात्नीवतमालभेतेत्युपक्रम्य पर्य्यग्निकृतं पात्नीवतमुत्सृजतीति श्रुत्या पशोर्जीवत एव उत्सर्गविधानात् साक्षादेव तस्य यागोपकारकत्वमिति सिध्यति ।

प्रकारान्तरेण परम्परोपकारकत्वं तृतीया श्रुतिलभ्यमुदाहरति अरुणयेति। आरुण्यस्येति। गोविशेषणीभूतगुणस्येत्यर्थः। क्रयाङ्गत्वं सोमक्रयोपकारकत्वम्। वेदस्थले स्वविशेष्यान्वयिनान्वयित्वं विशेषणानामितिनियमादारुण्यविशेष्याया गोः क्रयं प्रति साधनत्वेनान्वये तद्विशेषणस्यारुण्यस्यापि तं प्रति साधनत्वेनान्वयस्यावश्य-कत्वादितिभावः। अतएव तस्य क्रयान्वये गोद्वारकत्वमेव न साक्षादित्याह तदपीति। गोरूपद्रव्येति। सोमक्रयसाधनगोरूपद्रव्यस्य परिच्छेदद्वारा इतर-व्यावर्त्तनद्वारा। तथाच अरुणेतरया गवा सोमक्रयो न सिध्यति अरुणापदेन तदितरव्यावृत्तेरितिभावः। साक्षात् साधनत्वाभावे हेतुमाह अमूर्त्तत्वादिति। यद्यपि मूर्त्ताया एकहायण्या अपि न साक्षात् क्रयसाधनत्वं किन्तु विक्रेतृवशीकार-द्वारैव तथापि वशीकारस्यावश्यकव्यवहारोपयोगिद्रव्यान्तरलाभजन्यत्वादेक हायण्या वशीकारं प्रति साक्षादेव साधनत्वम् आरुण्यस्य तु गुणपदार्थत्वेनामूर्त्ततया द्रव्यनैरपेक्ष्येण व्यवहार्य्यत्वासम्भवात् वशीकारं प्रत्यपि न साक्षाद्धेतुत्वं परन्तु द्रव्यस्येतरव्यावर्त्तकतयैवेति ततोपि विप्रकर्ष इति भावः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



व्रीहीन् प्रोक्षतीति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या। तच्च प्रोक्षणं न व्रीहिस्वरूपार्थं तस्य तेन विनाप्युपपत्तेः। किन्त्वपूर्व्वसाधनत्वप्रयुक्तम्। व्रीहीनप्रोक्ष्य यागानुष्ठाने अपूर्व्वानुपपत्तेः। एवं सर्व्वेष्वङ्गेष्वपूर्व्वप्रयुक्तत्वमङ्गत्वं बोध्यम्।

एवमिमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यत्र द्वितीयाश्रुत्या मन्त्रस्याश्वाभिधान्यङ्गत्वम्। यदाहव-

---

द्वितीयाश्रुत्युदाहरणमाह व्रीहीनिति। व्रीह्यङ्गत्वं व्रीह्युपकारकत्वम्। ननु व्रीह्युपकारकत्वं किं व्रीह्युत्पादकत्वमित्यत आह तच्चेति। व्रीहिस्वरूपार्थं व्रीहिस्वरूपोत्पादनार्थम्। तस्य व्रीहिस्वरूपस्य। तेन प्रोक्षणेन। उपपत्तेः सिद्धत्वात्। तथाच प्रोक्षणात् प्रागपि व्रीहिस्वरूपस्य सिद्धतया न प्रोक्षणस्य तत्साधनत्वमितिभावः। तर्हि प्रोक्षणस्य कीदृशं तदुपकारकत्वमित्यत आह किन्त्विति। अपूर्व्वेति। प्रोक्षणेन व्रीहीणां संस्काराधाने कृते तेषां यदपूर्व्वसाधनत्वं जायते तत्प्रयुक्तमेव प्रोक्षणस्य व्रीह्युपकारकत्वमितिभावः। तद्व्यतिरेके अपूर्व्वसाधनताव्यतिरेकप्रदर्शनेन प्रोक्षणस्यापूर्व्वसाधनतासम्पादकत्वं प्रतिपादयति व्रीहीनप्रोक्ष्येति। अपूर्व्वानुपपत्तेरिति। असंस्कृतद्रव्यकरणकहोमस्यासिद्धत्वादितिभावः। प्रोक्षणवदवघातादिष्वपि अपूर्व्वप्रयुक्तत्वमङ्गत्वमतिदिशति एवमिति। सर्व्वेषु अवघातादिषु। अङ्गेषु व्रीह्याद्यङ्गेषु।

द्वितीयाश्रुतेरुदाहरणान्तरमाह एवमिति। व्रीहीनिति द्वितीयाश्रुत्या प्रोक्षणस्य व्रीह्यङ्गत्ववदित्यर्थः। इमामिति। ऋतस्य सत्यफलस्य इमां रसनां बन्धनरज्जुम् अगृभ्णन् गृहीतवन्त इत्यर्थः। इति अनेन मन्त्रेण अश्वाभिधानीमश्वरसनामादत्ते गृह्णीयात्। अश्वाभिधान्यङ्गत्वं तदुपकारकत्वम्। तदप्यपूर्व्वसाधनत्वप्रयुक्तं मन्त्रमन्तरेण अश्वाभिधानीं गृहीत्वा यागानुष्ठाने कृते अपूर्व्वानुपपत्तेः। अत मन्त्रलिङ्गेन रसनामात्रप्रतीतावपि न पश्वन्तररसनाग्रहणे



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नीये जुहोतीत्याहवनीयस्य होमाङ्गत्वम् सप्तमीश्रुत्या। एवमन्योपि विभक्तिश्रुत्या विनियोगो ज्ञेयः।

पशुना यजेतेत्यत्र एकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम्। यजेतेत्याख्याताभिहितसङ्ख्याया

---

मन्वस्य प्रवृत्तिः, श्रुत्या अश्वरसनाग्रहण एव विनियोगात् लिङ्गात् श्रुतेर्बलवत्त्वाच्च। अतो द्वितीयाश्रुतेरेवात्र विनियोजकत्वमुक्तम्।

सप्तमीश्रुतिमुदाहरति यदिति। आहवनीयः संस्कारविशेषसंस्कृतोवह्निः। होमाङ्गत्वमिति। आहवनीयं विना होमापूर्व्वं न स्यादितिभावः। एवमिति। स्वर्गकामो यजेतेत्यत्र प्रथमाश्रुत्या स्वर्गकामनाया यागाङ्गत्वम्। स्वर्गकामनाया अधिकारिविशेषणत्वात्। एवमग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीतिश्रुतिप्राप्तस्य सायंहोममन्वस्य अग्नये च प्रजापतये च सायं जुहोतीति चतुर्थी श्रुत्या अग्निप्रजापतिहोमाङ्गत्वम्। आचार्य्यादध्येतव्य इत्यत्र पञ्चमीश्रुतेराचार्य्यस्य अध्ययनाङ्गत्वम् आचार्य्याभावे नाध्ययनसिद्धिः। विभक्तिपदं कारकविभक्तिपरमिति केचित्। अन्येतु विभक्तिमात्रपरमित्याहुः। अतएव तिस्रः साङ्गस्योपसदो द्वादशाहीनस्येति श्रुतावहीनपदस्य न ज्योतिष्टोमपरत्वं किन्तु अहर्गणाख्ययागविशेषपरत्वमिति सिद्धान्तयित्वा शास्त्रदीपिकायां वस्मादहीनश्रुतेरहर्गणवचनत्वात् तद्विषयमेव द्वादशोपसत्त्वम् षष्ठीश्रुत्यावगम्यत इत्युक्तम्। न्यायमालायामप्यत्र षष्ठ्याः श्रुतित्वमभिहितम्।

विभक्तिरूपां विनियोक्त्रीमुदाहृत्य एकाभिधानरूपां तामुदाहरति पशुनेति। समानेति। समानमेकं यदभिधानमुक्तिस्तद्रूपश्रुत्येत्यर्थः। तथाच पशुनेत्यत्र तृतीयैकवचनरूपा या एका उक्तिः तयैव एकत्वपुंस्त्वे करणकारकञ्चोच्यते। अतएकोक्तिगम्यत्वरूपसन्निकर्षादेकत्वसङ्ख्यापुंस्त्वयोः करणकारकाङ्गत्वम्। करणीभूतस्य पशोरेकत्वपुंस्त्वबोधकतया इतरव्यावर्त्तकत्वमितिभावः। पशुनेत्यत्र विभक्त्यंशे समानाभिधानश्रुतिमुदाहृत्य यजेतेत्यत्रापि विभक्त्यंशे तामुदाहरति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**आर्थभावनाङ्गत्वं समानाभिधानश्रुतेरेव। एकपदश्रुत्याच यागाङ्गत्वम्। नचामूर्त्तायास्तस्याः कथं भावनाङ्गत्वमिति-वाच्यम्। कर्त्तृपरिच्छेदद्वारा तदुपपत्तेः। कर्त्ता चाक्षेपलभ्यः। आख्यातेन हि भावनोच्यते साच कर्त्तारं विनानुपपन्नेति।**

---

यजेतेति। आख्यातेति। ईत-प्रत्ययस्य प्रथमपुरुषैकवचनतया तेनाख्यातेन एकत्वसङ्ख्या आर्थी भावना चोच्यते। तयोश्चैकोक्तिप्रतिपाद्यत्वेन सन्निहितत्वादेकत्व-सङ्ख्याया आर्थभावनोपकारकत्वमेकाभिधानश्रुतिसिद्धमित्यर्थः। अत्रैव एकपद श्रुतेरुदाहरणं दर्शयति एकपदेति। एकपदं यजेतेति तिङन्तपदं, तद्रूपया श्रुत्या यागाङ्गत्वम् एकत्वसङ्ख्याया इत्यनुषज्यते। अमूर्त्तायाः सङ्ख्याया भावनाङ्गत्वानुप-पत्तिशङ्कामपनयति नचेति। अमूर्त्ताया गुणपदार्थत्वेन मूर्त्तिरहितायाः। तस्या एकत्वसङ्ख्यायाः। कथमिति। अमूर्त्तस्य वस्तुनः स्वातन्त्र्येण विनियोगासम्भवादिति भावः। भावनाङ्गत्वं भावनोपयोगित्वम्। निराकरणे हेतुमाह कर्त्तृपरिच्छेदेति। कर्त्तुरितरव्यावर्त्तनद्वारेत्यर्थः। तदुपपत्तेर्भावनोपकारकत्वोपपत्तेः। ननु स्वार्थो द्रव्यञ्च लिङ्गञ्च सङ्ख्या कर्म्मादिरेवच। अमी पञ्चैव लिङ्गार्थास्त्रयः केषाञ्चिदग्रिमा इत्युक्तेः लिङ्गस्य पुंस्त्वादेः प्रातिपदिकार्थतैव प्रतिपद्यते। न च पशुनेत्यत्र "आङो नाऽस्त्रियामिति (१) व्याकरणस्मृत्या नादेशबलात् पुंस्त्वप्रतीतेस्तस्य वैभक्तिकार्थत्व-मेवेतिवाच्यम्। नादेशस्य प्रकृतेरस्त्रीलिङ्गत्वस्यैव द्योतकत्वात्। पुंस्त्वस्त्रीत्वे तु प्रातिपदिकप्रतिपाद्ये एव पशुभिरित्यादौ विभक्त्या तत् प्रतिपादयितुमशक्यत्वात्। तत् कथमेकत्वपुंस्त्वयोरेकोक्तिप्रतिपाद्यत्वसम्भव इतिचेन्न। मीमांसकमते शक्यतया जातेरेव प्रातिपदिकार्थत्वेन लिङ्गसङ्ख्यादीनां वैभक्तिकार्थत्वावश्यकत्वात्। अतएवोक्तम्।

> एक एकक इत्यन्ये द्वावित्यन्ये त्रयोऽपरे।
> चतुष्कं पञ्चकञ्चान्ये चतुष्के सूत्रमुच्यते॥

---

(१) प्राचां मते आङिति टाविभक्तेः संज्ञा।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अत्र एकैकस्य प्रातिपदिकार्थत्वमन्ये इत्यनेन मीमांसक-सम्मतमित्यभिहितम् ।

न च ग्रहं संमार्ष्टीत्यत्रेव एकत्वपुंस्त्वयोर्विवक्षितत्वे वाक्यभेदापत्तिरितिवाच्यम् । ग्रहस्य प्रमाणान्तरप्राप्तत्वेनोद्देश्यतया एकत्वसंमार्गयोर्विधाने वाक्यभेदसम्भवेऽपि पशोः प्रमाणान्तरेणाप्राप्तत्वेन विधेयतया एकत्वपुंस्त्वविवक्षणेऽपि वाक्यभेदासम्भवात् । सिद्धान्तितमेतत् तृतीयाध्यायप्रथमपादे । समानाभिधानश्रुत्या एकत्वपुंस्त्वयोः करणकारकोपकारकत्वात् एकत्वपुंस्त्वावच्छिन्नपशुना यजेतेति लभ्यते । तेन स्त्रीपशुना पशुद्वयेन च कृतस्य यागस्यासिद्धिः । आख्याताभिहितैकत्वसङ्ख्याया कर्तृपरिच्छेदद्वारा आर्थभावनाङ्गत्वादेकत्वावच्छिन्नः पुमान् भावयेदिति प्रतीतेः द्वाभ्यां बहुभिर्वा तत्फलकामैः स्वेच्छया कर्मविभागेन निष्पादितस्य यागस्य न फलजनकत्वं स्यात् । सप्तदशावरा ऋद्धिकामाः सत्रमुपासीरन्नित्यादिविशेषविधिमहिम्नात्तु सत्रादेव । नास्तिवचनस्यातिभार इति न्यायात् । तथा एकपदश्रुत्या एकत्वसङ्ख्याया यागाङ्गत्वात्तत्तत्फलाय क्रियमाणस्य तत्तद्यागस्यैकस्यैव तत्फलजनकता, नतु तत्फलाय तद्यागद्वितयत्रितयापेक्षा । अतएवोक्तं सकृत् कृते कृतः शास्त्रार्थ इति । इदमुपलक्षणम् । आख्याताभिहितैकत्वसङ्ख्यायाः समानाभिधानश्रुत्या आर्थभावनाङ्गत्वमपि । तेन यागाद्यात्मकक्रियाकलापस्य एकप्रयत्नसाध्यत्वप्रतीतेः प्रयत्नभेदेन यागासिद्धिः । अन्यथा अन्ययागमध्येऽप्यन्ययागमनुष्ठाय तद्यागसमापनमापद्येत । इष्टापत्तौ "अप वा एतद्यज्ञाच्छिद्यते यदन्यस्य तन्त्रे वितते अन्यस्य तन्त्रं प्रतीयते" इति भाष्यधृतश्रुत्या एकानुष्ठानमध्ये अन्यानुष्ठानस्य यज्ञापच्छेदरूपत्वाभिधानं विरुध्येत । एतदप्यौत्सर्गिकं बलवत्प्रमाणमहिम्ना बाध्यते । अतएव चातुर्मास्ययागीय तृतीयपर्वशाकमेधयागावयवभूतो मध्यन्दिनकर्त्तव्यः सान्तपनीयो यागो यदि दैवान्मानुषाद्वा प्रतिबन्धान्मध्यन्दिनाकृतः सायमुपक्रम्यते तदा सायमग्निहोत्रस्य नोत्कर्षः । इष्ट्यग्निहोत्रयोः शास्त्रप्राप्तक्रमाभावात् । किन्तु सान्तपनीयेष्टिमध्येऽप्यग्निहोत्रं स्वकालेऽनुष्ठाय पश्चादिष्टिशेषः समापनीय इति सिद्धान्तितं न्यायमालादौ पञ्चमाध्यायप्रथमपादे ।

ननु वाक्ये कर्त्तुरश्रवणात् कथमाख्यातार्थैकत्वसङ्ख्या कर्त्तृपरिच्छेदं जनयतीत्यत आह कर्त्ता चेति । आक्षेपेण आकर्षणेन लभ्यः प्राप्य इत्यर्थः । कः कर्त्तारमाक्षिपेदिति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**अतएवैन्द्र्या लिङ्गान्नेन्द्रोपस्थानार्थत्वम् । किन्तु ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र गार्हपत्यमिति द्वितीयाश्रुत्या गार्हपत्योपस्थानार्थत्वम् ।**

---

सह प्रस्थितयो र्हि प्रमाणयोर्यस्य विषयदेशे चिरेण प्राप्तिर्भवति तस्य विप्रेयो दौर्व्वल्यकरो भवत्यवधारिते तु विनियोगे इति।

अतएवेति । श्रुतेः प्राबल्यादित्यर्थः । ऐन्द्र्या इति । ऐन्द्र्या ऋचः लिङ्गात् इन्द्रोपस्थानार्थत्वमिन्द्रोपस्थानकरणत्वं नेत्यर्थः । अयमाशयः । ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति श्रूयते । तत्र ऐन्द्री इन्द्रप्रकाशिका ऋक् । साच "कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे" इति मन्त्रात्मिका । तस्य मन्त्रस्यार्थप्रकाशनसामर्थ्यरूपलिङ्गेन इन्द्रः प्रकाश्यते । अर्थो यथा । भो इन्द्र कदाचन कदाचिदपि न स्तरीरसि घातको न भवसि किन्तु दाशुषे आहुतिं दत्तवते यजमानाय सश्चसि प्रीयसे इति । ऐन्द्र्येति तृतीयाश्रुत्या मन्त्रस्य उपस्थानकरणत्वं गम्यते । तस्य चेन्द्रप्रकाशनसामर्थ्येन तदुपस्थानस्य इन्द्रकर्मकत्वावगमात् मन्त्रस्येन्द्रोपस्थाने विनियोगः प्रतीयते । यद्यप्यनेन मन्त्रेणेन्द्रमुपतिष्ठेतेति विनियोजकशब्दो नास्ति तथापि यद्यसौ मन्त्र इन्द्रोपस्थानार्थो न स्यात्तदाऽनेनेन्द्रप्रकाशनमनुपपन्नम् । न खल्वन्योपस्थानवेलायामन्यस्तुतिरुचितेत्यर्थापत्त्या अयं मन्त्र इन्द्रोपस्थानकरणमिन्द्रप्रकाशकत्वात् बर्हिर्देवसदनं दामीति मन्त्रस्य कुशच्छेदनकरणत्ववदित्यनुमानेन वा मन्त्रस्येन्द्रोपस्थानकरणत्वावधारणात् । गार्हपत्यमुपतिष्ठत इत्यत्र गार्हपत्यपदरूपया अभिधात्र्या श्रुत्या अग्निविशेषः प्रतीयते । द्वितीयारूपया विनियोक्त्र्या श्रुत्या च प्रीतिहेतुव्यापारात्मकोपस्थानक्रियाजन्यप्रीतिरूपफलाश्रयत्वलक्षणं गार्हपत्यगतं कर्मत्वं बोध्यत इति मन्त्रस्य गार्हपत्योपस्थाने विनियोगः प्रतीयते । अत्र संशयः । किमुभयोः प्रमाणत्वाविशेषात् विकल्पः । किंवा प्रतिप्रधानं गुणावृत्तिन्यायेन इन्द्रोपस्थाने गार्हपत्योपस्थाने च विनियोगः । अथवा श्रुत्या लिङ्गं बाध्यतां मन्त्रस्थमिन्द्रपदं गार्हपत्यपरमस्तु । आहोस्वित् विनिगमनाविरहेण लिङ्गेनैव श्रुतिर्बाध्यतां गार्हपत्यपदमिन्द्रलाक्षणिकमस्त्विति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शब्दसामर्थ्यं लिङ्गम्। यथाहुः।
सामर्थ्यं सर्व्वशब्दानां लिङ्गमित्यभिधीयते।
सामर्थ्यम् रूढ़िरेव। तेन समाख्यातो नाभेदः। तेन

---

अत्र विकल्पे अष्टदोषापातादावृत्तौ च गौरवात् ऐन्द्रीपदेन प्रथममिन्द्रोपस्थिते-र्लक्षणयैव गार्हपत्यपदमेवेन्द्रलाक्षणिकं न्याय्यमिति प्राप्ते लिङ्गादीनां श्रुत्यपेक्षया दौर्ब्बल्यं विलम्बेनार्थप्रतिपादकत्वादिति सिद्धान्तितं श्रुतिलिङ्गेति सूत्रेण। अर्थप्रतिपत्तौ विलम्बश्च अनुमानादिगम्यत्वात्। विनियोगबोधकशब्दस्य तु झटित्युपस्थापकत्वं प्रत्यक्षत्वादिति मन्त्रस्थमिन्द्रपदमेव गार्हपत्यलाक्षणिकमिति। तथाचोक्तं वार्त्तिककृद्भिः।

यथा शीघ्रप्रवृत्तत्वाल्लिङ्गादेर्बाधिका श्रुतिः।
तथैव विनियोगेपि सैव पूर्व्वं प्रवर्त्तते॥

शास्त्रदीपिकायामप्युक्तम्।

यावदेव हि मन्त्रार्थो मन्त्रेण प्रतिपाद्यते।
तावदेव श्रुतिर्मन्त्रं गार्हपत्यार्थतां नयेत्॥
मन्त्रार्थं मन्त्रतो बुद्धा पश्चाच्छब्दं निरूप्य च।
मन्त्राकाङ्क्षावशेनेन्द्रशेषत्वे श्रुतिकल्पना॥
श्रुत्या प्रत्यक्षया पूर्व्वं गार्हपत्याङ्गतां गते।
निराकाङ्क्षीकृते मन्त्रे निर्म्मूला श्रुतिकल्पना॥
तेन शीघ्रप्रवर्त्तिन्या श्रुत्या लिङ्गस्य बाधनम्।
प्रत्यक्षे चानुमाने च यथा लोके बलाबलम्॥

लिङ्गं लक्षयति शब्दसामर्थ्यमिति। शब्दस्यार्थप्रकाशनसामर्थ्यमित्यर्थः। तथाचाहुर्भाष्यकाराः। यच्छब्दस्यार्थमभिधातुं सामर्थ्यं तल्लिङ्गमिति। वार्त्तिककारा अपि यच्छब्दशक्तिसामर्थ्यं तल्लिङ्गमित्याहुः। स्वयमपि वृद्धसम्मतिमाह यथाहु-रिति। सामर्थ्यमर्थाभिधानशक्तिः। तत्र किं यौगिकार्थप्रकाशनसामर्थ्यं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**वर्हिर्देवसदनं दामीतिमन्त्रस्य कुशलवनाङ्गत्वं नतूलपादिलवणाङ्गत्वम् । तस्य वर्हिर्दामीति लिङ्गात्तल्लवनं प्रकाशयितुं समर्थत्वात् । एवमन्यत्रापि लिङ्गविनियोगोद्रष्टव्यः ।**

---

गौणार्थप्रकाशनसामर्थ्यं रूढार्थप्रकाशसामर्थ्यञ्चादरणीयमित्यत्राह सामर्थ्यं रूढिरेवेति । रूढमुख्यार्थप्रकाशशक्तिरेवेत्यर्थः । एवकारेण यौगिकसामर्थ्यं गौणसामर्थ्यञ्च निराकृतम् । तत्र यौगिकसामर्थ्यनिराकरणफलमाह तेनेति । सामर्थ्यस्यानादिपरम्परागतमुख्यशक्तिरूपत्वेनेत्यर्थः । नाभेद इति । समाख्यया ऐक्यं नेत्यर्थः । एतेन यौगिकसामर्थ्यनिरासात् न समाख्यायामतिव्याप्तिरिति दर्शितम् । गौणसामर्थ्यनिरासफलन्तु न तूलपादिलवनाङ्गत्वमित्यनेन वक्ष्यते । वर्हिरिति । देवानां सदनं सीदन्त्यस्मिन्निति व्युत्पत्त्या उपवेशनाधिकरणभूतं वर्हिरहं दामि लुनामीत्यर्थः । कुशलवनाङ्गत्वं कुशच्छेदने विनियोज्यत्वम् । तथाच दर्शपौर्णमासप्रकरणे एतन्मन्त्रमात्रं श्रूयते न पुनरनेन मन्त्रेण किं कुर्यादित्यत्र क्वापि श्रुतिरस्ति । अतः साक्षाद्विनियोजिकायाः श्रुतेरभावात् मन्त्रस्थवर्हिःपदेन दर्भत्वेन मुनिपरिभाषितकतिपयतृणविशेषरूपमुख्यार्थप्रकाशात् दामीत्यनेन च दानलूनावित्यस्य रूपतया अनादिपरम्परागतमुख्यार्थरूपलवनप्रकाशात् अनेन मन्त्रेण कुशं छिन्द्यादिति श्रुतिं कल्पयित्वा तद्बलेन कुशच्छेदने विनियोगो मन्त्रस्येतिभावः । ननु तर्हि लैङ्गिकविनियोगोपि श्रौत एव भवति तत्कथमनयोर्बलावलभावोऽङ्गीक्रियते द्वयोरेव श्रौतत्वाविशेषेण तुल्यबलत्वादितिचेत् । अत्रोच्यते, लिङ्गादिभिरपिकल्पनीयश्रुतिमूलक एव विनियोगः प्रतिपाद्यतइति सत्यम् । परन्तु श्रुतिज्ञानस्य विलम्बितत्वाविलम्बितत्वाभ्यां दुर्व्वलत्वसवलत्वे अङ्गीक्रियेते । ततश्च प्रत्यक्षश्रुतेः प्रमाणान्तरनिरपेक्षतया अविलम्बेन प्रतीतिविषयत्वात् वलवत्त्वम् । कल्पनीयश्रुतीनान्तु प्रमाणान्तरसापेक्षतया विलम्बेन प्रतीतिविषयत्वात्दुर्व्वलत्वमुचितमेव । तदुक्तं वार्त्तिककृद्भिः ।

विनियोक्त्री श्रुतिस्तावत् सर्व्वैष्वेतेषु सम्मता ।
धीस्तस्याः सन्निकर्षेण विप्रकर्षेण च स्थिता ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तदिदं लिङ्गं वाक्यादिभ्योबलवत्। अतएव स्योनन्ते

लिङ्गस्य गौणार्थप्रकाशनसामर्थ्यरूपतानिरासफलमाह नत्विति। तस्य वर्हिरित्यादिमन्त्रस्य। तल्लवनं कुशलवनमेव। एवकारगर्भत्वात् कुशसदृशतृणान्तरलवनं प्रकाशयितुं स्वतोऽसमर्थत्वं प्रतीयते। असमर्थत्वादिति पाठेतु। तल्लवनमुलपादिलवनमित्यर्थः। असमर्थत्वात् स्वतोऽसमर्थत्वादित्यर्थः। तथाच गौणार्थप्रकाशने शब्दानां स्वाभाविकी शक्तिरेव नास्ति, प्रमाणान्तरबलात्तु तत्प्रत्यायनमस्वाभाविकम्। तदपि प्रमाणान्तरमत्र नास्तीतिभावः। तथाचोक्तं पार्थसारथिमिश्रैः।

गौणे सदपि सामर्थ्यं न प्रमाणान्तरं विना।
आविर्भवति मुख्ये तु शब्दादेवाविरस्ति तत्॥
तात्पर्य्यञ्च स्वतो मुख्ये गौणार्थपरता पुनः।
प्रमाणान्तरविज्ञेया तदभावोऽत्र सिध्यति॥

न्यायमालायामपि। तत्र लवनप्रकाशनसामर्थ्यलक्षणेन लिङ्गेन अयं मन्त्री लवनक्रियायां विनियुज्यते। लवितव्यञ्च वर्हिर्द्विविधं मुख्यं गौणञ्च। मुख्यं कुशकाशादि दश्रदर्भरूपं गौणन्तु तत्सदृशं तृणान्तरम्। तस्मिन् वर्हिःशब्दस्य माणवके अग्निशब्दवत् गुणयोगेन प्रवृत्तत्वात्। तथासति दर्भस्य तृणान्तरस्य च लवने मन्त्रविनियोगे प्राप्ते ब्रूम इत्यादिना मुख्यस्यैव लवने मन्त्रविनियोगो न गौणस्येति सिद्धान्तितम्। तथाच तृतीयाध्याय द्वितीयपादे सिद्धान्तसूत्रम्।

अर्थाभिधानसामर्थ्यान्मन्त्रेषु शेषभावः स्यात्
तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगादिति।

एष न्यायोऽन्यत्राप्यतिदिशति एवमिति। अन्यत्रापि अग्नये जुष्टं निर्व्वपामीत्यादौ। अत्रापि मन्त्रस्य साक्षाद्विनियोजकश्रुतिविरहेपि लिङ्गात् श्रुतिं कल्पयित्वा निर्व्वापादौ विनियोगः कर्त्तव्य इति भावः।

लिङ्गस्य वाक्यादिभ्यो बलवत्त्वं दर्शयति तदिदमिति। अतएव लिङ्गस्य वाक्यादिभ्यो बलवत्त्वादेव। स्योनन्ते सदनमिति। दर्शपौर्णमासप्रकरणे मन्त्र



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**सदनं कृणोमीति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वम् । सदनं कृणोमीति लिङ्गात्, न तु वाक्यात् ।**

---

आम्नायते। स्योनन्ते सदनं कृणोमि घृतस्य धारया सुषेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति। अस्यार्थः। भोः पुरोडाश ते तव स्योनं समीचीनं सदनं स्थानं कृणोमि करोमि तच्च स्थानं घृतस्य धारया सुषेवम् सुष्ठु सेवितुं योग्यं कल्पयामि। भो व्रीहीणां मेध सारभूत त्वं सुमनस्यमानः समाहितमनस्कस्तस्मिन् अमृते सुष्ठु सेवितुं योग्ये सदने सीद उपविश प्रतितिष्ठ स्थिरीभव। अत्र विनियोगविशेषाश्रवणात् मन्त्रलिङ्गेनैव विनियोगे कर्त्तव्ये किं कल्पयामन्तपूर्व्वार्द्धेन उपस्तरणरूपसदनकरणप्रतीतेः पूर्व्वार्द्धस्य सदने तथा तस्मिन् सीदामृते इत्यादि परार्द्धेन पुरोडाशसादनप्रतीतेः परार्द्धस्य सादने इति विभज्य विनियोगः कर्त्तव्यः। उत तस्मिन्निति प्रकृतवाचिना तच्छब्देन यत् सदनं करोमि तस्मिन् सीदेत्यन्वयबोधात् परार्द्धस्य पूर्व्वार्द्धसापेक्षतया एकवाक्यत्वावगमात् तदनुरोधेन पूर्व्वापरार्द्धयोरुभयोरेव स्थानकरणे पुरोडाश-सादने च विनियोगः। तत्र विनियोजिका श्रुतिरेवं कल्पनीया समग्रेण मन्त्रेण स्थानं कर्त्तव्यं तथा समग्रेण मन्त्रेण पुरोडाशः स्थापनीयश्चेति। एवं संशये उभयो स्तुल्यबलत्वे विकल्पप्राप्तेरुक्तं वाक्याल्लिङ्गं बलवदिति। यतः कल्पयाम्यन्तस्य सदनकरणार्थप्रकाशनसामर्थ्यरूपं लिङ्गं प्रत्यक्षम्। तस्मिन्नित्यादेश्च पुरोडाश-सादनार्थप्रकाशनसामर्थ्यरूपं लिङ्गं प्रत्यक्षम्। प्रत्यक्षेण च लिङ्गेन पूर्व्वार्द्धस्य सदनकरणे परार्द्धस्य च पुरोडाशसादने विनियोजिका श्रुतिर्झटिति कल्पयितुं शक्यते। समग्रमन्त्रस्य प्रत्येकं विनियोगस्तु न तावत् प्रथमं बुद्धौ विषयीभवति। परार्द्धस्य सदनकरणार्थप्रकाशनरूपसामर्थ्यानवधारणात्। पूर्व्वार्द्धस्य च पुरोडाशसादनार्थप्रकाशनरूपसामर्थ्याप्रतीतेः। तस्मिन्नित्यन्वयबोधकृतैकवाक्य-तावधारणानन्तरन्तु परार्द्धसहकृतस्यैव पूर्व्वार्द्धस्य सदनकरणार्थप्रकाशकत्वं पूर्व्वार्द्ध-सहकृतस्य च परार्द्धस्य पुरोडाशसादनार्थप्रकाशकत्वमिति निश्चितस्य समग्रमन्त्रस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**समभिव्याहारो वाक्यम्। समभिव्याहारश्च साध्यत्वादि-वाचकद्वितीयाद्यभावेपि वस्तुतः शेषशेषिवाचकपदयोः सहो-**

प्रत्येकं विनियोगोऽवधारयितुं शक्यते। अतो लिङ्गकल्पनाव्यवधानेन श्रुति-कल्पनाविलम्बितत्वरूपादर्थविप्रकर्षाल्लिङ्गाद्वाक्यं दुर्बलम्।

तथाहि आदौ तस्मिन्मन्त्रस्यान्वयबोधस्तदनन्तरमेकवाक्यतावगमस्तदुत्तरं पूर्वापरार्द्धयोरुभयोरेव प्रत्येकार्थप्रकाशनसामर्थ्यरूपलिङ्गकल्पनं पश्चाच्च समग्रमन्त्रस्य प्रत्येककर्मणि विनियोजिका श्रुतिः कल्पनीया। यावता कालेनेयं कल्पना-परम्परा सम्पत्स्यते तावता कालेन प्रत्यक्षलिङ्गद्वयेन पूर्वापरार्द्धविभागेन विनियोजिका श्रुतिः कल्पिता स्यात्। कल्पितया च तया श्रुत्या पश्चाद्भाविनी श्रुत्यन्तरकल्पना बाध्यते इति लिङ्गं वाक्याद्बलवत्।

वाक्यं लक्षयति समभिव्याहार इति। यद्यपि "एकार्थमनेकपदं वाक्य"मिति भाष्यकारैः परस्परान्वितपदसमूहस्य वाक्यत्वं प्रतिपादितम्। तथापि यद्वाक्यस्य विनियोजकत्वं तल्लक्षणस्यैवापेक्षिततया श्रुत्यादौ वाक्यत्वसद्भावेपि तथाविधवाक्यस्य विनियोजकत्वाभावात् वाक्यलक्षणस्य तत्साधारण्ये प्रयोजनाभाव इति वाक्य-सामान्यलक्षणमुपेक्षितम्। स्वलक्षणस्य श्रुत्यादिव्यावृत्तत्वं व्याख्यया स्पष्टयति समभिव्याहारश्चेति। लक्षणवाक्ये समभिव्याहारपदं समभिव्याहारमात्रपरम्। उपकार्य्योपकारकयोः सहोच्चारणमात्रमिति तदर्थः। अतो मात्रार्थान्तर्भावादाह साध्यत्वादिवाचकेति। कर्म्मत्वादिवाचकेत्यर्थः। कर्म्मत्वकरणत्वादिवाचकानि च द्वितीयातृतीयादीन्येवेति तदेवाह द्वितीयादीति। एवञ्च साध्यत्वादिवाचक-द्वितीयाद्यघटितत्वे सति शेषशेषिवाचकपदयोः सहोच्चारणमिति लक्षणमापाततः फलितम्। एतेन कर्म्मत्वकरणत्वादिबोधकद्वितीयातृतीयादिघटितायाः श्रुतेर्व्यावृत्तिः। ननु कर्म्मत्वकरणत्वादिबोधकद्वितीयाद्यभावे कथं सहोच्चार्य्यमानपदयोः शेषशेषि-वाचकत्वमवधार्य्यमित्यत आह वस्तुत इति। तात्पर्य्यादित्यर्थः। शेषशेषीति। उपकार्य्योपकारकेत्यर्थः। पदयोरिति। एतेन लिङ्गादिव्यावृत्तिः। लिङ्गादिकृत-विनियोगस्थले शेषशेषिवाचकपदविरहात्। तथाच साध्यत्वादिवाचकद्वितीयाद्य-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



हारेति चावश्यं वक्तव्यम्। अन्यथा स्रुवादिष्वपि पर्णता-पत्तेः। सेयं पर्णता अनारभ्याधीतापि सर्व्वप्रकृतिष्वेवान्वेति,

---

जुहूकरणकहोमापूर्व्वम्। वाक्यार्थफलमाह एवञ्चेति। नान्यथेति। काष्ठान्तरेण यदि जुहूः क्रियते तदा तदपूर्व्वं न स्यादित्यर्थः। एतेन पर्णमय्येव जुहूः कर्त्तव्या न काष्ठान्तरेण। तत्र फलश्रुतिस्तु स्तुत्यर्था न काम्यत्वार्था इति सिद्धम्। तथाच भाष्ये चतुर्थाध्यायतृतीयपादे।

यस्य खादिरः स्रुवो भवति स च्छन्दसामेव रसेनावद्यति। यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति यस्याश्वत्थी उपभृद्भवति ब्रह्मणैवास्यान्नमवरुन्धे यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्याहुतयस्तिष्ठन्तीत्यादि श्रुतिविहितेषु खादिर-पालाशादिद्रव्येषु तथा यदङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते इति श्रुतिविहिते चक्षुषोऽञ्जनसंस्कारे तथा यत् प्रयाजानुयाजा इज्यन्ते वर्म्म वा एतत् यज्ञस्य क्रियते वर्म्म यजमानस्य भ्रातृव्यस्य अभिभूत्यै भवतीत्यादि श्रुतिविहिते प्रयाजादि-कर्म्मणि च फलश्रुतीनां पारमार्थिकफलविधित्वं पूर्व्वपक्षयित्वा फलश्रुतीनामर्थवादत्वं सिद्धान्तितम्। तथाच सिद्धान्तसूत्रम्।

द्रव्यसंस्कारकर्म्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यादिति।

अतएव पलाशादिकाष्ठघटितमेव जुह्वादीनाम् स्वरूपमभियुक्ता आहुर्यथा।

वैकङ्कती ध्रुवा प्रोक्ता आश्वत्थी चोपभृन्मता।

जुहूः पलाशकाष्ठस्य खादिरस्य स्रुवो मतः॥

अवत्तहविरित्यादिदलव्यावर्त्यप्रदर्शनायाह अवत्तेति। अवश्यवक्तव्यत्वे हेतुमाह अन्यथेति। पर्णतया जुह्वपूर्व्वं भावयेदित्येतावन्मात्रोक्तावित्यर्थः। स्रुवादिष्वपीति। अत्रायमाशयः। पर्णतया जुह्वपूर्व्वं भावयेदित्यनेन जुहूकरणकहोमापूर्व्वं प्रति पर्णतायाः निमित्तत्वमवगम्यते। तच्च निमित्तत्वं केन द्वारेणेति जिज्ञासायां हविर्द्धारण-द्वारेणेत्यवश्यं वक्तव्यम्। तर्हि होमापूर्व्वं प्रति हविर्द्धारणस्य कारणत्वं हविर्द्धारणं प्रति च पर्णतायाः कारणत्वमिति प्राप्तेः स्रुवादिहोमीयहविर्द्धारणं प्रत्यपि पर्णतायाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



न विकृतिषु । तत्र चोदकेनापि तत्प्राप्तिसम्भवात् पौनरुक्त्यापत्तेः । —

यत्र समग्राङ्गोपदेशः सा प्रकृतिः यथा दर्शपौर्णमासादिः । तत्प्रकरणे सर्व्वाङ्गपाठात् । यत्र न सर्व्वाङ्गोपदेशः सा

---

कारणत्वापत्तिः । अथोच्यते जुहूपदश्रवणात् न स्रुवादिहोमापूर्व्वं प्रति पर्णता निमित्तमिति । तर्हि स्रुवादिहोमापूर्व्वव्यावृत्तये अवत्तहविर्द्धारणद्वारेणेति द्वारमेव विशेषणीयं नतु हविर्द्धारणद्वारेणेति सामान्यतोद्वारकल्पनम् । एवञ्च चरोरेवावदानसम्भवात् चरुहोमसाधनीभूताया जुह्वाएव पर्णता सिध्यति न स्रुवादीनामाज्यादिहोमसाधनानाम् । आज्यादीनामवदानासम्भवादिति ।

जुह्वाः पर्णता किं यागमात्रे विहिता यागविशेषे वेत्यत्राह सेयमिति । अनारभ्येति । अनारभ्य यागविशेषमनुपक्रम्य अधीता आम्नातेत्यर्थः । सर्व्वप्रकृतिषु प्रकृतीभूतयागमात्रे । ननु यद्यनारभ्याधीता पर्णता तदा प्रकृतिविकृतिसाधारणी भवतु विकृतावनन्वये को हेतुरित्यत्र हेतुमाह तत्रेति । चोदकेन अतिदेशवाक्येन । पौनरुक्तेति । तथाच प्रकृतिषु विधानादतिदेशेनैव विकृतिषु तत्प्राप्तौ तत्र विधिवाक्येन पर्णताभिधानं द्विरुक्तं स्यादितिभावः । अतएव मीमांसातृतीयाध्यायषष्ठपादे "यस्य खादिरः स्रुवोभवति यस्य पर्णमयी जुहूर्भवति इत्यादि श्रुतेः किं प्रकृतिमात्रविषयत्वं उतप्रकृतिविकृत्युभयविषयत्वमिति सन्देहे "सर्व्वार्थमप्रकरणा"दिति सूत्रेण प्रकरणाभावात् सर्व्वविषयत्वमिति पूर्व्वपक्षयित्वा "प्रकृतौ वा अद्विरुक्तत्वा"दिति सूत्रेण द्विरुक्तत्वाप्रसक्त्या प्रकृतिविषयत्वमेवेति सिद्धान्तितम् ।

प्रकृतिं लक्षयति यत्रेति । समग्राङ्गोपदेशइति । समग्राणां निरवशेषाणामङ्गानामुपदेशः शब्दतः कर्त्तव्यतया प्राथमिकप्रतिपादनम् । ननु कर्म्मान्तरे प्रथममुपदिष्टानामतिदेशइति तात्पर्य्यम् । अतएव न्यायमालायामुक्तम् । यत्रापेक्षितस्याङ्गजातस्य प्रतिपादकोग्रन्थसन्दर्भः पठ्यते स उपदेशइति" । सा प्रकृतिरिति । विधेयप्राधान्यात् सेति स्त्रीलिङ्गता । प्रकृत्युदाहरणमाह यथेति । तत्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**विकृतिः । यथा सौर्य्यादिः । तत्र कतिपयाङ्गानामति-देशेन प्राप्तत्वात् । अनारभ्यविधिः सामान्यविधिः ।**

---

लक्षणसमन्वयायाह तत्प्रकरणइति । विकृतिं लक्षयति यत्रेति । नेति । सर्व्वे-षामङ्गानामुपदेशो नास्ति किन्तु कर्म्मान्तरे प्रागुपदिष्टानामङ्गानामतिदेश इत्यर्थः । तेन प्राथमिकविधिप्रतिपादितसमग्रेतिकर्त्तव्यताकत्वं प्रकृतित्वम् । आतिदेशिकेति-कर्त्तव्यताकत्वं विकृतित्वमिति फलितम् । विकृतिमुदाहरति यथा सौर्य्यादिरिति । अत्र विकृतिलक्षणं सङ्गमयति तत्रेति । अतिदेशेनेति । अतिदेशस्तु "ये परत्र विहिता धर्म्मास्तमतीत्यान्यत्र तेषां देशइति सप्तमाध्यायप्रथमपादे भाष्यकारोक्तः । श्लोकमप्युदाहरन्ति पूर्व्वाचार्य्याः ।

प्रकृतात् कर्म्मणो यस्मात् तत्समानेषु कर्म्मसु ।
धर्म्मप्रदेशो येन स्यात् सोऽतिदेश इतिस्थितिः ॥

अन्यत्र ।

अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्म्मसन्ततेः ।
अन्यत्र कार्य्यतः प्राप्तिरतिदेशोऽभिधास्यते ॥

सचातिदेशो नाम्ना वचनेन च भवति । तत्र मासमग्निहोत्रं जुहोतीत्यादुक्त-यागविशेषे कर्म्मनाम्नाऽतिदेशः । वचनं पुनर्द्विविधं प्रत्यक्षश्रुतमानुमानिकञ्च । तत्र षुश्येनयोराभिचारिक यागयोर्मध्ये इषौ कांश्चिद्धर्म्मानभिधाय समानमितरच्छ्येनेनेति योऽतिदेशः स प्रत्यक्षश्रुतवचनेनातिदेशः । आनुमानिकवचनेन तु सौर्य्यादावतिदेशः । तथाहि सौर्य्यं चरुं निर्व्वपेत् ब्रह्मवर्च्चसकामइति श्रूयते । तत्राङ्गानुपदेशात्तदा-काङ्क्षायां दर्शपौर्णमासीयाग्नेयधर्म्मा अतिदिश्यन्ते । आग्नेयमष्टाकपालं निर्व्वपेदित्यत्र प्रयुक्तो निर्व्वापशब्दः सौर्य्यं चरुं निर्व्वपेदित्यत्रापि श्रुतः । तथा आग्नेयपदवत् सौर्य्यपदमपि तद्धितप्रत्ययेन एकदेवतत्वं बोधयति । तथा चरोरप्योषधिद्रव्यकत्व-मितेत्यवमाग्नेयलिङ्गानां सम्बन्धात् सौर्य्यं चरुं निर्व्वपेदाग्नेयवदित्यानुमानिकवचन-कल्पनाङ्गीकारात् । तथाचाष्टमाध्यायप्रथमपादे सूत्रम् ।

यस्य लिङ्गमर्थसंयोगादभिधानवदिति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**तदिदं वाक्यं प्रकरणादिभ्यो बलवत् । अतएवेन्द्राग्नी इदं हविरित्यादेरेकवाक्यत्वाद्दर्शाङ्गत्वं, न तु प्रकरणाद्दर्शपौर्णमासाङ्गत्वम् ।**

---

अस्यार्थः । यस्य कर्म्मणो लिङ्गं चिह्नं यस्यां विकृतौ दृश्यते तस्य धर्म्मास्तस्यां प्रवर्त्तन्ते । अर्थस्य लिङ्गस्य सम्बन्धात् नामातिदेशवदिति । सौर्य्यादिरित्यादिपदात् आग्नावैष्णवपरिग्रहः । तत्रापि आग्नावैष्णवमेकादशकपालं निर्व्वपेदग्नीषोमीयवदित्यानुमानिकवचनं प्रागुक्तरीत्या कल्पनीयमिति तदधिकरणे भाष्यकृताङ्गीकारात् ।

ननु अनारभ्याधीतस्यापि पर्णमयीवाक्यस्य कथं सर्व्वयागविषयकत्वप्रसक्तिस्तथाविधशब्दाभावादित्यत आह अनारभ्येति । सामान्यविधिरिति । तथाच सामान्यविधित्वात् यागसामान्यमेवास्य विषयः । परन्तु प्रकृतिविकृतिसाधारणयागसामान्यपरत्वे विकृतौ पौनरुक्त्यापत्तेः सर्व्वप्रकृतिविषयत्वमेवास्य निर्णीतमितिभावः ।

श्रुतिलिङ्गवाक्यप्रकरणेत्यादिसूत्रे प्रकरणादीनां वाक्यपरभूततया वाक्याद्दुर्ब्बलत्वाभिधानादाह तदिदं वाक्यमिति । अतएव प्रकरणादिभ्यो वाक्यस्य बलत्त्वादेव । इन्द्राग्नीइति । अत्रायमाशयः । दर्शपौर्णमासयोः श्रूयते । सूक्तवाकेन प्रस्तरं प्रहरतीति । अत्र प्रस्तरो दर्भमुष्टिस्तस्य प्रहरणमग्नौ प्रक्षेपइति न्यायमाला । तस्मिंश्च सूक्तवाके वाक्यद्वयं श्रूयते । यथा अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातामिति । तथा इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्रातमिति । अत्र अग्नीषोमाविदं हविरित्यादि वाक्यं पौर्णमासयागकाले विनियोक्तव्यं पौर्णमासदेवताप्रतिपादकत्वात् । इन्द्राग्नी इदं हविरित्यादिवाक्यन्तु दर्शयागकाले विनियोक्तव्यं दर्शदेवताप्रकाशकत्वात् । एकैकवाक्यस्यापि सूक्तवाचकत्वात् विभज्य विनियोगो न दोषाय । नतु प्रकरणादुभयत्रापि वाक्यद्वयविनियोगइति तृतीयाध्यायद्वितीयपादे सिद्धान्तितम् ।

तत्र संशयः । किममावास्यायामिन्द्राग्नी इदं हविरित्यादि समग्रमन्त्रं पठित्वा अग्नीषोमाविदं हविरित्यादिमन्त्रस्य अग्नीषोमपदपरित्यागेनावशिष्टमिदं हविरित्यादि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पदजातमपि पठनीयम्। तथा पौर्णमास्यामग्नीषोमाविदं हविरित्यादि समग्रमन्त्रं पठित्वा इन्द्राग्नी इदं हविरित्यादिमन्त्रस्य इन्द्राग्निपदपरित्यागेनावशिष्टमिदं हविरित्यादिपदजातमपि पठनीयम्। तथासत्यन्यदेवतावोधकपदस्यान्यदेवतायागे विनियोगः परिहृतः स्यात्। स्याच्च द्वयोरेव मन्त्रयोरुभययागाङ्गत्वप्रतिपादको दर्शपौर्णमासप्रकरणपाठः समाहितः। यतः पौर्णमासयागीयप्रसरप्रहरणेपि मन्त्रद्वयस्य पाठो दर्शयागीयप्रसरप्रहरणेपि मन्त्रद्वयस्य पाठः सिध्यति। परन्तु पौर्णमास-यागे इन्द्राग्नी इदं हविरित्यादिमन्त्रस्य इन्द्राग्निपदमात्रपरित्यागस्तथा दर्शयागेपि अग्नीषोमाविदं हविरित्यादिमन्त्रस्य अग्नीषोमपदमात्रपरित्याग इति विशेषः।

अथवा अग्नीषोमावित्यस्य इन्द्राग्नी इत्यस्य च इदं हविरित्याद्यवशिष्टांशेनान्वित-तया एकवाक्यतापन्नत्वेन एकांशपरित्यागेनावशिष्टांशस्य विनियोगासम्भवाद्वाक्य-विरोधेन एकैकसमग्रमन्त्रस्य एकैकयागे विनियोग एव शास्त्रार्थः। इत्येवं वाक्यप्रकरणयोः समवाये वाक्यं बलवत्। प्रकरणन्तु दुर्ब्बलम् अर्थविप्रकर्षात्। तथाहि दर्शे अग्नीषोमाविदं हविरित्यादिमन्त्रस्य इदं हविरित्याद्यंशमात्रे पठ्यमाने अजुषेतामित्यादीनां कर्त्तृपदसाकाङ्क्षतया प्रकरणेन प्रथमं तावदिन्द्राग्निपदान्वयरूपं वाक्यकल्पनम्। तेन वाक्येन इन्द्राग्निप्रकाशनसामर्थ्यरूपं लिङ्गं कल्पनीयम्। तच्च लिङ्गमनेन मन्त्रभागेन इन्द्राग्निविषया क्रियानुष्ठेयेति विनियोजिकां श्रुतिं कल्पयति। एवं पौर्णमासे इन्द्राग्नी इदं हविरित्यादिमन्त्रस्य इदं हविरित्याद्यंश-मात्रे पठ्यमाने अजुषेतामित्याद्याकाङ्क्षानिवृत्तये प्रकरणेन अग्नीषोमपदान्वयरूप वाक्यकल्पनम्। तेन लिङ्गकल्पनम्। तेन विनियोजकश्रुतिकल्पनमिति। अतः प्रकरणविनियोगयोर्मध्ये त्रिभिर्व्यवधानम्। अग्नीषोमादिपदसहितं समग्रवाक्यन्तु श्रूयमाणतया कल्पनीयत्वाभावेन लिङ्गश्रुती एव कल्पयित्वा विनियोगमवगमयतीति बलवता वाक्येन विप्रकृष्टार्थस्य प्रकरणस्य बाधितत्वात् अग्नीषोममन्त्रस्य पौर्णमासयागे इन्द्राग्निमन्त्रस्य दर्शयागे इति विभज्य विनियोग एव कर्त्तव्य इति। एवमेव न्यायमाला। एवञ्च इन्द्राग्नी इदं हविरित्यादेरेकवाक्यत्वाद्दर्शाङ्गत्वं न तु प्रकरणाद्दर्शपौर्णमासाङ्गत्वमित्येतन्मूलस्यायं वाक्यार्थः। इन्द्राग्नी इत्यादेः इन्द्राग्नी इत्यादिसमग्रमन्त्रस्य। एकवाक्यत्वात् परस्परान्वितत्वात्। अंशविशेषपरित्यागेन



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उभयाकाङ्क्षा प्रकरणम्। यथा प्रयाजादिषु समिधो यजतीत्यादौ वाक्ये फलविशेषस्यानिर्देशात् समिद्यागेन भावयेदिति बोधानन्तरं किमित्यस्त्युपकार्य्याकाङ्क्षा।

---

पाठे वाक्यत्वानुपपत्तेरितिभावः। दर्शाङ्गत्वं दर्शयागस्यैवाङ्गत्वम्। एवकारगर्भत्वात् न पुनरंशविशेषसाहित्यराहित्याभ्यां दर्शपौर्णमासोभययागाङ्गत्वमिति व्यवच्छिनत्ति नलिति। दर्शपौर्णमासाङ्गत्वमिति। इन्द्राग्नी इत्यंशविशेषसाहित्येन दर्शयागाङ्गत्वं तदंशराहित्येन पौर्णमासाङ्गत्वं प्रकरणबोधितमेवं नेत्यर्थः। इदमुपलक्षणम्। अग्नीषोमाविदं हविरित्यादेरेकवाक्यत्वात् पौर्णमासाङ्गत्वं, न तु प्रकरणाद्दर्शपौर्णमासाङ्गत्वमित्यप्युदाहार्य्यम्।

प्रकरणं लक्षयति उभयाकाङ्क्षेति। अङ्गाङ्गित्वेनाभिमतयोः परस्पराकाङ्क्षेत्यर्थः। उभयेतिकरणात् अन्यतराकाङ्क्षायाः प्रकरणत्वं न स्यादिति दर्शितम्। तेन दर्शपौर्णमासाभ्यां स्वर्गं भावयेदिति स्वर्गभावनायाः कथमित्याकाङ्क्षया अनिवृत्तौ पठितस्यापि अवगोरणाभावस्य न प्रकरणाद्दर्शपौर्णमासाङ्गत्वं "यो ब्राह्मणायावगुरेत् तं शतेन यातया"दित्यादिवाक्येन फलवत्त्वाभिधानात् दर्शपौर्णमासौ प्रति तस्याकाङ्क्षाविरहात्। एवं प्रकृतिवद्विकृतिरित्यतिदेशेन विकृतियागीयफलभावनायाः कथमित्याकाङ्क्षोपशमात् तदीयापूर्व्वाङ्गानामाकाङ्क्षासत्त्वेपि न प्रकरणादङ्गत्वं, किन्तु सान्निध्यरूपस्थानादेवेति सिध्यति। उभयाकाङ्क्षां प्रदर्शयति यथेति। फलविशेषस्यानिर्देशादिति। वाक्ये फलविशेषश्रुतौ प्रधानतैव स्यादत स्तदभावादङ्गत्वावश्यकतया उपकार्य्याकाङ्क्षा सम्भवत्येवेतिभावः। किमितीति। किं भावयेदित्युपकार्य्याकाङ्क्षाऽस्तीत्यन्वयः। उपकार्य्यस्य फलजननसमर्थीकर्त्तव्यस्य कस्यचित् प्रधानयागस्य भाव्यत्वेनाकाङ्क्षा अस्तीत्यर्थः। निष्फलतया समिद्यागेन अमुकयागं भावयेदिति प्रधानयागविशेषस्यैव भाव्यत्वावश्यकत्वात्। सन्निहितयागविशेषेणैव भावनान्वयादुपपत्तौ विश्वजिन्न्यायात् स्वर्गस्य भाव्यत्वकल्पनायां गौरवाच्चेति भावः। नन्वेवं विश्वजिता यजेतेत्यत्रापि तदव्यवहितपूर्व्वोपदिष्टयागविशेषस्यैव भाव्यत्वमस्तु अलमानुमानिकस्वर्गकल्पनयेति चेन्न। तदव्यवहितपूर्व्वोपदिष्टयागविशेषस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दर्शपौर्णमासवाक्येपि दर्शपौर्णमासाभ्यां स्वर्गं भावयेदिति बोधानन्तरं कथमित्यस्युपकारकाकाङ्क्षा । इत्थञ्चोभयाकाङ्क्षया प्रयाजादीनां दर्शपौर्णमासाङ्गत्वम् ।

तच्च प्रकरणं द्विविधं, महाप्रकरणमवान्तरप्रकरणञ्चेति । तत्र मुख्यभावनासम्बन्धिप्रकरणं महाप्रकरणम् । तेन च प्रयाजादीनां दर्शपौर्णमासाङ्गत्वम् । एतच्च प्रकृताविव, उभयाकाङ्क्षायाः सम्भवात् । न तु विकृतौ, तत्र प्रकृतिवद्विकृतिः कर्त्तव्येत्यतिदेशेन कथम्भावाकाङ्क्षाया उपशमेना-

---

कथम्भावनिवृत्तेर्विश्वजितम्प्रत्याकाङ्क्षाविरहेण उभयाकाङ्क्षारूपप्रकरणाभावात् । एवं तर्हि समिद्यागं प्रति कस्याकाङ्क्षा वर्त्तते यमुपकार्य्यमवगच्छाम इत्यत आह दर्शपौर्णमासवाक्येपीति । उपकारकाकाङ्क्षा यागस्वरूपोत्पादकेतिकर्त्तव्यताख्यव्यापाराकाङ्क्षा । अस्तीत्यनेनान्वयः । इत्थमिदम्प्रकारेण ।

प्रकरणं विभजति तच्चेति । महाप्रकरणं लक्षयति तत्रेति । तयोः प्रकरणयोर्मध्ये । मुख्येति । मुख्यभावना यागेन स्वर्गं भावयेदिति फलभावना । तत्सम्बन्धिप्रकरणं तत्सम्बन्धिनी उभयाकाङ्क्षा । तेन महाप्रकरणेन । दर्शपौर्णमासाङ्गत्वं प्रागुक्तप्रकारेण । एतच्चेति । महाप्रकरणमित्यर्थः । प्रकृताविव महाप्रकरणसद्भावे हेतुमाह उभयेति । विकृतौ तदसद्भावे हेतुमाह तत्रेति । उपशमेनेति । तथाच सौर्य्यं चरुं निर्व्वपेत् ब्रह्मवर्चसकाम इत्यत्र सूर्य्यदेवताकचरुनिर्व्वपणेन ब्रह्मवर्चसं भावयेदित्यत्र जायमानापि कथं भावयेदित्याकाङ्क्षा प्रकृतिवदित्यतिदेशादाग्नेयधर्म्मप्राप्त्यैव शाम्यति, न तु विध्यन्तरमुत्थापयतीतिभावः । अपूर्व्वाङ्गानामपीति । पूर्व्वस्मिन् प्रकृतावप्राप्तानि अपूर्व्वाणि तथाविधानामङ्गानां प्रयाजे कपालं जुहोतीत्यादिश्रुत्या सौर्य्ययागविशेषे विहितानां कपालहोमादीनामित्यर्थः । अपिकारादतिदेशप्राप्तप्राकृताङ्गानाञ्च । विनियोगासम्भवादिति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पूर्व्वाङ्गानामप्युभयाकाङ्क्षया विनियोगासम्भवात् । तस्माद-पूर्व्वाङ्गानां स्थानादेव विकृतार्थत्वमिति ।

अङ्गभावनासम्बन्धिप्रकरणमवान्तरप्रकरणम् । तेन चाभिक्रमणादीनां प्रयाजाद्यङ्गत्वम् । तच्च सन्दंशेनैव

---

तथाच प्राकृताङ्गानां विनियोगे अङ्गाङ्गिनोरुभयोरेवाकाङ्क्षाविरहः । अपूर्व्वाङ्गानां विनियोगे तु एकतरस्याङ्गिन एवाकाङ्क्षाविरह इत्युभयतोभयाकाङ्क्षाविरहस्य विशेषादुभयाकाङ्क्षाया न प्रयोजकत्वमितिभावः । ननु विकृतौ प्रकरणाभावेपि प्राकृताङ्गानामतिदेशादेव तदर्थत्वं सम्पद्यते । अपूर्व्वाङ्गानान्तु प्रकरणाभावे कुतस्तदर्थतासिद्धिरित्यत आह तस्मादिति । प्रकरणाभावादित्यर्थः । स्थानात् सान्निध्यात् ।

अवान्तरप्रकरणं लक्षयति अङ्गेति । अङ्गभावना अङ्गविधिबोधितभावना प्रयाजैरपूर्व्वं कृत्वा यागोपकारं भावयेदित्येवमादिरूपा । तत्सम्बन्धिप्रकरणं तत्सम्बन्धिनी उभयाकाङ्क्षा । तेन अवान्तरप्रकरणेन । अभिक्रमणं होमकाले आहवनीयमभितः सञ्चरणम् । होमकालेआहवनीयसमीपे वर्त्तनमिति यावत् । अतएव भाष्यकारैरभिहितम् । “अभिक्रमणेन समासीदति आहवनीयं कर्त्ता । इयमभ्यु-पायभूतं होमस्य । दूराद्वा अभिप्रसार्य्य हस्तम् जुहुयात् समासीदेद्वा अभिक्रमणेन । तस्मादभिक्रमणमुपकरोति होमस्येति ।”

ननु फलभावनायामेव कथम्भावाकाङ्क्षा नत्वङ्गभावनायामित्यवान्तरप्रकरणं न मन्तव्यमित्येकदेशिमतमेव साधीयः । अतएव शास्त्रदीपिकायां तन्मतं वर्णितम् ।

फलवद्भावनोद्भूतकथम्भावतिरोहिताः ।
नैवाङ्गानां कथम्भावः प्रादुःष्यन्ति तमन्तरा ॥

तं फलभावनाकथम्भावम् । नचावान्तरप्रकरणाभावे यो वै प्रयाजानां मिथुनं वेद स समिधो वन्नीरिव यजतीत्यादिश्रुतस्य प्रयाजानुवादेन विहितानामपि प्रयाजाङ्गता न स्यादाकाङ्क्षाविरहादितिवाच्यम् । अवान्तरप्रकरणाभावेपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तदिदं प्रकरणं क्रियाया एव साक्षाद्विनियोजकम्। द्रव्यगुणयोस्तु तद्द्वारा। तथाहि यजेत स्वर्गकाम इत्यत्र फलभावनायां सन्निधिपठिताश्रूयमाणफलकं क्रियाजातमुपकार्य्याकाङ्क्षयेतिकर्त्तव्यतात्वेनान्वेति। क्रियाया एव

---

आहवनीयमभिक्रामतीत्यत्र तदभावात्। तत्रापि तत्सद्भावे अनवस्थापत्तेरित्येतत् परिहरति नचेति। भावनासामान्येन अङ्गभावनाया मुख्यभावनातुल्यत्वेन द्वयोरेव भावनात्वाविशेषेणेतियावत्। तत्रापि अङ्गभावनायामपि। तत्सद्भावात् कथम्भावाकाङ्क्षासद्भावात्। तथाच प्रयाजैरपूर्व्वं कर्त्तुं योन जानाति तस्य कथमेभिरपूर्व्वं कर्त्तव्यमितिकथम्भावाकाङ्क्षा सम्भवत्येवेतिभावः। एतेन विधिबोधितकर्म्मणो लोकप्रसिद्धत्वे लोकादेव तत्प्रकारविशेषस्य ज्ञायमानतया तत्र कथम्भावाकाङ्क्षा जायमानापि लोकादेव शाम्यति। अलौकिकत्वेतु वेदमन्तरेण तत्प्रकारविशेषस्य ज्ञातुमशक्यतया मुख्यभावनायामिवाङ्गभावनायामपि कथम्भावाकाङ्क्षा अवश्यमेव भवति शाम्यतिच वेदवाक्यान्तरसमर्पितप्रकारविशेषप्रतिपत्त्येति सिध्यति। एवञ्चाभिक्रमणस्य आहवनीयसमीपगमनरूपस्य लौकिककर्म्मत्वेन प्रकारविशेषस्य लोकादेवज्ञेयतया न तत्र कथम्भावाकाङ्क्षा स्थातुमर्हतीति। अतो नानवस्थापत्तिः।

प्रकरणस्य विनियोगविषयं दर्शयति तदिदमिति। क्रियाया एवेति। तस्मात् क्रियात्मकमङ्गमेव साक्षात् प्रकरणविनियोज्यमितिभावः। क्रियाया एवेत्येवकारेण द्रव्यगुणयोः परम्पराविनियोजकत्वं सूचितम्। तच्च द्वारमुपदर्शयति द्रव्यगुणयोस्त्विति। तद्द्वारा क्रियाद्वारेण। क्रियायाः साक्षाद्विनियोजकत्वं प्रकरणस्योपपादयति तथाहीति। फलभावनायां यागेन स्वर्गं भावयेदित्येवंरूपायाम्। कथम्भावाकाङ्क्षायामिति। करणीभूतस्य यागस्यालौकिकव्यापारतया केन प्रकारेण यागेन स्वर्गं भावयेदिति कर्म्मणः प्रकारविशेषजिज्ञासाया आवश्यकत्वादितिभावः। फलवत् सन्निधावफलं तदङ्गमित्युक्तेः। अविच्छिन्ने कथम्भावे यत् प्रधानस्य पठ्यते। अविज्ञातफलं कर्म्म तस्य प्रकरणाङ्गतेत्युक्तेश्च सन्निहिताश्रूयमाणफलककर्म्मण एवाङ्गत्वौचित्यादाह सन्निधीति। उपकार्य्याकाङ्क्षयेति। एतेन उभयाकाङ्क्षारूपं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



लोके कथम्भावाकाङ्क्षायामन्वयदर्शनात् । न हि कुठारेण च्छिन्द्यादित्यत्र कथम्भावाकाङ्क्षायामुच्चार्य्यमाणोपि हस्तो-ऽन्वेति । किन्तु हस्तेनोद्यम्य निपातयेदिति उद्यमननिपातने एव । हस्तश्च तद्द्वारैवान्वेतीति सार्व्वजनीनमेतत् ।

इदञ्च स्थानादिभ्यो वलवत् । अतएवाक्षै र्दीव्यति राजन्यमिति देवनादयो धर्म्मा अभिषेचनीयसन्निधौ पठिता अपि स्थानान्न तदङ्गम् । किन्तु प्रकरणाद्राजसूयाङ्गमिति ।

---

प्रकरणं साधितम् । इतिकर्त्तव्यतात्वेन कर्म्मणः प्रकारविशेषत्वेन । ननु क्रिया-जातस्यैव सन्निहिताश्रूयमाणफलकद्रव्यगुणयोरपि कुतो नान्वय इत्यत आह क्रियाया एवेति । एवकारेण द्रव्यगुणयोर्द्वारीभूतक्रियाविशेषमन्तरेणान्वयस्य लोकादृष्टत्वं द्योत्यते । तदेव समर्थयति नहीति । अन्वेतीत्यनेनान्वितम् । कथम्भावा-काङ्क्षायां कुठारेण द्वैधीभावं भावयेदित्यत्र कथं भावयेदिति जिज्ञासायाम् । उच्चार्य्यमाणोपि हस्तेनेत्येवं प्रयुज्यमानोपि । यदि हस्तो नान्वेति तर्हि किमन्वयी-त्यत आह किन्त्विति । निपातयेदिति । इति एतत् पदद्वयप्रतिपाद्ये । उद्यमन-निपातने इति । अन्वित इति द्विवचनविपरिणामेणानुषङ्गः । तद्द्वारेण उद्यमन-निपातनरूपक्रियाद्वारेण । अन्वेतीत्यनुषङ्गः । सार्व्वजनीनं सर्व्वलोकसिद्धम् । एवञ्च व्रीहिभिर्यजेतेत्यत्रापि व्रीहेर्न साक्षादन्वयः । किन्तु व्रीहिभि पुरोडाशं निर्म्मायेति पुरोडाशकरणक्रियाद्वारैवेति सिद्धम् ।

प्रकरणस्य स्थानादितो वलवत्त्वमित्याह इदञ्चेति । उदाहरणप्रदर्शनायाह अतएवेति । स्थानादितो वलवत्त्वादेवेत्यर्थः । अक्षैर्दीव्यतीति । अत्रायमाशयः । अस्ति राजसूयो नाम यज्ञविशेषः । तत्र पशुयागा इष्टिः सोमयागाश्चेति वहवः प्रधानयागाः सन्ति । तत्राभिषेचनीयाख्यः कश्चित् सोमयागोपि विहितः । तत्सन्निधौ देवनादयो धर्म्माः समाम्नाताः । यथा अक्षैर्दीव्यति, राजन्यं जिनाति, शौनः शेफं समाख्यापयतीति । जिनाति जयति । शौनः शेफं शुनः शेफमुनि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**देशसामान्यं स्थानम् । तत् द्विविधं पाठसादेश्यमनुष्ठानसादेश्यञ्चेति । स्थानं क्रमश्चेत्यनर्थान्तरम् । पाठसादेश्यमपि**

---

विषयकमुपाख्यानं बह्वृचब्राह्मणे समाम्नातमिति माधवाचार्य्याः । तत्र संशयः । किं सन्निधिरूपस्थानात् विदेवनादयो अभिषेचनीयार्था: । उत प्रकरणाद्राजसूयगतपशुयागादिसर्व्वयागार्था इति । तत्र प्रकरणस्य स्थानादितो बलवत्त्वेन राजसूयगतसर्व्वयागार्था एव विदेवनादय इति निर्णीयते । तथाहि कृत्स्नाया-मनुवर्त्तमानायां राजसूयकथम्भावाकाङ्क्षायां पठिता विदेवनादयो महाप्रकरणेन राजसूयाङ्गतामर्हन्ति । अभिषेचनीयस्य तु सोमयागत्वेन ज्योतिष्टोमविकृतितया प्राकृतैरेवाङ्गैर्निराकाङ्क्षीकृतत्वात् तेषां तदङ्गत्वानुपपत्तेः । सन्निहितविधिबलात् अभिषेचनीयकथम्भावाकाङ्क्षारूपावान्तरप्रकरणपरिकल्पनापेक्षया कृत्स्नमहाप्रकरणस्य सन्निकृष्टत्वाच्च । ननु राजसूयगतानां पश्वादियागानामपि विकृतितया निराकाङ्क्षत्वात् कथं देवनादीनां तदङ्गत्वं सम्भवतीति चेन्न । प्रातिस्विकरूपेण निराकाङ्क्षत्वेपि राजसूयरूपेण साकाङ्क्षत्वात् । अतएव राजसूयाय ह्येना उत्पुनाति राजसूयेनेजानः सर्व्वमायुरेतीत्याद्यङ्गविधयः सङ्गच्छन्ते । तद्वद्देवनादयोपि तदङ्गान्येव न तु अभिषेचनीयस्याङ्गानीति सिद्धम् ।

क्रमप्राप्तं स्थानं निरूपयति देशसामान्यमिति । समानदेशत्वमित्यर्थः । स्थानं विभजति तदिति । द्वैविध्यमुद्दिशति पाठेति । पाठमात्रावगतसमानदेशवर्त्तित्वमित्यर्थः । अनुष्ठानेति । एकस्मिन् देशे अनुष्ठेयत्वेन निर्द्दिष्टत्वमित्यर्थः । उक्तं वार्त्तिककृद्भिः ।

तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः ।
पाठानुष्ठानसादेश्याद्विनियोगस्य कारणम् ॥

ननु "क्रमश्च देशसामान्या"दिति सूत्रेण क्रमस्य समानदेशत्वमुक्तम् । भाष्यवार्त्तिककाराभ्यामपि क्रमस्यैव तथाविधलक्षणत्वमभिहितम् । तत् कथं स्थानं देशसामान्यत्वेन लक्षयसीत्यत आह स्थानं क्रमश्चेतीति । अनर्थान्तरं पदार्थान्तरं न भवति एकपदार्थ एवेत्यर्थः । अतएव



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



द्विविधं सन्निधिपाठो यथासङ्ख्यपाठश्चेति । तत्रैन्द्राग्नमेकादशकपालं निर्व्वपेत् । वैश्वानरं द्वादशकपालं निर्व्वपेदित्येवंक्रमविहितेषु इन्द्राग्नी रोचनादिव इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासंख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमित्येवंरूपो विनियोगो यथासङ्ख्यपाठात् । प्रथमपठितमन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्म्मैव

---

श्रुतिर्द्वितीया चमता च लिङ्गं वाक्यं पदान्येव तु संहतानि ।
सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगवलं समाख्या ।

इत्यत्र स्थानस्य क्रमत्वेन व्याख्यानं संगच्छते । यद्यपि वार्त्तिके पाठसादेश्यस्य विभागो नकृत स्तथापि भाष्ये क्रमस्य देशसामान्यादित्येतत्सूत्रव्याख्याने पाठसादेश्यस्य यथासङ्ख्यपाठ उदाहृतः । विरोधाधिकरणे तु क्रमसमाख्ययोर्विरोधे सन्निधिपाठ उदाहृत इत्युभयविधपाठसादेश्यस्य भाष्याभिमतत्वं मन्वानः पाठसादेश्यं द्वैविध्येन विभजति पाठसादेश्यमपीति । अतएव शास्त्रदीपिकान्यायमालयोरपि क्रमस्य त्रैविध्यमङ्गीकृतम्, यथासङ्ख्यपाठसादेश्यसन्निधिपाठसादेश्यानुष्ठानसादेश्यभेदात् । स्थानविनियोगं प्रदर्शयिष्यन् क्रमप्राप्तस्य पाठसादेश्यस्य शास्त्रदीपिकादिसम्मत प्रथमविभागं यथासङ्ख्यपाठमुदाहरति तत्रेति । तेषु स्थानविभागेषु मध्ये । क्रमविहितेषु क्रमेणाभिहितेषु कर्म्मसु । इत्यादीनाम् इन्द्राग्नीरोचनादिवः प्रवर्षणिभ्य इत्यादि, इन्द्राग्नी नवतिः पुरः श्नथद्वृत्रा इत्यादि च यन्मन्त्रयुगलं तदादीनाम् । याज्यानुवाक्यामन्त्राणामिति । तेषु कश्चित् याज्याख्योमन्त्रः कश्चिन्नानुवाक्याख्योमन्त्र इत्यर्थः । प्रथमस्य प्रथमयुगलस्य । अतएव तन्मन्त्रयुगलमभिधाय "पूर्व्वं युगलं पूर्व्वस्य ऐन्द्राग्नस्य उत्तरमुत्तरस्ये ति भाष्यम् । यद्यपि शास्त्रदीपिकान्यायमालादावन्यदुदाहरणमुपन्यस्तं तथापि भाष्यकारसम्मतत्वात् ग्रन्थकृता एतदुदाहृतम् । यथासङ्ख्यपाठाद्विनियोगे युक्तिमाह प्रथमेति । हि यस्मात् । कैमर्थ्येति । किमर्थत्वरूपाकाङ्क्षायाम् । अयं मन्त्रः कमुपकुर्य्यादित्येवं रूपायामाकाङ्क्षाया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पशुधर्म्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात् । औपवसथ्येऽह्नि अग्नीषोमीयः पशुरनुष्ठीयते । तस्मिन्नेव दिने ते धर्म्माः पठ्यन्ते । अतस्तेषां कैमर्थ्याकाङ्क्षायामनु-

---

विकृतापूर्व्वं भावयेदिति वीधादितिभावः । उपस्थितत्वादिति । सन्निहितत्वेनेति-भावः । ननु तेषां प्रधानकर्म्मतैव स्वीक्रियतां कल्प्यताञ्च विश्वजिन्न्यायात् स्वर्गः फलमित्यत आह स्वतन्त्रेति ।

अनुष्ठानसादेश्यमुदाहरतिपश्विति । अयमाशयः । ज्योतिष्टोमे एयः पशवः समाम्नाताः । अग्नीषोमीयः सवनीयो अनुबन्ध्यश्चेति । तत्राग्नीषोमीय औपवसथ्य-नामके अहनि विहितः । यो दीक्षितो यदग्नीषोमीयं पशुमालभेतेति श्रुतेः । तदुत्तरञ्च सौत्ये अहनि सवनीयः समाम्नातः । आश्विनग्रहम् गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोतीति श्रुतेः । अनुबन्ध्यस्त्ववभृथान्ते समाम्नातः । औपवसथ्ये अहनि पशुधर्म्माः श्रूयन्ते । तेच उपाकरणं, पर्य्यग्नि-करणम्, उपानयनं, बन्धो, यूपे नियोजनं, सञ्ज्ञपनं विशसनमित्येवमादयः । इति भाष्यन्यायमालाकारादयः । उपाकरणं प्रजापतेर्जायमाना इमं पशुमित्याभ्यां सञ्ज्ञां पशोरुपस्पर्शनम् । दर्भज्वालया त्रिःप्रदक्षिणीकरणं पर्य्यग्निकरणमिति माधवाचार्य्याः । महाप्रकरणात् ज्योतिष्टोमाङ्गत्वेन प्राप्ता अपि पशुधर्म्मा स्तस्य सोमयागतया अभिषवादिधर्म्मसाकाङ्क्षत्वेन उपाकरणादौ पशुधर्म्मे निराकाङ्क्ष-त्वात् तदङ्गपशुयाग एवान्वीयन्ते । तर्हि अविशेषात् त्रिष्वपि पशुषु पशुधर्म्मा अवतिष्ठन्तामिति पूर्व्वपक्षः । तथाच तृतीयाध्यायषष्ठपादे पूर्व्वपक्षसूत्रम् ।

तुल्यः सर्व्वेषां पशुविधिः प्रकरणाविशेषादिति ।

एवं प्राप्ते उच्यते । अस्त्यत्र विशेषः सान्निध्यरूपः । तथाहि सौत्यनामकादङ्गः पूर्व्वत्र औपवसथ्यनामके अह्नि धिष्ण्यनिर्म्माणादूर्द्ध्वमेते पशुधर्म्मा आम्नाताः । अग्नीषोमीयपशोरपि तदैव स्थानमित्यनुष्ठानसमानदेशत्वम् । सवनीयस्य सौत्याहविहिततया अनुबन्ध्यस्यापि अवभृथान्तविहिततया दिनान्तरानुष्ठेयत्वेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पौरोडाशिकसमाख्यायां हि प्रकृतिः पुरोडाशमभिधत्ते । तद्धितप्रत्ययेन च काण्डम्, नचैतयोः सम्बन्धः केनचिदभिधीयते । यथोक्तम् ।

पाकं हि पचिरेवाह कर्त्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्त्ता वाच्योनैकस्य कस्यचिदिति ॥

तयोः समभिव्याहारादेव परस्परयोगः कल्पयितव्यः । तथाहि क्रतुच-पुरोडाशपात्रसन्निधिर्नप्रत्यक्षो भवति । किन्त्वर्थापत्त्या कल्प्यते । यद्युक्तः सन्निधिर्नस्यात् तदा मन्त्रप्रतिपादकग्रन्थस्य पौरोडाशिकसमाख्या न स्यादिति । तस्मात् काण्ड-समाख्यया सन्निधिं परिकल्प्य तदन्यथानुपपत्त्या परस्पराकाङ्क्षारूपं प्रकरणं कल्पयित्वा तद्द्वारेण वाक्यलिङ्गश्रुतीश्च कल्पयित्वा तया श्रुत्या विनियोगो वाच्य इति समाख्याया अर्थविप्रकर्षः । सान्नाय्यपात्रशुन्धने मन्त्रस्य सन्निधिस्तु यथा-सङ्ख्यपाठात् प्रत्यक्ष एव । तेन प्रत्यक्षसन्निधिना प्रकरणादीनां चतुर्णामेव कल्पनात् सन्निधिः सन्निकृष्यते । तस्मात् क्रमेण समाख्यां बाधित्वा सान्नाय्य-पात्रशुन्धन एव मन्त्रोविनियुज्यते इति सिद्धम् । यद्यपि श्रुतिलिङ्गादीनामेकैक-विरोधोदाहरणमेव ग्रन्थकृता प्रदर्शितम् तथापि श्रुतेर्वाक्यादिभिश्चतुर्भिर्लिङ्गस्य प्रकरणादिभिस्त्रिभिर्वाक्यस्य च स्थानसमाख्याभ्यां द्वाभ्यां विरोधे बलवत्त्वोदा-हरणानि तन्त्रवार्त्तिके अनुसन्धेयानि ।

ननु श्रुत्यादिभि लिंङ्गादयो बाध्यन्त इत्युक्तं तत्र कीदृशोऽयं बाधः प्राप्तबाधो-ऽप्राप्तबाधो वा । नाद्यः । प्रवृत्तस्य निवृत्त्यवत्बाधानुपपत्तेः । नापि द्वितीयः । अप्राप्तस्य बाधासम्भवात् । तस्माद्बाध एव नायमिति चेत् । उच्यते । प्राप्तत्वं व्यवहार्य्यतया प्रमाणविशेषप्रतीतत्वम् । नत्वत्यन्तप्रवृत्तत्वम् । अनुष्ठानरूपफल-पर्य्यवसानाभावात् । अप्राप्तत्वं व्यवहार्य्यतया प्रमाणविशेषाप्रतीतत्वम् । बाधो नाम व्यवहारप्रतिबन्धः । प्राप्तबाधस्तु व्यवहार्य्यतया प्रमाणप्रतिपन्नार्थस्य व्यवहार प्रतिबन्धनम् । अप्राप्तबाधो व्यवहार्य्यत्वेन प्रमाणाप्रतिपन्नस्य व्यवहारप्रतिबन्धनम् । एवञ्च श्रुत्यादिभि लिंङ्गादिप्रतीतार्थव्यवहारनिवारणमप्राप्तबाध एव । प्रथमतो लिङ्गादिदर्शनेनार्थविशेषप्रतिपत्तावपि श्रुत्यादिभिस्तत्र तत्र लिङ्गादीनां प्रमाणा-भासीकृतत्वेन तत्प्रतीतार्थस्य प्रमाणप्रतीतत्वाभावेन तद्व्यवहारनिवारणस्य

For Private And Personal

प्राप्तबाधत्वासम्भवात् । लिङ्गादिप्रतीतार्थस्य बाधात् लिङ्गादीनामपि बाध्यत्वव्यपदेशः । ये तु शास्त्रप्रदेशेषु प्राकृतस्य वैकृतेन, सामान्यस्य विशेषेण, परशाखाविहितस्य स्वशाखाविहितेनेत्यादयो बाधास्ते प्राप्तबाधा एव । तथाहि तत्प्रापकस्य अतिदेशादेः प्रमाणस्य प्रमाणान्तरेण प्रमाणाभासीकरणासम्भवात् । प्रमाणप्रतीतार्थे व्यवहारस्यैव प्रतीतेर्भ्रान्तित्वकल्पनया निरोधो न तु प्रमाणस्याप्रमाणत्वकल्पनया प्रमाणप्रतीतार्थव्यवहारस्य । तथाचोक्तम् ।

सामान्यकारणात् प्राप्तं पूर्व्वं बाधकगोचरम् ।
बाधकेन बलीयस्त्वान्मृषैतदिति कल्प्यते ॥

न च तत्रापि वैकृतशरादिना अतिदेशादिप्रमाणमप्रमाणीक्रियतां येन प्राकृतकुशादेः प्रमाणप्रतीतार्थवैपरीत्यम् स्यादिति वाच्यम् । अतिदेशस्याप्रमाणत्वे कुशमयबर्हिष इवाङ्गान्तरस्यापि विकृतावसम्बन्धापत्तेः । यदि जुहोतीत्यनेन आहवनीये जुहोतीत्यस्याप्रमाणीकरणे होमान्तरेष्वाहवनीयाप्राप्तिः । परशाखाविधीनामप्रामाण्ये चाकाङ्क्षितानामप्यनन्वयानुपपत्तेः । श्रुत्या यत्र लिङ्गमप्रमाणी क्रियते यथा गार्हपत्यश्रुत्या ऐन्द्रलिङ्गम् । तल्लिङ्गं तत्रैव प्रमाणत्वेनोपस्थितं मन्त्रमन्यत्रापि तस्य विनियोजकत्वमस्तीति तस्यात्यन्तिकमेवाप्रामाण्यम् । एवं लिङ्गादिना वाक्यादिप्रतीतार्थबाधेपि । श्रुत्यादिरूपबाधकाभाववति स्थलान्तरे तु अन्यस्यैव लिङ्गादेर्विनियोगप्रमाणत्वं न तु बाधकबलीयलिङ्गादेरिति द्रष्टव्यम् । न चैकस्य बाधस्य द्वैरूप्यप्रसङ्ग इति वाच्यम् । बाध्यभेदेन प्रामाणिकद्वैरूप्यव्यवहारस्यादोषत्वात् । तथाचोक्तम् ।

न बाधस्यैकरूपत्वमेषितव्यं नियोगतः ।
न किञ्चिद्विरुध्यतीह नानारूप्यं प्रमाणवत् ॥

भाष्यकृतातु बाधस्यैकरूप्यमेव साधितम् । वार्त्तिककारादिभिरेव द्वैरूप्यमङ्गीकृतम् । एवं प्रत्यक्षेणानुमानं, यथार्थज्ञानेन भ्रान्तिज्ञानं, प्रत्यक्षाद्यनुपलब्धिपर्य्यन्तैः षड्भिः प्रमाणैः प्रमाणाभासः, श्रुत्या स्मृतिः, शास्त्राविगीतस्मृत्या अनाप्तविगीतस्मृतिः, अदृष्टार्थया स्मृत्या दृष्टार्था स्मृतिः, श्रुतिप्रभवया लिङ्गादिप्रभवया अर्थवादप्रभवया च स्मृत्या आचारः, सोप्यभियुक्ततराचारेण, सन्दिग्धमसन्दिग्धेन, दुर्ब्बला-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



होतुश्चमसेन सह सम्बन्धस्य भक्षणनिमित्तत्वात् चमसेषु भक्षणमस्त्येव। कुतः समाख्यानात् चमसशब्दस्य भक्षणपात्रत्वेन यौगिकत्वात्। तथाहि चमिर्भक्षणार्थस्तस्मात् चमति भक्षयत्यस्मिन्नित्यौणादिकोऽसच् प्रत्ययः। अस्य यौगस्य वैदिकशब्दमात्रोपयोगितया भक्षणाधिकरणबोधकश्चमसशब्दो वैदिकी समाख्या। यूपपोडशिग्रहादिशब्दवत् चमसशब्दोपि वैदिक एव न लोकव्यवहारोपयोगी। नहि चमसादिनामानः केचित् पदार्था लोकव्यवहारार्थं विद्यन्ते। तयाच समाख्यया होतुर्भक्षणाधिकरणत्वावगमात् भक्षणं प्रतीयते। ननु चमससमाख्यया भक्षणमेव प्रतीयते न सोमस्येति चेन्न। सोमचमस इति समाख्याया अपि श्रवणात्। तया हि सोमभक्षणपात्रता प्रतीयते। इयञ्च समाख्या लौकिकी। इत्यञ्च वैदिकलौकिकसमाख्याभ्यां होतृकर्तृकभक्षणपात्रत्वं सोमकर्म्मकभक्षणपात्रत्वञ्चेत्यवधारणात् होतुश्चमसस्थितसोमभक्षणोपयोगित्वं सिध्यतीति। अतएव स यदि राजन्यम् वैश्यं वा याजयेत् स यदि सोमं न बिभक्षयिषेत् न्यग्रोधस्तिभीराहृत्य ताः सम्पिष्य दधनि उन्मृज्य तमस्मै भक्ष्यम् प्रयच्छेत् न सोममिति भाष्यधृतश्रुत्या अब्राह्मणयाजने सोमभक्षणप्रतिषेध उपपद्यते।

लौकिकसमाख्योदाहरणमाह अध्वर्य्योरिति। तत्तत्पदार्थाङ्गत्वं यजुर्वेदविहितकर्म्मानुष्ठातृत्वम्। लौकिक्याइति। अध्वर्य्योः कर्म्म आध्वर्यवमिति कर्म्मार्थतद्धितप्रत्ययस्य वैदिकलौकिकोभयशब्दनिष्पादनोपयोगितया तन्निष्पादितशब्दस्य लौकिकसमाख्यात्वम्। वैदिकशब्दमात्रनिष्पादनोपयोगिप्रत्ययनिष्पन्नस्यैव वैदिकसमाख्यात्वात्। अत्रायमाशयः। याज्यापुरोऽनुवाक्यपाठादयो धर्म्मा ऋग्वेदे प्रोक्ताः। दोहननिर्वापादयो यजुर्वेदे। आज्यस्तोत्रपाठादयः सामवेदे। तत्र अस्यैव ऋत्विज एते धर्म्मा इति नियामकाभावात् येन केनचिद्दृत्विजा यः कश्चिद्धर्म्मोऽनुष्ठेय इत्यनियमः प्राप्नोति। तथा हौत्रमाध्वर्यवमौद्गात्रमिति समाख्याश्च श्रूयन्ते। ताभिश्च लौकिकसमाख्याभिः ऋग्वेदिना ऋत्विजा कर्त्तव्यं हौत्रम्। यजुर्वेदिना ऋत्विजा कर्त्तव्यमाध्वर्यवम्। सामवेदिना ऋत्विजा कर्त्तव्यमौद्गात्रमित्येव प्रतीयते नतु तत्तत्कर्म्मस्वरूपम्। अत आकाङ्क्षावशात् ऋग्वेदोक्तं कर्म्म हौत्रम्। यजुर्वेदोक्तं कर्म्म आध्वर्यवम् सामवेदोक्तं कर्म्म औद्गात्रमिति तत्तत् कर्म्म तेन तेन कर्त्तव्यमिति



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म्म आरादुपकारकम् । यथा प्रयाजादि । आरादुपकारकञ्च परमापूर्व्वोत्पत्तावेवोपयुज्यते । सन्निपत्योपकारकन्तु द्रव्यदेवतासंस्कारद्वारा यागस्वरूपेप्युपयुज्यते । इदमेवचाश्रयिकर्म्मेत्युच्यते । तदेवं निरूपितः संक्षेपतो विनियोगविधिः ।

---

अत्रायमाशयः । यागाङ्गपश्वादिद्रव्योद्देशेन अग्निप्रक्षेपविधानादग्निप्रक्षेपस्य गुणकर्म्मत्वम् । द्रव्यद्वारा यागशरीरघटकतया यागजन्यापूर्व्वोपयोगित्वेन सन्निपत्योपकारकत्वमपि वाच्यम् । देवताया इदं भवतु न ममेदमित्याकारकत्यागस्य यागरूपत्वेपि त्यज्यमानहविषोऽग्निप्रक्षेपमन्तरेण होमरूपस्य पश्वादियागस्य तदपूर्व्वस्यचानिष्पत्तेरग्निप्रक्षेपस्य द्रव्यद्वारेण तद्यागनिष्पादकता तदपूर्व्वनिष्पादकताच मन्तव्या । तच्च न दृष्टमात्रार्थम् अग्निप्रक्षेपस्यादृष्टप्रयोजनकत्वसत्त्वात् । नापि अदृष्टमात्रार्थम् अमुकदेवतायै स्वाहेत्यग्निप्रक्षेपवेलायां देवताया उद्देशसम्भवात् देवतास्मरणस्य दृष्टप्रयोजनस्य सिद्धेः । तस्मादंशभेदेन दृष्टार्थत्वमदृष्टार्थत्वञ्च न्याय्यमिति ।

आरादुपकारकं लक्षयति द्रव्येति । तदुदाहरति यथेति । आरादुपकारकस्य सन्निपत्योपकारकात् वैलक्षण्यं दर्शयति आरादुपकारकञ्चेति । परमापूर्व्वोत्पत्तावेवेत्येवकारेण दृष्टार्थद्वारकत्वमस्य निराकृतम् । दृष्टार्थद्वारा परमापूर्व्वोत्पत्त्युपयोगित्वन्तु सन्निपत्योपकारकस्यैवेत्याह सन्निपत्योपकारकन्त्विति । द्रव्यदेवतेति । द्रव्यद्वारा अवघातादेः । देवतास्मरणद्वारा उद्देशस्य । संस्कारद्वारा प्रोक्षणादेः । यागस्वरूपेपीति । यागस्वरूपसम्पादनेपीत्यर्थः । अपिकारात् तद्द्वारा परमापूर्व्वोत्पत्तावपीति लभ्यम् । इदमेव सन्निपत्योपकारकमेव चकार इतिकारानन्तरमन्वितः । आश्रमिकर्म्म इति च उच्यते इत्यन्वयः । द्रव्यादिरूपाश्रयविशिष्टमाश्रयि तादृशं कर्म्मेत्यर्थः । विनियोगविधिनिरूपणमुपसंहरति तदेवमिति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**सहकृतमिति साहित्यव्यवहाराभावात् । सचाविलम्बो नियते क्रमे आश्रीयमाणे भवति । अन्यथा किमेतदनन्तर-**

---

सहकृतमेतत् कर्म्म कर्त्तव्यमिति प्रतीते विलम्बेन तत्तत्कर्म्मानुष्ठाने तदनुपपत्तिरिति भावः। एतेनार्थापत्तिरेवाविलम्बे प्रमाणमिति दर्शितम् । विलम्बितानुष्ठाने सहकारिसहकृतत्वानुपपत्तौ हेतुमाह विलम्बेनेति। साहित्यव्यवहारेति। दिवारात्रिक्रियमाणयोर्भोजनयोरेकभोजनसहितमपरभोजनमित्यादिसाहित्यव्यवहारा-भावादित्यर्थः। एवञ्च यदि साहित्यानुपपत्तिबलेनैवाविलम्बकल्पनं तदाङ्ग-प्रधानयोरिव प्रधानानामप्याग्नेयादीनामविलम्बेनानुष्ठानं सिध्यति परस्पर-साहित्यप्रतीत्यविशेषादिति बोध्यम् ।

अविलम्बस्तु अप्रामाणिकवैधकर्म्मान्तराव्यवधानम्' । वैधेतिविशेषणात् पुरोडाशादितोमक्षिकापसारणादौ कृतेपि तथा अप्रामाणिकेति विशेषणात् क्षुतादावाचमने कृतेपि ना विलम्बहानिः। अतएव पूर्व्वेद्युरग्निं गृह्णाति उत्तरमहर्यजतीति श्रुतेरन्तरा सायंसन्ध्याद्यनुष्ठानं न दोषाय। प्रामाणिकत्वात्। एवं पौर्णमास्यनुष्ठितपौर्णमासयागदर्शानुष्ठितदर्शयागयोरेकायागत्वेपि न क्षतिः। ननु अप्रामाणिककालान्तराव्यवधानमविलम्बः। कालपदस्य क्षणपरत्वे असम्भवः। स्थूलकालपरत्वे तु प्रातरेकञ्च यागमारभ्य कतिचित् कर्म्माणि कृत्वा गृहान्तरे यजमानान्तरं याजयित्वा तद्यागसमापनेपि न क्षतिः स्यादित्यादिकमालोचनीयम् ।

ननु प्रयोगविधिना परस्परसाहित्यप्रतिपादनमुखेनाविलम्बविधानेपि किं प्रयाजाद्यनुष्ठानानन्तरमाग्नेयाद्यनुष्ठानमुताग्नेयाद्यनुष्ठानानन्तरमेव प्रयाजाद्यनुष्ठान-मित्यत्र विनिगमनाविरहः। उभयथाप्यविलम्बसम्पत्तेरित्यत आह सचेति। नियते क्रमे कर्म्मणां क्रमनियमे। आश्रीयमाणे अङ्गीक्रियमाणे। भवति सिद्धो भवति। क्रमानङ्गीकारे कुतोऽविलम्बासिद्धिरित्यत हेतुमाह अन्यथेति। क्रमा-नङ्गीकारे इत्यर्थः। प्रयोगविक्षेपः प्रयोगनानारूपत्वं। तथाच समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्युक्तप्रयाजानुष्ठान-वेलायां केनचित् समिद्यागानन्तरं तनूनपाद्यागमनुष्ठाय इडादियागः क्रियेत।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पूर्व्वपूर्व्वस्य सद्भावदशायामेवोत्तरोत्तरस्थापनं कर्म्मगणस्य तु पूर्व्वपूर्व्वध्वंसदशाया-मेवोत्तरोत्तरानुष्ठानमिति वैलक्षण्याद्विशेषपदम्। ननु तथाविधा विततिरङ्गप्रधाना-त्मककर्म्मसमुदायनिष्ठा नतु पदार्थनिष्ठा तत्तदेकैककर्म्मणः पदार्थपदव्यपदेश्यत्वात्। तत् कथं विततिरूपस्य क्रमस्य पदार्थविशेषणतया विधानमुक्तमित्यत आह क्रममन्यथा निर्व्वक्ति पौर्व्वापर्य्येति। पौर्व्वापर्य्यं कस्यचित् कर्म्मणः पूर्व्वकालकर्त्तव्यत्वं कस्यचिदपरकालकर्त्तव्यत्वम्। ननु पदार्थबोधकतत्तद्वाक्येषु क्वचित् क्वचित् क्रमः श्रूयते यथा वषट्कर्त्तुः प्रथमभक्ष इत्यादौ अध्वर्य्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारमित्यादौ च। नतु सर्व्वत्र। एवञ्च तत्तद्वाक्यैकवाक्यतापन्नः प्रयोगविधिः कथं सर्व्वपदार्थविशेषणतया क्रमं बोधयेत्। सहि यथाभिहितान्यङ्गानि समीक्ष्य प्रवर्त्तमानोनाधिकम् ब्रूते। इत्यत आह क्रमश्रुतिमन्तरेणापि क्रमः प्रमेय एव। श्रुतिवदन्येषामपि क्रमप्रमाणानां सद्भावादिति प्रतिपादयति तच्चेति। क्रमप्रतिपत्त्या-वित्यर्थः। षट् प्रमाणानीति। तथाच न केवलं श्रुतिरेव क्रमप्रमाणमर्थादीनामपि क्रमप्रतिपादकतया सर्व्वत्रैवान्यतमप्रमाणेन क्रमप्रतिपत्तिरावश्यकीति प्रयोगविधिना पदार्थमात्रस्य क्रमो विधीयत एवेतिभावः। अत्र षडिति सङ्ख्यानिर्द्देशात् क्रमप्रतिपत्तौ प्रमाणान्तराभावप्रतिपादनमुखेन षड्न्यतमप्रमाणाविषयत्वे क्रमप्रतिपत्ति-र्नास्तीति सूचितम्। यतः पञ्चमाध्यायप्रथमपादे श्रुत्यादीनां क्रमबोधकत्वप्रतिपादना-वसरे श्रुत्यर्थक्रमावुक्त्वा "अनियमोऽन्यत्रेति" सूत्रेण यत्र क्रमप्रतिपादकं प्रमाणं नास्ति तत्रानियम इति सिद्धान्तितम्। अतएव तत्सूत्रं यत्रोक्तवक्ष्यमाण-नियमकारणाभाव स्तत्रानियम एव क्रमस्येति व्याख्यातं पार्थसारथिमिश्रैः। तदुदाहरणं यथा। दर्शपौर्णमासयोर्य्यजमानकाण्डे प्रयाजानुमन्त्रणमन्त्रा आम्नाताः। वसन्तमृतूनां प्रीणामि, ग्रीष्ममृतूनां प्रीणामीत्यादयः पञ्च। तैर्यथाक्रमं समिदाद्या-मन्त्रणमस्त्विति चेन्न। तैत्तिरीयशाखायां वसन्तग्रीष्मवर्षाशरद्धेमन्तमन्त्राः पठिताः। शाखान्तरे तु व्यत्ययेनेति पाठक्रमासद्भावात्। मन्त्राणामदृष्टार्थतया वसन्तमन्त्रेण यस्य कस्यचित् प्रयाजस्यामन्त्रणेपि प्रयोजनहान्यसिद्धेरर्थक्रमस्याप्यसद्भावात्। प्रवृत्तिक्रमस्यासत्त्यानुरोधमूलकत्वेन अत्र च प्रत्यासत्त्यसद्भावेन यच्छाखागतेन मन्त्रेण समिदनुमन्त्रणं तच्छाखागतैरेव मन्त्रैः क्रमेण तनूनपादादयोऽनुमन्त्रणीया

११

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



क्रियमाणस्य पाकस्य किञ्चिद्दृष्टं प्रयोजनमस्ति। पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः। तस्माच्च पदार्थानां क्रम आश्रीयते। येन हि क्रमेण वाक्यानि पठितानि तेनैव क्रमेणाधीतान्यर्थप्रत्ययं जनयन्ति। यथा— प्रत्ययञ्च पदार्थानामनुष्ठानम्। सच पाठो द्विविधः।

---

अदृष्टमात्रार्थत्वम्। अदृष्टमात्रार्थत्वमवगमयति नहीति। तथाच पञ्चमाध्याय चतुर्थपादे सिद्धान्तसूत्रम्।

"क्रमको योऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च।" अस्यार्थः। यः पाठक्रमः सोऽर्थशब्दाभ्यां श्रुत्यर्थाभ्यां वाध्यते। श्रुतेर्वाधकत्वे हेतुः श्रुतिविशेषादिति। प्रत्यक्षश्रुतेरित्यर्थः। पाठादेः श्रुतिकल्पकत्वेपि प्रत्यक्षश्रुत्या कल्पनीयश्रुतेर्वाधः समुचित एवेतिभावः। अर्थस्य वाधकत्वे हेतुरर्थपरत्वादिति। सर्व्वस्य वाक्यस्य प्रयोजनेच्छया उच्चरितत्वादित्यर्थः। तथाच प्रथमं हवनीयद्रव्यानिष्पत्तौ होमनिष्पत्तिरूपप्रयोजनाभावेन पाकस्य निरर्थकत्वमितिभावः। अतएवोक्तं मिश्रैः।

क्रमे श्रुत्यैव विहिते पाठतः कोनु कल्पयेत्।
प्रयोजनविरोधे वा कः पाठमनुरुध्यते॥
हुत्वा हि पच्यमानस्य भवेद्धयमनर्थकम्।
पाकस्यैव यवागूञ्च तां पक्त्वा जुहुयात्ततः॥

पाठक्रममाह पदार्थवोधकेति। तत्तत्कर्म्मवोधकेत्यर्थः। तस्मात् तत्तत्कर्म्मप्रतिपादकक्रमपठिततत्तद्वाक्यात्। आश्रीयते पौर्व्वापर्य्यवोधकश्रुतिकल्पनया कल्प्यते। तथाच क्रमपठितवाक्यमेव पदार्थक्रमप्रमाणभूतपाठक्रमपदार्थ इति सिध्यति। वाक्यक्रमेणार्थक्रमकल्पनायां वीजमाह येन हीति। अधीतानि स्मृतानि। अर्थप्रत्ययमर्थग्रहम्। यथाप्रत्ययं वाक्यार्थग्रहमनतिक्रम्य। पदार्थानुष्ठानं कर्म्मानुष्ठानम्। तथाच यथा यथा वाक्यानि पठितानि प्रयोगवेलायां तथा तथैव तेषां स्मरणम्। यथायथाच वाक्यस्मरणं तथा तथैवार्थस्मरणम्। यथायथाचार्थ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**मन्त्रपाठो ब्राह्मणपाठश्चेति । तत्राग्नेयाग्नीषोमीययो-स्तत्तद्याज्यानुवाक्यानां पाठादयः क्रमश्चाग्नेयतः स मन्त्रपाठात् ।**

**सचायं मन्त्रपाठो ब्राह्मणपाठाद्बलीयान् । अनुष्ठाने**

---

स्मरणं तथातथैव कर्म्मानुष्ठानमित्येवं पौर्व्वापर्य्यस्यावश्यम्भावित्वात् श्रुतेरपि तथैव तात्पर्य्यं कल्पनीयमितिभावः ।

पाठक्रमं विभजति । सचेति, द्वैविध्यं दर्शयति मन्त्रेति । मन्त्रपाठः क्रमपठितमन्त्रः । ब्राह्मणपाठः क्रमपठितब्राह्मणम् । मन्त्रेतरवेदभागस्य ब्राह्मणरूपतया तत्पदेन विधेरर्थवादादेर्वा कर्म्मप्रतिपादकवाक्यमात्रस्य ग्रहणम् । मन्त्रपाठस्योदाहरणमाह तत्रेति । तयोर्मन्त्रब्राह्मणपाठयोर्मध्ये । आग्नेयेति । आग्नेयाष्टाकपालाग्नीषोमीययागयोरित्यर्थः । तत्तद्याज्यानुवाक्यानामिति । याज्या अनुवाक्याच ऋग्विशेषः । यः क्रम इति । प्रथममाग्नेयानुष्ठानमनन्तरमग्नीषोमीयानुष्ठानमित्यर्थः । मन्त्रपाठादिति । मन्त्रकाण्डे प्रथममाग्नेयमन्त्रस्य अनन्तर-मग्नीषोमीयमन्त्रस्य पाठादित्यर्थः । तथाहि हौत्रकाण्डे आज्यभागमन्त्रानुवाका-दुत्तरस्मिन्ननुवाके प्रथममग्निमूर्द्धेत्यादिके आग्नेय्यौ याज्यानुवाक्ये आम्नाते । ततः प्रजापते नत्वदेतानीत्यादिके प्राजापत्ये याज्यानुवाक्ये । ततो अग्नीषोमास वेदसी इत्यादिके याज्यानुवाक्ये आम्नाते । एवमाध्वर्य्यवे काण्डे अग्नये जुष्टं निर्व्वपा-म्यग्नीषोमाभ्यामित्याग्नेयः पूर्व्वमाम्नातः । याजमानकाण्डेपि अहं देवयाज्ययान्नादो भूयासमित्याग्नेयस्य । पश्चाच्च अहं देवयाज्यया वृत्रहा भूयासमित्यग्नीषोमीय मन्त्र आम्नायते । अत एतेषु आग्नेयाग्नीषोमीयमन्त्राणां क्रमेण पाठदर्शनात् तयोर्यागयोरपि क्रमकल्पना सिध्यति । एवमेव पञ्चमाध्यायप्रथमपादे नवमाधि-करणे न्यायमाला ।

ननु तैत्तिरीयब्राह्मणे पञ्चमप्रपाठके द्वितीयानुवाके अग्नीषोमीययागः समाम्नातः ताभ्यामग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छदिति । आग्नेययागस्तु तदीयषष्ठप्रपाठके तृतीयानुवाके आम्नातः यदाग्नेयाष्टाकपालो अमावास्यायां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ब्राह्मणवाक्यापेक्षया मन्त्रपाठस्यान्तरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदं कर्त्तव्यमित्यवबोध्य कृतार्थम् । मन्त्राः पुनः प्रयोगकाले व्याप्रियन्ते । अनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् तत्क्रमस्य च मन्त्रक्रमाधीनत्वात् । अन्तरङ्गो-मन्त्रपाठइति ।

---

पौर्णमास्याश्चाद्यतो भवतीति । एवञ्च ब्राह्मणपाठक्रमादग्नीषोमीयस्यैव प्रथममनुष्ठेयत्वमस्तु मन्त्रब्राह्मणपाठयोः क्रमत्वाविशेषादित्यत आह सचायमिति । बलीयस्त्वे हेतुमाह अनुष्ठान इति । अन्तरङ्गत्वादिति । प्रयोगसन्निहितत्वादित्यर्थः । एतेन ब्राह्मणस्य बहिरङ्गत्वं प्रतिपादितम् । तत्रादौ ब्राह्मणस्य बहिरङ्गत्वं युक्त्या साधयति ब्राह्मणवाक्यं हीति । प्रयोगाद्बहिः प्रयोगात् प्राक्काले । एवकारेण प्रयोगदशायां नास्यस्य व्यापार इति दर्शितम् । अवबोध्य कर्त्तव्यताज्ञानमुत्पाद्य । कृतार्थं निष्पादितस्वप्रयोजनम् । तथाच विधिवाक्यस्य कर्त्तव्यताज्ञानोत्पादनैक प्रयोजनकतया पुरुषस्य तथाविधज्ञाने तेनोत्पादिते कर्म्मानुष्ठाने प्रवृत्तिर्भवतीत्यनुष्ठानात् प्रागेव विधेः सिद्धप्रयोजनकतया विरामो विरतस्य चानुष्ठानवेलायां व्यापाराभावः सुगम एवेत्याशयः । इदानीं मन्त्रस्यान्तरङ्गत्वेयुक्तिमाह मन्त्राः पुनरिति । प्रयोगेति अनुष्ठानवेलायां व्यापारवन्तो भवन्तीत्यर्थः । तत्र साधकमाह अनुष्ठानेति क्रमेणानुष्ठानस्येत्यर्थः । स्मरणक्रमः क्रमेण मन्त्रार्थस्मरणम् । तदधीनत्वात् तत्प्रयोज्यत्वात् । तथाचोक्तम् ।

> लभ्यतेऽर्थस्मृतिर्दृष्टा मन्त्रोच्चारणतस्त्विह ।
> अर्थस्मृतिः प्रयोगार्था प्रयोगाच्च फलोदयः ॥

तत्क्रमस्य मन्त्रार्थस्मरणक्रमस्य । मन्त्रक्रमेति । क्रमेण मन्त्रपाठाधीनत्वादित्यर्थः । तथाच क्रमेण मन्त्रपाठात् क्रमेणैवार्थस्मरणं तस्माच्च क्रमेण कर्म्मानुष्ठानमिति प्रयोगदशायामेव मन्त्रस्य स्वार्थस्मरणाख्यव्यापारद्वारा सन्निधानमितिभावः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रयाजानां समिधो यजति तनूनपातं यजतीत्येवं विधिक्रमादयः क्रमः स ब्राह्मणक्रमात् यद्यपि ब्राह्मणवाक्यान्यर्थं विधाय कृतार्थानि तथापि प्रयाजादीनां क्रमस्मारकान्तरस्याभावात्तान्येव क्रमस्मारकत्वेन स्वीक्रियन्ते ।**

---

उपसंहरति अन्तरङ्ग इतीति। इति उक्तयुक्तेरन्तरङ्गो मन्त्रपाठ इत्यर्थः। तथाच पञ्चमाध्यायप्रथमपादे सिद्धान्तसूत्रम्।

मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशः।

अस्यार्थः।—मन्त्रस्य ब्राह्मणेन विरोधे मन्त्रोबलीयान्। कुतः प्रयोगरूपसामर्थ्यात्। प्रयोगाय मन्त्रस्य रूपसामर्थ्यात् अर्थप्रकाशनसामर्थ्यात्। तस्मादुत्पत्तिदेशः कर्म्मोत्पत्तिप्रयोजकः। एवमेव भाष्याशयः। अतएव शास्त्रदीपिका।

नैवं स्मृतिक्रमेणैव ह्यनुष्ठानक्रमो भवेत्।
स्मारकक्रमतस्यापि स्मृतीनां क्रम इष्यते॥
मन्त्राश्चानन्यकार्य्यत्वात् स्मृत्यर्था विधयः पुनः।
विधिनैव कृतार्थत्वान्नावश्यं स्मारका मताः॥

ब्राह्मणपाठमुदाहरति प्रयाजानामिति। यः क्रम इत्यनेनान्वितम्। इत्येवमित्यनेन इड़ो यजति वर्हिर्यजति स्वाहाकारं यजतीत्येषां ग्रहणम्। विधिपाठक्रमात् क्रमपठितविधिवाक्यात्। ननु ब्राह्मणानां प्राक्काल एव कर्त्तव्यता बोधसम्पादनोपक्षीणतया वहिरङ्गत्वान्नानुष्ठानक्रमप्रामाण्यमित्यत आह यद्यपीति। अर्थं स्वविधेयम्। विधाय कर्त्तव्यतयावबोध्य। क्रमस्मारकान्तरस्येति। क्रमबोधकश्रुत्यादिप्रमाणस्येत्यर्थः। तान्येव समिधो यजतीत्यादिविधिवाक्यान्येव। क्रमस्मारकत्वेनेति। प्रयोगप्राक्काले तेषां क्रमिकवाक्यानामनुयबोधदशायां यत् कर्म्मणां क्रमकर्त्तव्यताज्ञानं तज्जन्यसंस्कारद्वारेण कर्म्मणाम् क्रमकर्त्तव्यतास्मृतिजनकत्वेनेत्यर्थ.। तथाच मन्त्रब्राह्मणयोः क्रमकर्त्तव्यताज्ञानजनकत्वाविशेषेपि प्रयोगान्तरङ्गवहिरङ्गत्वाभ्यां बलाबले बोद्धव्ये।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



स्थानं नामोपस्थितिः। यस्य हि देशे योऽनुष्ठीयते तत्पूर्व्वतने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम्। अतएव साद्यस्के अग्नीषोमीयसवनीयानुबन्ध्यानां सवनीयदेशे सहानुष्ठाने कर्त्तव्ये आदौ सवनीयपशोरनुष्ठानमितरयोः पश्चात्। तस्मिन् देशे आश्विनग्रहणानन्तरं सवनीयस्यैव प्रथममुपस्थितेः।

तथाहि ज्योतिष्टोमे त्रयः पशुयागाः। अग्नी-

---

क्रमप्राप्तं स्थानं निरूपयति स्थानं नामेति। उपस्थितिः कर्त्तव्यताज्ञानम्। प्रकृतौ यस्मिन्नवसरे यत् कर्म्म विहितं विकृतौ यदि तेन कर्म्मणा सह कर्म्मान्तरमपि विहितं तदा यस्यावसरस्तस्यैव प्रथममनुष्ठानं कर्म्मान्तरन्तु पश्चादनुष्ठेयमित्येव-मुदाहरति यस्येति। यस्य देशे यस्यावसरे। योऽनुष्ठीयते यो अन्यः पदार्थोऽ-नुष्ठीयते विकृतौ विशेषविधिवशेन तेन सह क्रियते। तत्पूर्व्वतने यस्यावसर-स्तत्पूर्व्वकालीने। पदार्थे कर्म्मविशेषे। कृते अनुष्ठिते सति। सएव यस्यावसरः स एव। प्रथमं विकृतौ विशेषविहितात् कर्म्मान्तरात् प्राक्। उपस्थितः कर्त्तव्यत्वेन ज्ञानविषयः। युक्तमिति। विकृतौ कर्म्मान्तरस्य तदवसरे विहितत्वेपि प्रकृतौ तस्यैव तदानीमनुष्ठेयत्वेन निश्चयादितिभावः। अतएवेति। प्रकृतौ यस्मिन्नवसरे यत्कर्म्मानुष्ठाननिश्चयस्तस्यैव तत्पूर्व्वतनकर्म्मानुष्ठानानन्तरमुपस्थितत्वा-देवेत्यर्थः। साद्यस्के सोमयागविशेषे इति वक्ष्यते। अग्नीषोमीयादयस्तत्तद्देवताक-पशुयागविशेषाः। सवनीयदेशे सवनीयावसरे। सहानुष्ठाने अव्यवधानेनानुष्ठाने। आदौ प्रथमतः। इतरयोः अग्नीषोमानुबन्ध्ययोः। पश्चात् सवनीयानुष्ठानानन्तरम्। तस्मिन् देशे सवनीयपूर्व्वापरकालकर्त्तव्यकर्म्मणोरन्तराले। अत्र हेतुमाह आश्विनेति। आश्विनस्तन्नामा ग्रहविशेषः। प्रथममुपस्थितेरिति। प्रकृतौ आश्विनग्रहणानन्तरं तस्यैव कर्त्तव्यत्वनिश्चयादितिभावः।

ननु सर्व्वमिदमव्यक्ताभिधानतयेदानीन्तनानां बुद्धौ न विषयीभवति। साद्यस्क-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रधानक्रमेण योऽङ्गानां क्रमः स मुख्यक्रमः। येन हि क्रमेण प्रधानानि क्रियन्ते तेनैव क्रमेण तेषामङ्गान्यनुष्ठीयन्ते चेत् तदा सर्व्वेषामङ्गानां स्वैः स्वैः प्रधानैस्तुल्यं व्यवधानं भवति।

---

भावः। अतः सवनीयस्यैव प्रथमोपस्थितेः। युक्तम् पाठात् स्थानस्य बलवत्तया न्याय्यम्। इतरयोः अग्नीषोमीयानुबन्ध्ययोः। पश्चादिति। तयोः क्रमस्तु बाधकाभावात् प्राकृतपाठादेव द्वितीयमग्नीषोमीयानुष्ठानं तृतीयमनुबन्ध्यानुष्ठानमित्येवं रूप इति बोध्यम्। इत्युक्तम् सूत्रकारभाष्यकारादिभिरितिशेषः। तथाच पञ्चमाध्याय-प्रथमपादे सूत्रम्।

स्थानाच्चोत्पत्तिसंयोगादिति।

अत्र भाष्यम्। "अथात पाठक्रमात् किमग्नीषोमीयः पूर्व्वमालभ्येत उत स्थानक्रमात् पूर्व्वं सवनीय इति। किं प्राप्तम्, अग्नीषोमीय इति, कुतः, पाठक्रमात्, एवं प्राप्ते ब्रूमः। सवनीयः पूर्व्वम् स्थानात्, यदि पूर्व्वमग्नीषोमीयः स्यात् सवनीयस्थानं व्याहन्येत, आश्विनं गृहीत्वा त्रिवृता यूपं परिवीयेति। ननु इतरत्रापि पाठक्रमो बाध्यते, बाध्यतां, तस्य हि प्रतिषेधार्थः सह शब्दः समाम्नातः अप्रतिषिद्धञ्चाश्विनग्रहस्थानं तन्न बाधितव्यमिति।"

मुख्यक्रममाह प्रधानक्रमेणेति। यत्रानेकप्रधानयाग एकवैकप्रयोगान्तर्गतत्वेन विहितस्तथा तद्यागीयतत्तद्धविःसम्बन्धिकर्म्मच विहितं तत्रेदमुच्यते। तथाच तत्तत् प्रधानं येन क्रमेणानुष्ठेयत्वेन विहितं, हविःसम्बन्धिकर्म्मच तेनैव क्रमेणानुष्ठेय-मित्यर्थः। एतदेव व्यनक्ति येन हीति। तेषामङ्गानि तत्तद्यागीयहविःसम्बन्धि-कर्म्माणि। स्वैः स्वसम्बन्धिहविरङ्गकैः। तुल्यं व्यवधानमिति। एकमात्र-कर्म्मान्तरितत्वरूपव्यवधानं तुल्यमित्यर्थः। तथाहि आदौ प्रथमानुष्ठेयप्रधानयागीय-हविःसम्बन्धिकर्म्म कृत्वा अनन्तरं पश्चादनुष्ठेयप्रधानयागीयहविःसम्बन्धिकर्म्म समाप्य यदि प्रथमानुष्ठेयप्रधानयागं पश्चादनुष्ठेयप्रधानयागञ्च क्रमेण समापयेत्, तदा प्रथमानुष्ठेययागीयहविःसम्बन्धिकर्म्मणः स्वप्रधानेन प्रथमानुष्ठेययागेन एकमात्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**द्वयोरभिघारणयोः स्वस्वप्रधानेन तुल्यमेकान्तरितं व्यवधानम् । व्युत्क्रमेणाघारे, त्वाग्नेयहविरभिघारणाग्नेययागयोरत्यन्तमव्यवधानम् । ऐन्द्रदध्यभिघारणैन्द्रयागयो र्द्व्यन्तरितं व्यवधानं तच्चायुक्तमित्युक्तमेव ।**

---

प्रतीतः । आग्नेययागे अष्टकपालसंस्कृतं हविः । ऐन्द्रे तु दधि पयश्चेत्याम्नातम् । तत्र वत्सापाकरणदोहनादय ऐन्द्रहविषोधर्म्माः प्रथमं पठिताः । पश्चाच्चाग्नेयहविषो धर्म्मा निर्व्वापावघातादयः पठिताः । ते तथैवानुष्ठेयाः पाठक्रमात् । परन्तु प्रयाजशेषेणाभिघारणं स्विष्टकृदवदानं वेद्यामासादनञ्चेत्येते धर्म्माः केन क्रमेणानुष्ठेया इत्यत्र न किञ्चिदाम्नानमस्तीत्यतोऽत्र नियामकान्तराभावात् प्रधानयोराग्नेयैन्द्रयागयोः-पौर्व्वापर्य्यादेव तेषामङ्गानां पौर्व्वापर्य्यमवधार्य्यमित्याग्नेयहविषः प्रथममभिघारणं पश्चाच्चैन्द्रस्य दध्न इति । मुख्यक्रमानुसरणे द्वयोरेव एकान्तरितत्वं वैपरीत्ये तु कस्यचित् द्व्यन्तरितत्वमिति व्यवधानलाघवरूपां प्रागुक्तां मुख्यक्रमानुसरणयुक्तिमत्र सङ्गमयति एवञ्चेति । द्वयोरभिघारणयो स्तथाग्नेयैन्द्रयागयोश्च पौर्व्वापर्य्ये सतीत्यर्थः । अभिघारणयोः आग्नेयैन्द्रहविषोरभिघारणयोः । स्वस्वप्रधानेन आग्नेययागेन ऐन्द्रयागेन च । एकान्तरितं व्यवधानम् एकान्तरितत्वरूपं व्यवधानम् तच्च तुल्यमुभयत्राप्यविशिष्टम् । आग्नेयहविरभिघारणाग्नेययागयोरैन्द्रहविरभिघारणमात्रेण व्यवधानात् । ऐन्द्रहविरभिघारणैन्द्रयागयोश्चाग्नेययागमात्रेण व्यवधानादितिभावः । एतद्वैपरीत्ये दोषमाह व्युत्क्रमेणाघारेत्विति । आदावैन्द्रहविषोऽभिघारणं पश्चादाग्नेयहविष इत्येतत् क्रमेणाभिघारणे इत्यर्थः । अत्यन्तमव्यवधानमिति । नास्ति किञ्चिदपि व्यवधानं तत्रेत्यर्थः । आग्नेयहविरभिघारणानन्तरमेवाग्नेययागानुष्ठानादितिभावः । द्व्यन्तरितं व्यवधानं द्वाभ्यां कर्म्माभ्यामन्तरितत्वरूपं व्यवधानम् । ऐन्द्रहविरभिघारणैन्द्रयागयोरन्तराले आग्नेयहविरभिघारणाग्नेययागयोः पातादितिभावः । आग्नेयैन्द्रयागयोर्मन्त्रपाठक्रमेण पौर्व्वापर्य्यस्य सिद्धतया तद्बाधासम्भवान्न तयोर्व्युत्क्रमानुष्ठानं शङ्कनीयम् । अयुक्तमिति । प्रयोगविध्यवगतसाहित्यबाधापत्तेरितिभावः । उक्तमेवेति । प्रागेवोक्त मित्यर्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सच मुख्यक्रमः पाठक्रमाद्दुर्व्वलः। मुख्यक्रमोहि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः। पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति वलवान्।

---

ननु हविःसम्बन्धिनः कतिचिद्धर्म्माः प्रथममैन्द्रहविषः पठिताः पश्चाच्चाग्नेयहविषस्ते तथैवानुष्ठेयाः पाठक्रमात्। अभिघारणादिकन्तु मुख्यक्रमादाग्नेयहविःपूर्व्वकमेवेति सिद्धान्तः, तत्रेदं शङ्कनीयं पाठक्रमादैन्द्रहविःपूर्व्वकत्वेन निर्णीतानां धर्म्माणामपि वत्सापाकरणादिनिर्व्वापादीनां मुख्यक्रमादाग्नेयपूर्व्वकत्वमस्तु मुख्यक्रमेण पाठक्रमस्य वाध्यत्वात्। तुल्यवलत्वाङ्गीकारे विकल्प एव वास्त्वित्यत आह सचेति। दुर्व्वलइति। तथाच न पाठक्रमस्य वाध्यत्वं नवा विकल्पावतार इतिभावः। दौर्व्वल्ये हेतुमाह मुख्यक्रमोहीति। प्रमाणेति। प्रमाणान्तरसापेक्षा प्रधानक्रमवोधकशास्त्रमूलिका या प्रधानक्रमप्रतिपत्तिः प्रधानयोः क्रमज्ञानं तत्सापेक्षतया तदधीनतया विलम्बितप्रतिपत्तिकः विलम्बिता झटित्यनुत्पन्ना प्रतिपत्तिर्ज्ञानं यस्य तथाभूतइत्यर्थः। पाठक्रमस्य वलवत्त्वे हेतुमाह पाठक्रमस्त्विति। निरपेक्षेति। निरपेक्षः प्रमाणान्तरानधीनो यः स्वाध्यायानां वेदानां पाठक्रमः पाठक्रमज्ञानं तन्मात्रसापेक्षतया तन्मात्राधीनतयेत्यर्थः। न तथा न विलम्बितप्रतिपत्तिकः। इति हेतोः। तथाच मुख्यक्रमस्थले प्रथमं प्रधानवोधकशास्त्रज्ञानमनन्तरं प्रधानानां क्रमज्ञानं तदनन्तरञ्च तदङ्गानां क्रमज्ञानमुत्पद्यते। पाठक्रमस्थलेतु प्रथमं क्रमपठितवेदानां ज्ञानमनन्तरञ्च तदर्थानां क्रमज्ञानमित्युभयोः क्रमान्तरज्ञानमूलकत्वेपि प्रथमक्रमज्ञानस्य शास्त्रज्ञानमूलकत्वतदमूलकत्वाभ्यां द्वितीयक्रमज्ञानस्य विलम्बाविलम्बावितिभावः। एवञ्चाभिघारणादिकं मुख्यक्रमादाग्नेयपूर्व्वकमेवानुष्ठेयम्। ऐन्द्रहविर्धर्म्मा वत्सापाकरणादयस्तु वलवतः पाठक्रमात् प्रथममनुष्ठेया अनन्तरञ्चाग्नेयहविर्धर्म्मा निर्व्वापादयः। दुर्व्वलेन मुख्यक्रमेण वलवतः पाठक्रमस्य वाध्यत्वायोगादितिसिद्धम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**सचायं मुख्यक्रमः प्रवृत्तिक्रमाच्च बलवान्। प्रवृत्तिक्रमे हि बहूनामङ्गानां प्रधानविप्रकर्षात् मुख्यक्रमेतु सन्निकर्षात्।**

---

अत्रैवोदाहरणान्तरं पञ्चमाध्यायप्रथमपादे दर्शितं यथा। पौर्णमासयागे उपांशुयाजाग्नीषोमीययागावनुष्ठेयौ। तत्रोपांशुयाजहविराज्यम्। अग्नीषोमीयहविश्च पुरोडाशरूपम्। उपांशुयाजाज्यधर्म्मा आज्यस्थाल्यां निर्वाप उत्पवनं चतुर्ग्रहीतत्वमित्येवमादयः। अग्नीषोमीयपुरोडाशस्यौषधिद्रव्यकत्वेन तद्धर्म्मा निर्व्वापादयः। तेच मुख्यक्रमेणोपांशुयाजीयाज्यपूर्व्वकानुष्ठानयोग्याः। परन्तु अग्नीषोमीयौषधिधर्म्माः पूर्व्वमाम्नाताः पश्चात्तु आज्यधर्म्मा इतिबलवतः पाठक्रमात् प्रथममग्नीषोमीयहविर्धर्म्मा अनन्तरञ्च उपांशुयाजाज्यधर्म्मा अनुष्ठेया इति।

ननु येषां हविर्द्धर्म्माणां पाठक्रमादैन्द्रहविःपूर्व्वकत्वं सिद्धान्तित तेषां तथाविधप्रवृत्तिदर्शनात्तदितरेषामुत्तरकर्त्तव्यानामभिघारणादीनामपि प्रवृत्तिक्रमादैन्द्रहविःपूर्व्वकत्वमस्तु पूर्व्वपूर्व्वकर्म्मणां यत्क्रमेणानुष्ठानमुत्तरोत्तरकर्म्मणामपि तत्क्रमेणानुष्ठानस्य प्रवृत्तिक्रमत्वात्। मुख्यक्रमस्तु बलवता प्रवृत्तिक्रमेण बाध्यतामित्यत आह सचायमिति। प्रवृत्तिक्रमाच्चेति चकारो भिन्नक्रमेण योजनीयः। प्रवृत्तिक्रमाद्बलवांश्चेत्यर्थः। हेतुमाह प्रवृत्तिक्रमेहीति। बहूनामिति। ऐन्द्रहविर्द्धर्म्माणां वत्सापाकरणदोहनादीनाम् आग्नेयहविर्द्धर्म्माणाञ्च निर्व्वापावघातादीनां पाठबलात् क्रमिकप्रवृत्तिदृष्ट्या सर्व्वेषां हविरङ्गानां तथाविधक्रमकल्पने अवदानाभिघारणासादनानाम् त्रयाणामपि तत्क्रमेणानुष्ठाने ऐन्द्रहविर्धर्म्माणां वत्सापाकरणादीनामभिघारणादीनाञ्च प्रधानेन सह कर्म्मद्वयान्तरितत्वरूपं व्यवधानं स्यादित्यर्थः। मुख्यक्रमेत्विति। मुख्यक्रमानुसरणेत्वित्यर्थः। सन्निकर्षात् प्रधानसन्निकर्षात्। तथाहि प्रथममाग्नेयहविरभिघारणं तत ऐन्द्रहविरभिघारणं तदनन्तरमाग्नेययागस्तदुत्तरञ्चैन्द्रयाग इत्यभिघारणस्य प्रधानेनैककर्म्मान्तरितत्वरूपं व्यवधानम्। न पुनर्वत्सापाकरणादीनामिव ऐन्द्रहविरभिघारणादीनामपि कर्म्मद्वयान्तरितत्वरूपोऽत्यन्तविप्रकर्ष इतिभावः। अतएव पञ्चमाध्यायचतुर्थपादे किं प्रवृत्तिक्रमेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**सह प्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्त्या नुष्ठाने कर्त्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थं क्रमाद् यः क्रमः स प्रवृत्तिक्रमः। यथा प्राजापत्यपश्वङ्गेषु।**

---

दध्नोऽवदानाभिघारणासादनानि कार्य्याण्युत मुख्यक्रमेण पूर्व्वमाग्नेयस्यैवेति संशये, "अवदानाभिधारणासादनेष्वानुपूर्व्व्यं प्रवृत्त्या स्यात्" दिति सूत्रेण अवदानादिषु प्रवृत्त्यैव क्रमो ग्राह्य इति पूर्व्वं पक्षयित्वा।

यथा प्रदानं वा तदर्थत्वादिति।

सूत्रेण यस्य हविषस्त्यागः पूर्व्वकर्त्तव्यतया विहितस्तस्यैवावदानादि प्रथममिति सिद्धान्तितम्। अत्र भाष्यम् "मुख्यक्रमे गृह्यमाणे प्रथम एकः पदार्थो विप्रकृष्टकालः स्यात्। प्रावृत्तिके पुनर्गृह्यमाणे सर्व्वेषां विप्रकर्ष" इति। एवमेव शास्त्रदीपिका। एवञ्च ग्रन्थकृता यदभिघारणमात्रोपादानं कृतं तत्प्रदर्शनार्थमिति बोध्यम्। भाष्या-दावनुष्ठानप्रकारोनाभिहितः। न्यायमालायान्तु अनुष्ठानप्रकारौ दर्शितौ यथा। "प्रावृत्तिके हि क्रमे सान्नाय्ये पूर्व्वमवदानमभिधारणमासादनञ्चकृत्वा प्रदानमकृत्वैव आग्नेये अवदानादीनि कर्त्तव्यानि। तथा सति सान्नाय्येऽनुष्ठितान्यासादनादीनि मुख्यात् प्रदानात् विप्रकृष्यते। मुख्यक्रमाश्रयणे तु आग्नेये प्रथममवदानादि-प्रदानान्तं कृत्वा पश्चात् सान्नाय्ये तदनुष्ठीयते। तत्र नास्त्यङ्गाङ्गिविप्रकर्ष" इति। एतेन अवदानाभिधारणासादनानां त्रयाणामेव प्रथममाग्नेयेऽनुष्ठानमनन्तरमाग्नेयहविः प्रदानं तदनन्तरञ्चावदानाभिधारणासादनानि ऐन्द्रेऽनुष्ठायैव ऐन्द्रहविस्त्याग इति सिध्यति। एवञ्च द्वयोरभिधारणयोः स्वस्वप्रधानेन तुल्यमेकान्तरितं व्यवधानमिति प्रागुक्तवाक्येन ग्रन्थकृता यदभिघारणस्य आग्नेयेऽनुष्ठानमनन्तरमैन्द्रेऽनुष्ठानं पश्चादा-ग्नेयैन्द्रयागयोः क्रमेणानुष्ठानमुक्तं, तन्मतान्तरमिति द्रष्टव्यम्।

प्रवृत्तिक्रममाह सहेति। साहित्येन कर्त्तव्यतया विहितेष्वित्यर्थः। प्रधानेषु परस्पराङ्गाङ्गिभावरहितेषु। सन्निपातिनां यौगपद्येनोपस्थितानाम्, आवृत्त्येति। तत्तत्प्रधानेषु तत्तदङ्गानां यौगपद्येनानुष्ठानस्याशक्यत्वेन अव्यवधानेनानुष्ठानस्यैव शास्त्रार्थतया तत्तत्प्रधानेषु तत्तदङ्गानामव्यवहितानन्तर्य्येण पुनः पुनरनुष्ठाने इत्यर्थः।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दीनां युगपदनुष्ठानमशक्यम् । अतस्तेषां साहित्यमव्यवहितानुष्ठानात् सम्पाद्यम् । ततश्चैकस्योपाकरणं विधायापरस्योपाकरणं विधेयम् । एवं नियोजनादिकमपि । तथाच प्राजापत्येषु कस्माच्चित् पशोरारभ्य एकं सर्व्वत्रानुष्ठाय द्वितीयादिपदार्थस्तेनैव क्रमेणानुष्ठेयः । स प्रवृत्तिक्रमः ।

सोऽयं श्रुत्यादिभ्योदुर्व्बलः । तदेवं संक्षेपतोनिरूपितः षड्विधक्रमनिरूपणेन प्रयोगविधिः ।

---

नुष्ठानात् एकस्मिन्काले हवनात् । उपपद्यते इति । सप्तदशपश्ववयवैस्तन्त्रेण सकृद्धोमसम्भवादितिभावः । तदङ्गानाञ्चेति तदङ्गानान्त्वित्यर्थः । अशक्यमिति सप्तदशानामुपाकरणानामेकमन्त्रकरणकैकजातीयकर्म्मत्वेपि प्रतिव्यक्ति कर्त्तव्यतया तन्त्रेणानुष्ठानाप्रसक्तेरितिभावः । अतस्तन्त्रानुष्ठानेन साहित्यसम्पादनस्याशक्यत्वात् । अव्यवहितानुष्ठानेन कर्म्मान्तरव्यवधानाभाववदनुष्ठानेन सम्पाद्यं घटयितव्यम् । ततश्चेति । उपाकरणादीनामव्यवहितानुष्ठानस्यावश्यकत्वाच्चेत्यर्थः । एकस्य पशोः । तथाकरणात् प्रवृत्तिक्रमत्वं कथं भवतीत्यत्राह तथाचेति । एकमुपाकरणम्, सर्व्वत्र सप्तदशसु पशुषु । द्वितीयादिपदार्थो नियोजनादिरूपः । तेनैव क्रमेण उपाकरणानुष्ठानक्रमेण । स प्रवृत्तिक्रम इति । प्रथमप्रवृत्त्यनुसारिक्रमत्वादितिभावः । यदि तु एकस्मिन् पशावुपाकरणादीनि सर्व्वाण्यनुष्ठाय अपरापरपशुषु एकैकस्मिन् सर्व्वाणि अनुष्ठीयन्ते, तदा उपाकरणादीनामेकैकस्य अव्यवहितानुष्ठानं श्रुतिबोधितं व्याहन्येत, एकस्मादुपाकरणादुपाकरणान्तरस्य नियोजनादिभिः कर्म्मान्तरैर्व्यवहितत्वात् । एवमन्यत्रापि, तथाच पञ्चमाध्यायद्वितीयपादे सिद्धान्तसूत्रम्,

"सर्व्वेषां वैकजातीयं कृतानुपूर्व्वत्वादिति ।" वाशब्दः पूर्व्वपक्षं व्यावर्त्तयति । सर्व्वेषां पशूनां सम्बन्धे एकैकजातीयं कर्म्म कर्त्तव्यम् । तेनैव आनुपूर्व्व्यस्य साहित्यस्य कृतत्वादित्यर्थः । अत्र भाष्यम् "एकजातीयानुसमयः कर्त्तव्यः । किमेवं भविष्यति सहत्वमनुग्रहीष्यते । तत् सहत्वं श्रूयते वैश्वदेवीं कृत्वा पशुभि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सीतेत्यादिना शुचिविहितकालजीविनः सन्ध्योपासनजन्य-प्रत्यवायपरिहाररूपफलस्वाम्यं बोध्यते। तच्च फलस्वाम्यं तस्यैव, योऽधिकारविशिष्टः। अधिकारश्च यद्विधिवाक्येषु पुरुषविशेषणत्वेन श्रूयते। यथा काम्ये कर्म्मणि फलकामना।

---

हिरण्यं नश्येदाग्नेयादीनि निर्व्वपेदिति भाष्यधृता श्रुतिः परिग्राह्या। गृहदाहादा-वित्यादिपदात् हिरण्यनाशपरिग्रहः। निमित्तवती गृहदाहादिरूपनिमित्तनिश्चय-वतः। पापक्षयेति गृहदाहादिसूचितपापक्षयकामनाया अश्रुतत्वेप्यर्थसिद्धत्वात् तस्यैव भावत्वप्रतीतेरितिभावः। प्रथमोदाहरणे फलस्य श्रुतत्वं, द्वितीये चाश्रुतत्वे प्यर्थसिद्धत्वं दर्शितमिदानीं प्रमाणान्तरकल्पनीयफलस्वाम्यबोधकमुदाहरति एवमिति। पूर्व्वोदाहृतवदित्यर्थः। शुचिविहितकालेति। शौचविशिष्टविधि-बोधितकालेत्यर्थः। शुचिस्तत्कालजीवी कर्म्म कुर्य्यादिति विधेरितिभावः। बोध्यत-इति। सन्ध्योपासनाद्यभावस्य प्रत्यवायसाधनताया अर्थवादावगम्यत्वात् सन्ध्योपास-नस्य सुतरां तत्परिहारसाधनत्वं सिध्यति। यत् यस्य साधनं तदभावस्तत्परिहार-साधनमिति नियमादितिभावः।

नन्वधिकारविधेः कर्म्मजन्यफलस्वाम्यबोधकत्वमुक्तम्। तत्रेयं पृच्छा, यत्, विधिना कस्य फलस्वाम्यं बोधनीयम्। नच कर्त्तुरेव फलस्वाम्यं बोध्यत इति नाय्यं व प्रश्नावकाश इति वाच्यम्। प्रतिनिधौ व्यभिचारादित्यचाह तच्चेति। अधिकारविशिष्ट इति। एतेन प्रतिनिधेर्व्युदासः। तस्याधिकाराभावात्। ननु यथा देवतोद्देशेन द्रव्यत्यागबोधको विधिर्यागविधिरित्युक्तौ देवतोद्देशेन द्रव्यत्याग एव यागः प्रतीयते तथा फलभोक्तृत्वबोधको विधिरधिकारविधिरित्युक्तावपि फलभोक्तृत्वमेवाधिकारः प्रत्येतव्यः। एवञ्च फलभोक्तृत्वमधिकारो अधिकार-वतश्च फलभोक्तृत्वमित्यन्योन्याश्रयापत्तिरित्यतोऽधिकारपदार्थमन्यथा निर्व्वक्ति अधिकारश्चेति। यदिति सामान्याभिधानात् क्लीवत्वम्। श्रूयत इत्यस्य कर्म्म तत्। पुरुषविशेषणत्वेन नियोज्यविशेषणत्वेन। एवञ्च यो धर्म्मो नियोज्यविशेषणत्वेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नैमित्तिके कर्म्मणि निमित्तनिश्चयः । नित्ये सन्ध्योपासनादौ शुचिविहितकालजीवित्वम् । अतएव राजा राजसूयेन स्वाराज्यकामो यजेतेत्यनेन विधिवाक्येन स्वाराज्यमुद्दिश्य यागं विदधतापि न स्वाराज्यकाममात्रस्य तत्फल-भोक्तृत्वं प्रतिपाद्यते । किन्तु राज्ञः सतः स्वाराज्य-कामस्यैव । राजत्वस्यापि अधिकारिविशेषणत्वेन श्रवणात् । क्वचित्तु पुरुषविशेषणत्वेनाश्रुतमप्यधिकारिविशेषणम् । यथा

---

श्रूयते तद्धर्म्मवत एव फलस्वाम्यं सिध्यतीति नान्योन्याश्रयः । तथाच फलस्वाम्यं फलसम्बन्धयोग्यत्वं, योग्यताच यद्धर्म्ममन्तरेण फलसम्बन्धो न सम्भवति तद्धर्म्मवत्त्वम् । तथाच सति, नियोज्यस्य यो धर्म्मः श्रूयते तद्धर्म्ममन्तरेण तत्फलसम्बन्धासम्भवात् तद्धर्म्मवत एव फलसम्बन्धयोग्यतया फलस्वाम्यमित्युपपन्नमितिभावः ।

विधिप्राप्तं पुरुषविशेषणं दर्शयति यथेति । फलकामनेति । स्वर्गादिफल-कामनायाः पुरुषविशेषणत्वादितिभावः । स्वाराज्यं स्वर्गराज्यम्, अत्र स्वः पदं निरवच्छिन्नसुखानुभवजनकस्थानपरम् । ननु

यन्न दुःखेन सम्भिन्नं नच ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदम् ॥

इत्युक्त सुखविशेषपरम् । राजत्वान्वयानुपपत्तेः । राज्ञः सत इति । राजत्वे सति स्वाराज्यकामत्वमधिकारिविशेषणमितिभावः । ननु विधिवाक्येषु नियोज्य-विशेषणत्वेन श्रूयमाणधर्म्मस्यैवाधिकारिविशेषणत्वमुक्तम् । तथा सति अश्रुत-फलकेषु विश्वजिदादिषु प्रमाणान्तरावगतस्वर्गकामनाया अधिकारिविशेषणत्वा-नुपपत्तिरित्यत आह क्वचिदिति । अधिकारिविशेषणं नियोज्यविशेषणम् । तथाच फलस्वाम्यं फलसम्बन्धयोग्यता । साच यथा नियोज्यस्य वेदबोधित धर्म्म-विशेषशालित्वं तथा प्रमाणान्तरावगतधर्म्मविशेषवत्त्वमपि । तदभावे फलसम्बन्धा-सम्भवाविशेषात् । एवञ्च यथा विश्वजिदादौ अनुमानप्रमाणबलेन स्वर्गकामनाया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अध्ययनविधिसिद्धा विद्या । क्रतुविधीनामर्थज्ञानापेक्षणीयत्वेनाध्ययनविधिसिद्धार्थज्ञानवन्तं प्रत्येव प्रवृत्तेः । एवमग्नि-

---

नियोज्यविशेषणत्वसिद्धिस्तथान्यत्रापि येन केनचित् प्रमाणेन प्रतिपन्नस्य यद्धर्म्ममन्तरेण फलसम्बन्धी न सम्भवति तथाविधधर्म्मस्यापि नियोज्यविशेषणत्वमवश्यमङ्गीकरणीयम्। एवञ्च पुरुषविशेषणत्वेन यत् श्रूयत इति प्रागुक्तेन वाक्येन श्रुतस्यैवाधिकारिविशेषणत्वं यदभिहितं तत्प्रदर्शनार्थमितिभावः। तत्र यत् प्रमाणवलेन यत्र यद्धर्म्मवत्त्वमधिकारिविशेषणत्वेनाङ्गीकरणीयं तद्दर्शयति यथेति। अध्ययनविधीति। स्वाध्यायोऽध्येतव्य इत्यादि विधीत्यर्थः। तेन सिद्धा निश्चिता। विद्या वेदार्थज्ञानम्। अधिकारिविशेषणमितिशेषः। क्रतुविधीनामिति, प्रवृत्तेरित्यनेनान्वितम्। अर्थज्ञानेति। कर्म्मानुष्ठानस्य तद्बोधकवेदार्थज्ञानसापेक्षत्वेनेत्यर्थः। अध्ययनविधिसिद्धेति। अध्ययनविधिना स्वाध्यायोऽध्येतव्य इत्यनेन सिद्धं निश्चितं यत् वेदार्थज्ञानं तद्वन्तं प्रत्येव क्रतुविधीनां प्रवृत्तेरित्यर्थः। अयमाशयः। यागप्रतिपादकवेदार्थज्ञानमन्तरेण यागानुष्ठानासम्भवात् तदर्थज्ञानमेवाधिकारिविशेषणम्। अर्थज्ञानस्य च स्वाध्यायोऽध्येतव्य इत्यनेन प्रतिपादितत्वात्, तत्तद्यागबोधकविधावश्रुतत्वेपि प्रमाणान्तरावगतत्वेनाधिकारिविशेषणमिति सिध्यतीति ब्राह्मणादिवर्णत्रयस्यैव यागाधिकारः। प्रत्येवेत्येवकारेण वेदार्थज्ञानशून्यानां शूद्राणामनधिकार इति दर्शितम्। तथाच षष्ठाध्याय प्रथमपादे सूत्रम्।

अपि वा वेदनिर्द्देशादपशूद्राणां प्रतीयेतेति ।

अपशूद्राणां शूद्रवर्ज्जितानामधिकार एव। कुतः वेदनिर्द्देशात्, वेदे हि त्रयाणां निर्द्देशो भवति। वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, वर्षासु वैश्यमिति। वेदाभावादसमर्थः शूद्रो यष्टुम्। तस्मान्न अधिक्रियेतेति भाष्यम्।

ननु वसन्ते ब्राह्मणोऽग्निमादधीतेत्यादिना वर्णत्रयाधानकालमुक्त्वा वर्षासु रथकार आदधीतेति श्रुत्या रथकारस्य सौधन्वनापरपर्य्यायस्य सङ्कीर्णजातित्वेन शूद्रसधर्म्मणः कथमाधानाधिकारः श्रूयते। नच रथं करोतीति व्युत्पत्त्या रथनिर्म्मातृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



साध्यकर्मसु आधानविधिसिद्धाग्निमत्ता। अग्निसाध्य-कर्मणामग्न्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निमत्त्वं प्रत्येव

---

त्रैवर्णिकपरएव रथकार शब्द इति वाच्यम्। योगाद्रूढेर्बलवत्त्वात् सङ्कीर्णजाति-विशेषे चास्य रूढत्वात्।

माहिष्येण करण्यान्तु रथकारः प्रकीर्त्तित इति।

माहिष्यकरणौ तु याज्ञवल्क्योक्तौ यथा—

वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ।

वैश्यात्तुकरणः शूद्र्यां विन्नास्वेषविधिः स्मृतः॥

तदत्र का समाधिरितिचेत् वचनादितिवक्ष्यति। तथाच षष्ठाध्यायप्रथमपादे सिद्धान्तसूत्रम्।

वचनाद्रथकारस्याधाने तस्य सर्व्वशेषत्वादिति।

अत्र भाष्यम्। "रथकारस्यात्रैवर्णिकस्य आधानमेतत् कुतः, वचनात्। न हि वचनस्य किञ्चिदकृतामस्ति" इति। एवं "वास्तुमध्ये रौद्रं चरुं निर्व्वपेत्, यत्र रुद्रः प्रजाः शमयेदितीयतामिष्टिमुपक्रम्य "एतया निषादस्थपतिं याजये" दित्याम्नातं, तत्रापि वचनमेव हेतुरिति द्रष्टव्यम्। स्थपतिशब्दस्य कारुविशेष-वाचित्वम्। तदुक्तम् मत्स्यपुराणे।

वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः।

दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्त्तितः॥

नच स्थपति शब्दोऽत्र श्रेष्ठवाची तेन निषादानां स्थपतिर्निषादेभ्य उत्कृष्ट इति त्रैवर्णिकपर एवास्त्वितिवाच्यम्। निषादश्चासौ स्थपतिश्चेति कर्म्मधारयसमासस्यैव बलवत्त्वात्। षष्ठीसमासे हि सङ्कीर्णजातिवाचिना निषादशब्देन तत्सम्बन्धी लक्षणीयः। कर्म्मधारये तु न लक्षणा। तस्मात् निषाद एव स्थपतिरिति षष्ठाद्यपादे सिद्धान्तः।

एवमाहवनीये जुहोतीत्यादि श्रुत्या आहवनीयादौ यागविधानात् तादृशाग्निसत्ता-मन्तरेण यागानुष्ठानासम्भवादाहवनीयाद्यग्निमत्तापि अधिकारिविशेषणम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रवृत्तेः । एवं सामर्थ्यमपि । आख्यातानामर्थं ब्रुवतां सहकारिणी शक्तिरितिन्यायात् समर्थं प्रत्येव विधिप्रवृत्तेः । तदेवं निरूपितो विधिः ।**

---

आहवनीयाद्यग्नयस्तु वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः, शरदि वैश्य इति श्रुत्या आधानसाध्यत्वेन प्रतिपादिताः । अत आधानविधिविहिताहवनीयाद्यग्निसत्ताया अधिकारिविशेषणत्वसिद्धे निरग्नीनां यागानधिकार इति प्रतिपादयति एवमिति । अग्निसाध्यकर्म्मसु होमात्मकयागेषु । अग्न्यपेक्षत्वेन अग्निमन्तरेणासम्भाव्यमानत्वेन । तद्विधीनामग्निसाध्यकर्म्मप्रतिपादकविधीनाम् । प्रतेत्रवेत्येवकारेण निरग्निव्यावृत्तिः ।

वेदावगतस्येव लोकावगतस्यापि अधिकारिविशेषणत्वमित्याह एवं सामर्थ्यमपीति । शक्तिरपीत्यर्थः । शक्तेः सहकारित्वे आप्तसंवादमाह आख्यातानामिति । अर्थं ब्रुवतां स्वार्थं प्रकाशयतामाख्यातानां शक्तिः सहकारिणीभवतीत्यर्थः । स्वार्थप्रकाशनसामर्थ्यमन्तरेण आख्यातकर्तृकस्वार्थप्रकाशनाख्य क्रियाया असम्भवादितिभावः । इतिन्यायात् एतत् साहस्यात् । यथा स्वार्थप्रकाशनाख्यक्रियायां तत्सामर्थ्यस्य सहकारित्वमाख्यातानामङ्गीक्रियते तथान्यत्रापि यागादिक्रियायां कर्तुस्तत्करणसामर्थ्यस्य सहकारित्वमवश्यमभ्युपगन्तव्यमितिभावः । समर्थं यागानुष्ठानशक्तिमन्तम् । प्रतेत्रवेत्येवकारेण अप्रतिसमाधेयाङ्गवैकल्यवन्तः काम्ये कर्म्मणि व्यावर्त्त्यन्ते । तेषां साङ्गयागानुष्ठानासामर्थ्यात् । तथाहि अन्धो नाज्यमवेक्षितुं क्षमः । पङ्गुर्विष्णुक्रमेष्वशक्तः । बधिरो नाध्वर्य्युप्रोक्तं शृणोति । मूकोऽनुमन्त्रणादावसमर्थः । अतस्तत्तदङ्गासमर्थेषु तेषु काम्यसाङ्गयागविधयो न प्रवर्त्तन्ते । यदि तान्यङ्गानि पुरुषोपकारकतया विधीयेरन् तदा फलकामनावत्पुरुषाणां सर्व्वेषामेव यागाधिकारः स्यात् । यागविधेः प्रवृत्तत्वात् । अङ्गविधीनान्तु यथासम्भवं प्रवृत्तेर्यथासम्भवमङ्गाधिकारइति सुवचं स्यात् । नतु तथा । यागोपकाराकाङ्क्षायामेव तेषां विधानेन निरवशेषाङ्गसहित यागविधिरेव पुरुषं प्रति प्रवर्त्तते । यस्यतु कस्मिंश्चिदप्यङ्गे नास्ति सामर्थ्यं



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रयोगसमवेतार्थस्मारका मन्त्राः । तेषाञ्च तादृशार्थ-**

---

तस्य न काम्यकर्म्माधिकारः । अतएव कामिन्र सर्व्वाङ्गोपसंहारेणैवाधिकारइति सिद्धान्तः । नित्येतु यथाशक्तीतुापदेशादशक्याङ्गाभावेपि भवत्यधिकारः ।

अत्रेदं वोध्यम् । यस्य पुरुषस्य यस्मिन्नङ्गे नित्यमेवासामर्थ्यं तस्यैव तदङ्गवति काम्येऽनधिकारः । यथा जन्मान्धादेः । यस्य तु यदाकदाचित् सामर्थ्यं सम्भवति तस्य तदानीमसामर्थ्येपि न तत्रानधिकारः । यथा दरिद्रस्य प्रतिसमाधेयाङ्गवैकल्य-वतश्च । अतएव षष्ठाद्यपादे ।

त्रयाणां द्रव्यसम्पन्नः कर्म्मणोद्रव्यसिद्धित्वादिति ।

सूत्रेण विप्रादीनां मध्ये द्रव्यसम्पन्नोऽधिकारी । यागादिकर्म्मणो द्रव्यसाध्यत्वा-दिति पूर्व्वपक्षयित्वा ।

अनित्यत्वात्तु नैवं स्यात्

इत्यादिसूत्रेण धनसम्बन्धस्य अनित्यत्वात् द्रव्यसम्पत्तिरहितानामनधिकारो नेति सिद्धान्तितम् ।

अङ्गहीनश्च तद्धर्म्मा

इति सूत्रान्तरेण प्रतिसमाधेयाङ्गवैकल्यवतोप्यनधिकाराभाव इति दर्शितञ्च । तदनन्तरन्तु ।

उत्पत्तौ नित्यसंयोगादिति

सूत्रान्तरेण अप्रतिसमाधेयाङ्गवैकल्यवतोऽनधिकार एवेति सिद्धान्तितम् ।

उत्पत्तिविध्यादि चतुर्विधविधिनिरूपणमुपसंहरति तदेवमिति । विधिमन्त्र-नामधेय निषेधार्थवादभेदेन पञ्चविधत्वेनोद्दिष्टेषु वेदभागेषु विधिं निरूप्य क्रमप्राप्तं मन्त्रं निरूपयति प्रयोगसमवेतेति । प्रयोगसमवेतो अनुष्ठानोपयोगी यो अर्थस्तत्स्मारका-स्तदुपस्थापकाइत्यर्थः । प्रायिकमिदं लक्षणम् । अतएव न्यायमालायां केचिन्मन्त्रा अनुष्ठानस्मारकाः केचित् स्तुतिरूपाः केचित् प्रश्नरूपाः केचिदुत्तररूपा इत्येवमादीन् मन्त्रान् प्रदर्श्य ईदृशेष्वत्यन्तविजातीयेषु समाख्यानमन्तरेण नान्यः कश्चिदनुगतो धर्म्मो-ऽस्ति यस्य लक्षणत्वमुच्येत इत्यभिधाय तस्मादभियुक्तानां मन्त्रोऽयमिति समाख्यानं लक्षणमित्युक्तम् । शास्त्रदीपिकायामपि यानि प्रयोगकाले अनुष्ठानोपयिकार्थाभिधान-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**स्मारकत्वेनैवार्थवत्त्वं नतु तदुच्चारणमदृष्टार्थम्। सम्भवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात्। नच दृष्टस्यार्थस्मरणस्य प्रकारान्तरेणापि सम्भवान्मन्त्राम्नानं व्यर्थमिति वाच्यम्। मन्त्रैरेव स्मर्त्तव्यमिति नियमविध्याश्रयणात्।**

---

स्वरूपाणि वाक्यानि तानि मन्त्रशब्देनोच्यन्ते इत्यभिधाय प्रायिकमिदम् अभियुक्त प्रसिद्ध्युपलक्षणार्थम्। यत्राभियुक्तानां मन्त्रप्रसिद्धिः स मन्त्र इत्यभिहितम्। भाष्यवार्त्तिककारादयोऽप्येवम्। एवञ्च विकृतावूहितपदघटितादिमन्त्रस्य प्रयोगसमवेतार्थस्मारकत्वेऽपि न मन्त्रत्वम्। तथाविधवर्णघटितस्य मन्त्रत्वाप्रसिद्धेः। तदुक्तं पार्थसारथिमिश्रैः।

अभियुक्तप्रसिद्ध्या हि मन्त्रत्वमवकल्प्यते।
स्वाध्यायकाले तेषाञ्च समाम्नातेषु मन्त्रधीः॥
मन्त्रानध्यापयामोऽद्य तथामन्त्रानधीमहे।
समाम्नानवहिर्भूत ऊहादौ नास्ति मन्त्रधीः॥

ऊहितादि पदघटितवाक्यस्यामन्त्रत्वविचारफलन्तु

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु हि विभाग इति।

द्वितीयाद्यपादसिद्धान्तसूत्रव्याख्यायाम् अनाम्नातेषु ऊहितपदघटितवाक्येषु अमन्त्रत्वम्। यत्र आम्नातेषु वाक्येषु मन्त्रत्वेन विभाग इत्येवं सूत्राभिप्रायं प्रकाश्य भाष्यकारैर्दर्शितम् "प्रयोजनं मन्त्रे दुष्टे यत्प्रायश्चित्तममन्त्रेषु तन्नेत्यनेन वाक्येन।

तेषां प्रयोगसमवेतार्थस्मारकाणाम्। एतेन येषां हूं फडादीनां प्रयोगसमवेतार्थस्मारकत्वं नास्ति तेषामदृष्टमात्रार्थत्वमेवेति दर्शितं वक्ष्यतेच सुव्यक्तम्। उक्तञ्चान्यत्र

यस्य दृष्टं न लभ्येत तस्यादृष्टप्रकल्पनमिति।

अर्थवत्त्वं प्रयोजनवत्त्वम्। अदृष्टार्थमदृष्टमात्रार्थम्। तेन तदुच्चारणं दृष्टादृष्टार्थमिति सिध्यति। एवञ्च मन्त्रैरेवेति वक्ष्यमाणग्रन्थेन नियमविध्यङ्गीकारान्नियमापूर्व्वस्वीकारोऽपि सङ्गच्छते। अदृष्टफलेति। अदृष्टमात्रफलेत्यर्थः। प्रकारान्तरेण इदमेवं कुरु इत्याद्युपदेशवाक्यादिना। मन्त्राम्नानं मन्त्रोच्चारणम्। मन्त्रैरेवेत्यत्रकारेण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अस्यार्थः । प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्व्वविधिः । यथा यजेत स्वर्गकामइत्यादिः । स्वर्गार्थकयागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात् । पक्षे अप्राप्तस्य प्रापको विधिर्नियमविधिः । यथा व्रीहीनवहन्तीत्यादिः । कथमस्य पक्षेऽप्राप्तप्रापकत्वमितिचेत्, इत्थम् । अनेन ह्यवघातस्य वैतुष्यार्थत्वं न प्रतिपाद्यते अन्वयव्यतिरेकसिद्ध-

---

भावी द्रव्यवत् प्रकाश्यत इति न्यायात् कर्म्मत्वानुपपत्त्या अत्यन्तायामिति सामानाधिकरण्यापत्तेः । साधुः पाकः साधूपाकौ साधवः पाका इतिवत् । अप्राप्तेरत्यन्तसत्ता विधिमन्तरेण कादाचित्कप्राप्तेरप्यसत्ता । नियमस्थलेतु रागाभावात् तदानीमप्राप्तिसत्त्वेपि कालान्तरे विधिं विनापि रागवशाद-प्राप्तिर्नावतिष्ठत इति नात्यन्तिकी अप्राप्तिसत्तेति वैलक्षण्यम् । पाक्षिके अप्राप्ते इतिशेषः । तच्च तद्विधिप्रतिपाद्ये । अन्यत्र तदितरत्र । चकारद्वयं समुच्चयावश्यम्भावार्थम् । एतत् सर्व्वं सोदाहरणं व्याचष्टे अस्यार्थ इति । प्रमाणान्तरेण तत्प्रमाणभिन्नेन शास्त्रेण न्यायेन रागेण च । अप्राप्तस्य अनुपस्थितस्य कर्त्तव्यताबुद्धेरविषयस्येति यावत् । प्रापकः अनुष्ठेयत्वप्रतिपादकः । प्रापकपदं कारिकायामश्रुतमपि अप्राप्तप्रापकोविधिरिति सामान्यवाक्योपक्रमकतया लभ्यते । अपूर्व्वविधिः अपूर्व्वस्य प्रागननुभूतस्य विधिः ।

उदाहरति यथेति । स्वर्गार्थकेति । स्वर्गफलकेत्यर्थः । प्रमाणान्तरेण शास्त्रान्तरेण न्यायेन रागेण च । अप्राप्तस्य कर्त्तव्यताबुद्धेरविषयस्य । अनेन यजेतेति वाक्येन । विधानात् कर्त्तव्यताज्ञानोत्पादनात् । नियमः पाक्षिके सतीति व्याचष्टे पक्षे इति । रागाभावपक्षे इत्यर्थः । प्रापकस्तदसम्बन्धव्यवच्छेदेन आवश्यकता प्रतिपादकः । उदाहरति यथेति । अवहन्तीति । अवपूर्व्वकोहन्तिर्वैतुष्यानुकूलाघातविशेषार्थः । अत्र नियमविधित्वं सङ्गमयितुमादावाशङ्कते कथमिति । पक्षे इति । अप्राप्तेत्यकारदेशोऽन्वितम् । पक्षे अप्राप्तस्य प्रापकमित्यर्थः । आशङ्का-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



त्वात् । किन्तु नियमः, सचाप्राप्तांशपूरणम् । वैतुष्यस्य हि नानोपायसाध्यत्वाद्यदाऽवघातं परित्यज्य उपायान्तरं ग्रहीतुमारभते तदावघातस्याप्राप्तत्वेन तद्विधाननामकमप्राप्तांशपूरणमेवानेन विधिना क्रियते । अतश्च नियमविधावप्राप्तांशपूरणात्मको नियम एव वाक्यार्थः । पक्षे अप्राप्तावघातस्य विधानमिति यावत् ।

उभयोश्च युगपत् प्राप्तावितरव्यावृत्तिपरो विधिः परिसङ्ख्याविधिः । यथा पञ्च पञ्चनखा भक्ष्या इति । इदं हि

---

परिहाराय सङ्गमनप्रकारमाह इत्थमिति । इदम्प्रकारमित्यर्थः । अनेन अवहन्तीति वाक्येन । वैतुष्यार्थत्वम् तुषापाकरणप्रयोजनकत्वम् । अन्वयेति, अवघाते सति वैतुष्यं तद्व्यतिरेके च सतुषत्वमित्यन्वयव्यतिरेकाभ्यामवघातस्य वैतुष्यं प्रतिकारणतायाः प्रत्यक्षप्रमाणसिद्धत्वादित्यर्थः । नियमो नियमनम् । प्रतिपाद्यत इति पूर्व्वेणान्वयः । कस्तावन्नियम इत्यत्राह सचेति । अप्राप्तेति । अप्राप्तांशस्य पक्षतो अप्राप्तस्य अवघातस्य पूरणम् असम्बन्धव्यवच्छेदरूपमवश्यमाचरणम् । ननु वैतुष्यस्य अन्वयव्यतिरेकाभ्यामवघातजन्यत्वावधारणात् कुतो वैतुष्यार्थिनः पक्षतोऽप्यवघातस्याप्राप्तत्वसम्भव इत्यत आह वैतुष्यस्य हीति । नानोपायेति । अवघातेनेव नखदलनादिनापि वैतुष्यसम्भवेन परस्परनिरपेक्ष नानाकारणजन्यत्वादित्यर्थः । अनेकशक्तिमत्त्वेन तेषां कारणत्वात् कार्य्यगतवैजात्याङ्गीकाराद्वा न परस्परव्यभिचार इतिबोध्यम् । परित्यज्य अनाश्रित्य । उपायान्तरं नखदलनादिकम् । ग्रहीतुम् आश्रयितुम् । आरभते उद्युङ्क्ते । तद्विधाननामकम् तद्विधानस्वरूपम् । तर्हि कीदृशो विधिवाक्यार्थ इत्यत्राह अतश्चेति । विधेर्नियमार्थत्वादित्यर्थः । नियम एवेति । अवघातेनैव व्रीहीणां वैतुष्यम् साधयेदित्येवं रूप इत्यर्थः । यद्यपि नियमविधौ विधेयस्यावश्यम्भाव एव फलं न पुनरितरनिवृत्तिस्तथापि परस्परनिरपेक्षसाधनेष्वेकस्मिन् साधने अवश्याश्रयणीयत्वेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तत्र येषु क्रतुषु प्राकृतसङ्ख्यातोऽधिका स्तोममन्त्रसङ्ख्या विहिता ते विवृद्धस्तोमकाः। येषु क्रतुषु पुनर्न्यूना स्तोममन्त्रसङ्ख्या विहिता ते अविवृद्धस्तोमका उच्यन्ते। तेषु सर्व्वेषु प्राकृतानां साम्नां निवृत्तिर्नवेति संशये उपदेशेनातिदेशवाधस्य न्याय्यतया विकृतौ सङ्ख्याविशेषनिर्द्देशेन प्राकृतसाम्नां वाधएवेति पूर्व्वपक्षे दशमाध्यायचतुर्थपादे सिद्धान्तः। विवृद्धस्तोमकेषु प्राकृतसाम्नां न निवृत्तिरिति। तथाहि प्रकृतौ यस्मिन् स्तोमे यावत्य ऋचो गेयत्वेन विहितास्तावतीरेव विवृद्धस्तोमकेषु विकृतिक्रतुष्वागमय्य यावता ऋगन्तरेण गीतेनाधिकसङ्ख्या पूर्य्यते तावदप्यधिकम् गेयं स्यादिति नाधिकसङ्ख्याविधानवैयर्थ्यम्, येन प्राकृतवाधः स्यात्। तदवाधेनापि चरितार्थत्वात्।

अविवृद्धस्तोमकेषु तु क्रतुषु प्राकृतस्तोमानां मध्ये कासाञ्चिदृचां वाध एव। तथाहि तेषु प्राकृतानां सर्व्वेषां साम्नामागमे विकृतौ न्यूनसङ्ख्याविधानवैयर्थ्यमिति यावता निवृत्तेन वैकृतसङ्ख्या सम्पद्यते तावदेव प्राकृतं वाधितव्यम्, अन्यत् प्राकृतमेव स्यात्। तथाच सिद्धान्तसूत्रम्।

स्तोमविवृद्धौ त्वधिकम् स्यादविवृद्धौ—
द्रव्यविकारः स्यादितरस्याश्रुतित्वादिति॥

तदेतत् विवृद्धस्तोमके प्रकृतिसम्बन्धिनी ऋच उपादाय विकृतिनिर्द्दिष्टसङ्ख्यापूरणाय इतरासामृचामुपादानमावापः। अविवृद्धस्तोमके प्राप्तानां प्रकृतिसम्बन्धिनीनामृचां मध्ये विकृतिविहितसङ्ख्यानुरोधेन तावत्सङ्ख्यकऋच उपादाय इतरासां परित्याग उद्वाप उच्यते। एवञ्च वैकृतसङ्ख्यापूरणाय ऋगन्तरनिवेशनरूप आवापः किं यस्मिन् कस्मिंश्चित्स्तोमशब्दाभिधेयस्तोत्रे कर्त्तव्य उत पवमानाख्यस्तोत्र एव। तथा वैकृतसङ्ख्यानुरोधेन प्राप्तानां प्राकृतीनामृचां मध्ये कासाञ्चिदृचां परित्यागरूप उद्वापोऽपि किं यस्मात् कस्माच्चित्स्तोत्रात् कर्त्तव्य उत पवमानादेवेति संशये अविशेषादनियम इति पूर्व्वपक्षे प्राप्ते पवमान एवेति सिद्धान्तः। तथाच दशमाध्याय चतुर्थपादे पूर्व्वोक्ताधिकरणात् परमेव सिद्धान्तसूत्रम्।

"पवमानएव स्यातां तस्मिन्नावापोद्वापदर्शनादिति"। स्यातामावापोद्वापाविति शेषः। दर्शनादिति। तथाच श्रुतिः। त्रीणि ह वै यज्ञस्योदराणि गायत्री

१५

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् ।
प्राप्तस्य बाधादित्येवं परिसङ्ख्या त्रिदूषणेति ।

श्रुतस्य पञ्चनखभक्षणस्य हानात् । अश्रुतापञ्चनखभक्षणनिवृत्तेः कल्पनात् । प्राप्तस्य चापञ्चनखभक्षणस्य बाधनादिति । अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठम् । प्राप्तबाधस्त्वर्थनिष्ठ इतिदिक् ।

येषान्तु प्रयोगसमवेतार्थस्मारकत्वं न सम्भवति तदुच्चारणस्यानन्यगत्या अदृष्टार्थकत्वं कल्प्यतइति नानर्थक्यमिति ।

---

प्राप्तबाधस्य च शब्दशक्तिमहिम्ना जनितत्वेन दोषपदवाच्यत्वाभावात् । अन्यथा नीलं घटमानयेत्यादौ नीलपदेन घटान्तरव्यावृत्तेस्तत्रापि घटान्तरानयनबाधस्य दोषत्वापत्तेः । दोषत्रयं दर्शयति दोषत्रयश्चेति । श्रुतेति । श्रुतस्य शब्दप्रतिपन्नार्थस्य हानिः परित्यागः । अश्रुतेति । अश्रुतस्य शब्दाप्रतीतार्थस्य कल्पना । प्राप्तेति । प्राप्तस्य प्रमाणविशेषेण कर्त्तव्यतया प्रतीतस्य बाधो व्यवहारव्यावर्त्तनमित्यर्थः । तत्र प्रमाणमाह तदुक्तमिति । दोषत्रयमुदाहरणे योजयति । श्रुतस्येति । पञ्चनखभक्षणस्य पञ्चपञ्चनखभक्षणस्य हानात् त्यागात् । अपञ्चनखेति । शशकादिपञ्चनखेतरपञ्चनखेत्यर्थः । तेषां दोषाणां शब्दगतत्वमर्थगतत्वञ्च विवेचयति अस्मिंश्चेति । दोषद्वयं श्रुतहान्यश्रुतकल्पने । नच श्रुतहान्यश्रुतकल्पनयोः परस्परव्याप्यत्वात् कथं दोषद्वितयत्वेन ग्रहणम् । न हि गङ्गायां घोष इत्यादौ श्रुतार्थहानिमन्तरेणाश्रुतार्थकल्पना । अश्रुतार्थकल्पनामन्तरेणापि श्रुतार्थहानिः सम्भवतीतिवाच्यम् । अजहत्स्वार्थलक्षणास्थले श्रुतार्थहानिमन्तरेणापि अश्रुतार्थकल्पनादर्शनात्, अनुवादस्थले अश्रुतार्थकल्पनां विनापि श्रुतार्थहानेर्दर्शनाच्च तयोः परस्परव्याप्यत्वासिद्धेः ।

मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वेन दृष्टार्थत्वमुक्तमिदानीं तद्व्यभिचारमाह

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नामधेयत्वञ्च निमित्तचतुष्टयात् । मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाद्वेति । तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात् । तथाहि न तावदनेन वाक्येन फलंप्रति यागविधानं, तत्प्रति च गुणविधानं युज्यते । वाक्यभेदापत्तेः । उद्भिच्छब्दस्य गुणसमर्पकत्वे च यागस्याप्राप्तत्वात् गुणविशिष्टकर्म्मविधानं वाच्यम् । उद्भिदता पशुं भावयेदिति विशिष्टविधौ मत्वर्थलक्षणेत्युक्तमेव ।

---

ननूद्भिच्छब्दात् कुतस्तन्नामत्वं यागस्य प्रत्येतव्यमिति जिज्ञासायां हेतुमाह उद्भिदा यागेनेति । सामानाधिकरण्येन उद्भिद्यागपदयोरेकविभक्तिकत्वेन । नामधेयान्वयात् उद्भिच्छब्दस्य नामधेयरूपेणान्वयात् । नाम्नः सामानाधिकरण्येनान्वयस्य ऐरावतेन गजेन यातीत्यादौ व्युत्पत्तिसिद्धत्वादितिभावः । ननु सोमेन यजेतेत्यत्रापि सामानाधिकरण्येनान्वयकल्पनया नामधेयरूपेणान्वयोऽस्त्वित्यतो नामधेयत्वकल्पनानिमित्तमुपदर्शयति नामधेयत्वञ्चेति । निमित्तचतुष्टयादिति । तथाच वक्ष्यमाणनिमित्तचतुष्टयान्यतमसद्भाव एव सामानाधिकरण्येनान्वयकल्पनया नामधेयत्वं वाच्यमितिभावः । निमित्तचतुष्टयमाह मत्वर्थेत्यादि ।

उद्भिच्छब्दस्य यागनामधेयत्वे तेषां कतमन्निमित्तमित्यत्राह तत्रेति । तेषु निमित्तेषु मध्ये । मत्वर्थलक्षणां विशदयति तथाहीति । फलं प्रति पशुफलमुद्दिश्य । तं प्रति यागमुद्दिश्य । गुणविधानं व्रीहिभिर्यजेतेत्यत्रेव उद्भिद्रूपगुणविधानम् । यद्यपि उद्भिन्नामको वस्तुविशेषः कश्चिन्नास्ति लोकप्रसिद्धो यस्य यागकरणता सम्भवेत् । तथापि उद्भिद्यते भूमिरनेनेत्यवयवशक्त्या उद्भिच्छब्दः खनित्रवाची भवितुमर्हति । खनित्रेण यजेतेति वोधः सम्भवति चेतिभावः । वाक्यभेदापत्तेरिति । एकस्य उद्भिदा यजेतेति वाक्यस्य फलोद्देशेन यागविधायकत्वे तद्यागोद्देशेन उद्भिद्रूपद्रव्यविधायकत्वे च यागेन पशुं भावयेत् तच्च यागमुद्भिदाख्यद्रव्येण भावयेदित्येवं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वाक्यभेदापत्तेरित्यर्थः । ननु व्रीहिभि र्यजेतेत्यादाविव कथं न वाक्यैक्यसम्भव इत्यतो हेतुमाह उद्भिच्छब्दस्येति । गुणसमर्पकत्वे गुणबोधकत्वे । यागस्याप्य-प्राप्तत्वादिति । तथाच व्रीहिभिर्यजेतेत्यादे र्यागविशेषप्रकरणीयत्वेन तद्यागमनूद्य व्रीह्यादेः करणतामात्रस्य विधेयतया तत्र व्रीहिभिर्यागं भावयेदिति वाक्यैक्यसम्भवेपि उद्भिदा यजेतेत्यादे र्यागविशेषाप्रकरणीयत्वात् यागसामान्येच तत्तद्द्रव्यविशेषोपदेश-विरोधेन उद्भित्करणकत्वविधानासम्भवात् यस्मिन्नुद्भिदाख्यद्रव्यस्य करणत्वमभिमतं तद्यागस्याप्राप्तत्वेन विधेयत्वावश्यकत्वात् तद्यागस्यैव फलभावनायां करणत्वे-नान्वयो न तूद्भिदः । यागेनैव फलभावनायां करणाकाङ्क्षाया निवर्त्तितत्वात् । नापि यागे करणत्वेनोद्भिदोऽन्वयः सम्भवति, फलभावनाकरणत्वेनोपस्थितस्य यागस्य करणाकाङ्क्षाविरहात् । तस्मादेकेन वाक्येन फलभावनायां यागस्य करणत्वं यागे चोद्भिदः करणत्वं विधातुं न शक्यते । शक्यते तु यागेन पशुं भावयेत् यागञ्च उद्भिदा भावयेदिति वाक्यद्वयेनैवेतिभावः । तस्माद्वाक्यैक्यानुरोधेन उद्भिद्रूप-गुणविशिष्टयागविधानमेव भवता वाच्यमित्याह गुणविशिष्टेति । तच्चोद्भिद्विशिष्ट्य-मुद्भिच्छब्देन न प्रतिपादनीयमिति यागसामानाधिकरण्यार्थं वक्तव्यमित्यपि वक्तव्यमित्याह उद्भिद्वतेति । यागेनेतिशेषः । तर्हि भवदभिमतविशिष्टविधौ मत्वर्थलक्षणा स्फुटैवेत्याह विशिष्टविधाविति । उक्तमेवेति । "सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम् । सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोध" इति प्रागुक्तसन्दर्भेण प्रतिपादितमित्यर्थः ।

ननु व्रीहिभि र्यजेत सोमेन यजेतेत्यादावपि नामधेयत्वमेव स्यादितिचेन्न, व्रीह्यादिशब्दानां लोके द्रव्यविशेषवाचित्वेनात्यन्तनिरूढतया यागनामत्वासम्भवात् गुणविधित्वस्यैव युक्तत्वात् । सोमशब्दस्यापि प्रसिद्धार्थत्वेन नामधेयत्वासम्भवादगत्या प्रसिद्धार्थद्वारेण लाक्षणिकार्थमादाय गुणविशिष्टविधित्वौचित्यात् । उद्भिदा-यजेतेत्यत्रतु लक्षणाश्रयणमन्तरेणापि गतिसम्भवे कथं लक्षणाश्रयणम् । तदुक्तम् मिश्रैः ।

विशिष्टविधिपक्षेतु भवेन्मत्वर्थलक्षणा ।
सोमादौ गत्यभावात् सा, नत्वत्र, गतिसम्भवात् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चित्रया यजेत पशुकाम इत्यत्र चित्राशब्दस्य कर्म्मनामधेयत्वं वाक्यभेदभयात् । तथाहि न तावदत्र गुणविशिष्ट-

---

तस्मात् "श्रुतिलक्षणाविशये (१) श्रुतिर्बलीयसीति" भाष्यकारवचनात् शब्दप्रतिपादितार्थपरतया वाक्यार्थबोधे सम्भवति लक्षणाश्रयणस्यान्याय्यतया न गुणविधित्वमादरणीयं किन्तु यागनामधेयत्वमेव । नच गुणविधित्वे उद्भिच्छब्दस्य योगात् खनित्रपरता सम्भवति, नामधेयबोधकत्वे तु निरर्थकतैवेति कथम् श्रुत्या वाक्यार्थबोधसम्भव इति वाच्यम् । गुणविधिपक्ष इव उद्भिद्यते प्रकाश्यते फलमनेनेत्यवयवशक्त्या यागनामत्वसम्भवात् । एवमभिजिता यजेत विश्वजिता यजेतेत्यादावपि । आभिमुख्येन जयात्, विश्वजयाच्च अभिजिद्विश्वजिच्छब्दयोर्यजिसामानाधिकरण्यसम्भवात् अतएव उद्भिदा यजेतेत्यादिश्रुतौ ।

"अपि नामधेयं स्यात्"

इत्यादि सूत्रेण नामधेयत्वमेव सिद्धान्तितं प्रथमाध्यायचतुर्थपादे । तत्प्रयोजनञ्च अनेनाहं यक्ष्ये इत्यादिवाक्ये तत्पदप्रयोग इति दर्शितं तदधिकरणे भाष्यकारादिभिः ।

वाक्यभेदभयादित्युक्तस्य नामधेयत्वकल्पना निमित्तस्य प्रदेशं दर्शयति चित्रया यजेतेति । वाक्यभेदभयादिति । वाक्यभेदप्रसक्तेरित्यर्थः । तथाहि चित्राशब्दो विविधवर्णत्वं स्त्रीत्वञ्च बोधयति । विविधवर्णत्वस्यान्यवस्तुनिष्ठत्वे सम्भवत्यपि, स्त्रीत्वस्य प्राणीतरनिष्ठत्वासम्भवादग्नीषोमीयपशावेव चित्रवर्णत्वस्त्रीत्वे गुणौ विधीयेयातामनेन वाक्येनेति पूर्व्वपक्षे, यदि पशौ चित्रत्वस्त्रीत्वे विधीयेते, तदा गुणभेदाद्वाक्यभेदः स्यात् । चित्रं पशुमालभेत पशुकामः, स्त्रीपशुमालभेत पशुकाम इति । तथाचोक्तम्—

प्राप्ते कर्म्मणि नानेको विधातुं शक्यते गुणः ।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नत इति ॥

---

(१) विशये संशये ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**यागविधानं सम्भवति। दधि मधु पयो घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमित्यनेन गुणस्य विहितत्वात्तद्विशिष्टयागविध्यनुपपत्तेः। यागस्य फलसम्बन्धे गुणसम्बन्धे**

---

तस्मात् चित्रापदस्य प्रक्रान्तयागनामधेयत्वमेव चित्रया यजेतेति वाक्येन बोध्यत इति सिद्धान्तितं प्रथमाध्यायचतुर्थपादे भाष्यकारादिभिः। यद्यपि चित्रत्वविशिष्टस्त्रीलिङ्गैकमात्रगुणविधानस्यापि सम्भवेन न वाक्यभेदापत्ति स्तथापि तत्र गुणगौरवम् प्रकृतहानाप्रकृतप्रक्रिये च प्रसज्येयातामिति शास्त्रदीपिकान्यायमाले।

ननु तर्हि चित्राशब्दस्य कर्मनामधेयत्वं वाक्यभेदभयादिति स्वोक्तं कथं सङ्गच्छतामित्यतश्चित्रया यजेतेतिवाक्यस्य प्रक्रान्तप्राजापत्ययागसम्बन्धिसंज्ञाविधायकत्वमनभ्युपगम्य तद्यागीयगुणविधित्वाङ्गीकारेपि वाक्यभेदापत्तिर्दुर्वारेति दर्शनायाह तथाहीति। प्रथमं तावद्विशिष्टविधित्वम् निराकरोति न तावदिति। अत्र चित्रया यजेतेति वाक्ये। गुणविशिष्टयागेति, तेन यजेतेत्यत्रैव मत्वर्थलक्षणया विचित्रद्रव्यवतायागेन पशुं भावयेदिति प्राजापत्ययागस्योत्पत्तिविधिरित्यर्थः। गुणविशिष्टयागविधित्वासम्भवे हेतुमाह दधीत्यादि तद्विशिष्टयागविध्यनुपपत्तेरित्यन्तम्। पयो दुग्धम् उदकस्य पृथगुपादानात्। धाना भृष्टयवः। तत्संसृष्टमिति। संसृष्टं मिलितं तदस्तु प्राजापत्यं प्रजापतिदैवतामित्यर्थः। अत्र श्रुतौ उदकमिति माधवाचार्य्येण न पठितम्। दध्यादीनि विचित्राणि प्रदेयद्रव्याणि षडाम्नातानीत्यभिहितञ्च। भाष्यकृता शास्त्रदीपिकाकृता चोदकं पठितमिति ग्रन्थकृतापि अभियुक्ततमानुरोधेन तथा पठितम्। गुणस्य दध्यादिद्रव्यस्य। विहितत्वादिति। चित्रापदेन विचित्रद्रव्यत्वेन यद्यत् वस्तु भवता विधित्सितं तत्तद्वस्तुनो वाक्यान्तरेण स्वस्वपदेनैव विधानादित्यर्थः। तद्विशिष्टेति। तथाच अग्निहोत्रपदस्याग्निदेवताकत्वगुणविधायकत्वमिव तत्प्रख्यशास्त्रेण चित्रापदस्य विचित्रद्रव्यरूपगुणविधायत्वमपि निराकृतमिति न गुणविशिष्टयागविधिसम्भव इतिभावः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



च विधीयमाने वाक्यभेदः । तस्माच्चित्राशब्दः कर्म्मनामधेयम् । तथाच चित्रया यागेन पशुं भावयेदिति सामानाधिकरण्ये-नान्वयान्न वाक्यभेदः । प्रकृतेष्टेरनेकद्रव्यत्वेन चित्राशब्द-वाच्यत्वोपपत्तिः ।

अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्म्मनामधेयत्वं, तत्प्रख्यशास्त्रात् । तस्य गुणस्य प्रख्यापकस्य प्रापकस्य

---

एवञ्च चित्रया यजेतेत्यस्य नोत्पत्तिविधित्वसम्भवो द्रव्यदेवताप्रकाशकत्वाभावात् । किन्तु दधिमध्वित्यादिवाक्यस्यैवोत्पत्तिविधित्वं द्रव्यदेवताप्रकाशकत्वात् । चित्रा-वाक्यस्य तु उत्पत्तिविधिप्रकरणीयस्य संज्ञाविधायकत्वानङ्गीकारिभिः प्रक्रान्त-यागीयधर्म्मविशेषविधायकत्वमेवावश्यमभ्युपेयम् । तथा सति वाक्यभेदो भवत्ये-वेत्याह यागस्येति । प्रक्रान्तस्येतिशेषः । सम्बन्धे इति । उत्पत्तिविधौ फल-सम्बन्धाभावादाकाङ्क्षितस्यानेन वाक्येन विधानावश्यकत्वादितिभावः । यदितु फलसम्बन्धमात्रविधायकत्वमिष्यते, तदा चित्रयेत्यनर्थकमतस्तत्सार्थक्याय • यथा-कथञ्चिद्रूपेण विचित्रद्रव्यरूपगुणसम्बन्धविधायकत्वमपि भवता वाच्यमित्याह गुणसम्बन्धे चेति । तदा वाक्यभेदोऽवश्यम्भावीत्याह वाक्यभेद इति । यागेन पशुं भावयेत् यागञ्च चित्रया भावयेदित्येवं वाक्यभेद इत्यर्थः । एतस्माद्वाक्य-भेदान्नामधेयत्वमेव चित्राशब्दस्येत्याह तस्मादिति । दर्शितवाक्यभेदापादादित्यर्थः । नामधेयत्वपक्षे वाक्यभेदाभाव इत्याह तथाचेति । नामधेयत्वे चेत्यर्थः । चित्रया चित्रानामकेन । ननु तस्या इष्टेश्चित्रानामकत्वं कथमुपपद्यत इत्यत आह प्रकृतेष्टेरिति । प्राजापत्येष्टेरित्यर्थः । अनेकद्रव्यत्वेन संसृष्टदध्यादिनानाद्रव्य-कत्वेन । नानावर्णविशिष्टपटादेरिव नानाद्रव्यविशिष्टेष्टेरपि चित्रापदवाच्यत्व-मुपपद्यत इतिभाव. ।

तत्प्रख्यशास्त्रस्य नामधेयत्वकल्पनानिमित्तत्वोदाहरणमाह अग्निहोत्रमिति । नन्वयं गुणविधिरेव स्यान्न कर्म्मनामधेयमित्यत आह तत्प्रख्यशास्त्रादिति । तं



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**शास्त्रान्तरेण प्राप्तत्वात् । किन्तच्छास्त्रान्तरमितिचेत् । यदग्नये च प्रजापतये च सायं जुहोतीति केचित् । अपरेत्वग्निज्योतिर्ज्योतिरग्निः स्वाहेति मन्त्रवर्ण एवाग्निरूपदेवताप्रापकः । नन्वग्ने मान्त्रवर्णिकत्वे प्रजापतिर्देवतया वाधः स्यात् । मन्त्रवर्णस्य चतुर्थीतो दुर्ब्बलत्वात् । यथाहुः ।**

---

रिति सूत्रेण तदर्थादिभिरेव चतुर्थीसमासस्यानुशिष्टतया अत्र चतुर्थीसमासस्यानुशासन विरुद्धत्वाच्च । अतएव भट्टपादैः । न चतुर्थीसमासस्य लक्षणत्वात् इष्यत इत्यग्निहोत्रपदार्थविचारेऽभिहितम् । व्यधिकरणबहुब्रीहेस्तु बहुशोऽङ्गीकारान्नानुशासनविरुद्धता ।

अपिच अग्नये होत्रमिति समासाभ्युपगमे अग्निहोत्रं जुहोतीत्यत्र जुहोति होममात्रार्थः साङ्गयागार्थो वा । आद्ये होत्रपदपौनरुक्त्यम् । जुहोतीत्यनेनैव तत्सिद्धेः । द्वितीये च आरम्भादापरिसमाप्तेः साङ्गयागात्मकव्यापारनिचयस्य अग्निहोत्रेण सहाभेदान्वयानुपपत्तिः । नह्यसौ व्यापारनिचयात्मकः साङ्गयागो अग्नये होत्रमिति व्यपदेष्टुं शक्यते । नानाव्यापारघटितत्वात् । अग्नये होत्रमस्मिन्निति बहुब्रीहौ तु जुहोत्यर्थस्य होममात्रत्वाङ्गीकारे अन्वयासम्भवेपि साङ्गयागरूपत्वाभ्युपगमे सम्भवत्येवाभेदान्वयः । नानाव्यापारात्मके तस्मिन् अग्न्युद्देश्यकहोमस्यापि सत्त्वादिति । अत्रापि कल्पे तत्प्रापकस्य शास्त्रान्तरस्य सद्भावादानर्थक्यमेवेति निराकरणहेतुमाह तद्देवताया इत्यादि । शास्त्रान्तरमुपदर्शयितुमाह किन्तदिति । केचित् भाष्यकारादयः । अपरे शास्त्रदीपिकाकारादयः । अग्निहोत्रहोमे श्रूयते अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति, सूर्य्योज्योतिर्ज्योतिः सूर्य्यः स्वाहेति प्रातरिति । एताभ्यां श्रुतिभ्यां सायंप्रातर्होमयो र्यथाक्रमं मन्त्रौ विनियुक्तौ । तयोः सायं होममन्त्रएव तत्प्रापकशास्त्रमित्याह अग्निर्ज्योतिरिति । मन्त्रवर्णो मन्त्रघटकोऽग्निशब्दः । आशङ्कते नन्विति । मान्त्रवर्णिकत्वे मन्त्रघटकशब्दावगतत्वे । प्रजापतिर्देवतया यदग्नयेच प्रजापतयेच सायं जुहोतीति विधिवाक्यावगतया ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तद्धितेन चतुर्थ्या च मन्त्रवर्णेन वा पुनः ।
देवताया विधिस्तत्र दुर्व्वलन्तु परं परम् ॥

इति चेन्न । यदग्नये च प्रजापतये च सायं जुहोतीत्यत्र न केवलप्रजापतेर्विधानम् । किन्तु मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतेः । एवञ्च न वाधः केवल-

---

वाधोऽनुपस्थानम् । अग्नेरित्यन्वयः । मन्त्रस्याग्निपदाल्लक्षणया प्रजापतेरेवोपस्थितिरस्त्वित्याशयः । ननु मान्त्रवर्णिकेनाग्निना प्रजापतेरेववाधः कथम् न स्यादित्यत्र विनिगमनामाह मन्त्रसीति । तत्र प्रमाणमाह तद्धितेनेति । तद्धितेन सास्य देवतेत्यादिना विहिताण् प्रत्ययादिना । तस्य साक्षाद्देवताबोधकतया वलवत्त्वम् । चतुर्थ्यास्तु न देवतावाचकत्वं देवतार्थे तस्या अनुशासनविरहात् । सम्प्रदानएव तदनुशासनात् । एवञ्च प्रजापतिपदोत्तरं श्रूयमाणया तया स्वामित्वाजनकत्यागोद्देश्यत्वरूपानिराकर्त्तृकसम्प्रदानत्वबोधनात् तस्यच देवतात्वाव्यभिचाराद्देवताकल्पनमिति तद्धिताद्दुर्व्वला चतुर्थी । मन्त्रवर्णस्य तु धान्यमसीति धान्यपदे तण्डुललक्षणादर्शनाल्लाक्षणिकत्वस्यापि सम्भवेन चतुर्थीतो दुर्व्वलत्वम् । प्रमाणान्तरविरोधाभावनिश्चयानन्तरमनुमापकतया विलम्बेन देवताप्रतिपादकत्वादित्यर्थः । इदमुपलक्षणम् । लिङ्गात् श्रुतेर्वलवत्त्वेन चतुर्थीश्रुत्यवगतस्य प्रजापतेर्देवतात्वस्य लिङ्गावगताग्निबाधकत्वौचित्याच्चाग्नेर्वाध्यत्वमिति द्रष्टव्यम् । तथाच मन्त्रवर्णावगतस्याग्नेर्वाध्यत्वान्मन्त्रवर्णस्याग्निदेवताप्रापकत्वासम्भवेन न तत्प्रख्यशास्त्रत्वमित्याशङ्कार्थः । तामाशङ्कां निराकरोति नेति । केवलप्रजापतेः अग्निनिरपेक्षप्रजापतेः । अनूद्य अग्नयइत्यनेनोल्लिख्य । तत्समुच्चितेति । अग्निसमुच्चितेत्यर्थः । समुच्चयोऽत्र एकस्मिन् यागे द्वयोः सम्बन्धः । चकारद्वयेन प्रत्येकप्राधान्यद्योतनात् । नत्वग्नीषोमयोरिव साहित्यम् । साहित्यप्रतिपादकद्विवचवहुवचनद्वन्दसमासाश्रवणात् । प्रजापतेरिति । विधानमित्यनुसङ्गः । एवञ्चेति, उक्तरीत्या विरोधाभावेनेत्यर्थः । विरोधे हि वलीयसा दुर्व्वलं वाध्यते नत्वविरोधेपीतिभावः । केवलप्रजापतीति । तथाच

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रजापतिविधानाभावात् । नचात्र समुच्चितोभयविधानमेव कथं नेति वाच्यम् । समुच्चितोभयविधानापेक्षया अन्यतः प्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने लाघवात् ।

---

केवलप्रजापतिविधाने तु विरोधाद्याधावश्यम्भाव इतिभावः । ननु मन्त्रवर्णगतमग्निमनूद्य तत्समुच्चितप्रजापतिविधाने मानाभावात् समुच्चिताग्निप्रजापत्युभयविधानमेवास्तु । तथा सति केवलाग्नितोऽग्निसमुच्चितप्रजापतेर्विभिन्नतया विभिन्नदेवताप्रतिपादकत्वेन विरोधान्मन्त्रवर्णस्याग्निपदस्य अग्निसमुच्चितप्रजापतिपरत्वमस्तु । तत् कथं मन्त्रवर्णादग्निप्राप्तिरित्याशङ्कामपि परिहरति न चेति । अग्न्यनुवादेन तत्समुच्चितप्रजापतिविधानप्रमाणमेव परिहारकम् हेतुमाह समुच्चितेति । लाघवादिति । अग्न्यनुवादेन विधाने अग्नेर्विधेयकोठावनिवेशेन विधेयतावच्छेदक लाघवादित्यर्थः । अतः सिद्धं मन्त्रस्याग्निप्रापकत्वम् ।

ननु माभूत् सायं होमे अग्निदेवताविधिः । मन्त्रस्य तत्प्रापकत्वात् । प्रातर्होमेतु तत्प्रापकाभावादग्निदेवता विधायकत्वमस्त्वग्निहोत्रपदस्येतिचेन्न प्रातर्होमेपि सूर्य्यो ज्योतिर्ज्योतिःसूर्य्यः स्वाहेति प्रातर्जुहोतीति श्रुतिप्रतिपादितमन्त्रे यत्सूर्य्याय च प्रजापतये च प्रातर्जुहोतीति विधिवाक्येच प्रागुक्तरीत्या समुच्चितसूर्य्यप्रजापत्योर्देवतात्वावगमात् तदवरुद्धे प्रातर्होमे देवतान्तराकाङ्क्षाविरहेण अग्नेर्देवतात्वविधानासम्भवात् । प्रक्रान्तसायं प्रातर्होमानुवादेनाग्निदेवतारूपगुणविधेः सायं होमांशे अनुवादत्वस्य दुष्परिहरत्वाच्च । तथाचोक्तं भट्टपादैः ।

प्रातर्होमेपि तेनैष वह्निर्नैव विधीयते ।
एकदेशेऽपि च स्थानान्नानुवादोपगच्छति ॥

नचाविहितदेवताकेषु होमेषु देवताविधायकमग्निहोत्रं जुहोतीतिवाक्यं ननु सायं प्रातर्होम इति न तत्प्रख्यशास्त्रविरोध इति वाच्यम् । प्रक्रान्तहोममपहाय अन्यदीयगुणविधित्वे प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात् । तदुक्तम् तन्त्रवार्त्तिककारैः ।

अनूद्यचापि धात्वर्थं गुणः सर्व्वो विधीयते ।
नचानुवादः प्रकृतात् कर्म्मणोऽन्यत्र लभ्यते ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**एवं प्रयाजेषु समिदादिदेवतानां "समिधः समिधोऽग्न आज्यस्य व्यन्त्वि"त्यादि मन्त्रवर्णेभ्यः प्राप्तत्वात् समिधो यजतीत्यादिषु समिदादिशब्दास्तत्प्रख्यशास्त्रात् कर्म्मनामधेयानि ।**

---

प्रकृतश्चेदनूद्यायं गुणो होमे विधीयते ।

तत्र तत्प्रख्यताऽन्यत्र न विधिस्तत्परिग्रहात् ॥

तस्माद्देवतारूपगुणविधित्वाभ्युपगमे सायं प्रातर्होमविषयकत्वाङ्गीकारस्यावश्यकत्वात् तत्र च तत्प्रख्यशास्त्रान्तरसद्भावेनानुवादत्वापत्तेरग्नये होत्रमग्निहोत्रमिति योगेनाग्निहोत्रपदस्य सायं प्रातर्होमनामधेयत्वमेवेति सिद्धम् । तथाच प्रथमाध्यायचतुर्थपादे सिद्धान्तसूत्रम् ।

तत्प्रख्यञ्चान्यशास्त्रमिति ।

यतस्तत्प्रख्यं तस्य देवतारूपगुणस्य प्रकाशकं शास्त्रान्तरमस्ति अतस्तत्र तस्य पुनर्विधाने अनुवादत्वापत्तेरग्निहोत्रपदं प्रकान्तसायंप्रातर्होमनामधेयमेवेत्यर्थः । भट्टपादैरपि तत्राधिकरणेऽभिहितम् ।

विधित्सितगुणप्रापि शास्त्रमन्यद्यतस्त्विह ।

तस्मात्तत्प्रापनं व्यर्थमिति नामत्वमिष्यते ॥

अन्यत्रापि तत्प्रख्यशास्त्रात् कर्म्मनामधेयत्वं दर्शयति एवमिति । समिध इति हे अग्ने समिध आज्यस्य आहुतीर्व्यन्तु प्राप्नुवन्त्वित्यर्थः । मन्त्रवर्णेभ्य इति । तथाच समिधामाज्याहुतिभागित्वावगमात् तासामेव वेदमेयत्यागोद्देश्यत्वरूपदेवतात्वस्य मन्त्रवर्णप्राप्तत्वमितिभावः । समिधो यजतीत्यादिष्विति । आदिशब्दात्तनूनपातं यजतीत्यादि चतुर्णां ग्रहणम् । समिदादिशब्दा इति । अत्रायमाशयः । समिधो यजतीत्यादिषु समिदादिशब्दाः किं विष्णुं यजतीतिवत् देवतासमर्पकाः कर्म्मनामधेयानि वेति संशये देवताया मन्त्रवर्णप्राप्ततया तद्विधानस्यानर्थक्यात् समिदादिदेवतासम्बन्धियागत्वेन यागस्य समिदादिनामकत्वमेव समिदादिशब्दा बोधयन्तीति प्रथमाध्यायद्वितीयपादे सिद्धान्तितम् । तत्रापि तत्प्रख्यन्यायस्य निमित्तत्वमिति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**पङ्क्तिभिष्टाग्न्यादीनां बलीयस्त्वाद्विश्वदेवशब्दस्य विश्वदेव-देवताविधायकत्वं न सम्भवतीति कर्म्मनामधेयत्वम् ।**

**वस्तुतस्तु तत्प्रख्यशास्त्रादेवास्य कर्म्मनामधेयत्वम् ।**

---

श्चेति । तेषु प्रथमे पर्व्वणि अष्टौ यागा विहिताः । आग्नेयमष्टाकपालं निर्व्वपति, सौम्यं चरुं, सावित्रं द्वादशकपालम्, सारस्वतं चरुं, पौष्णं चरुं, मारुतं सप्तकपालम्, वैश्वदेवीमामिक्षां, द्यावापृथिव्यमेककपालञ्चेति । तेषामष्टानां यागानां सन्निधाविदमाम्नायते वैश्वदेवेन यजेतेति । तत्राग्नेयादीन् यागान् यजेतेत्यनेनानूद्य किं वैश्वदेवशब्देन देवतारूपोगुणस्तेषु विधीयते किम्बा तेषां नामधेयमिति संशये नामधेयत्वपक्षे नाम्नो विधेयत्वासम्भवात् यजेतेत्यस्यानुवादताया अङ्गीकृतत्वाच्च समस्तवाक्यस्यैवानुवादता स्यादतो देवतारूपगुणविधिरेव । यद्यपि वैश्वदेव्यामामिक्षायां विश्वेदेवा देवताः प्राप्ता स्तथापि आग्नेयादिषु सप्तसु अप्राप्तत्वाद्विधीयन्ते । तेष्वग्न्यादयो देवताः सन्तीति चेत् गत्यभावात् विश्वेदेवैर्विकल्पेन सन्तु । ननु एकएव शब्दः सप्तसु विधिरामिक्षायान्त्वनुवाद इत्यनुचितमेवेतिचेन्न यावदप्राप्तं तावद्विधीयत इति यत्राप्राप्तिस्तत्रैव विधानस्यादुष्टत्वात् । तथाचात्राधिकरणे तन्त्रवार्त्तिककाराणां पूर्व्वपक्षकारिका ।

प्रकृतत्वाविशेषेपि यत्र प्राप्तिर्न विद्यते ।
विधिस्तत्रोपसंहारान्न वैरूप्यं भविष्यति ॥

अत्रैव प्रथमाध्यायचतुर्थपादे पूर्व्वपक्षसूत्रम् ।

वैश्वदेवे विकल्प इति चेत् ।

तत्र सिद्धान्तसूत्रम् ।

न वा प्रकरणात् प्रत्यक्षविधानान्न नहि प्रकरणं द्रव्यस्येति ।

प्रकरणात् प्रत्यक्षविधानाच्च प्राप्तयोर्विकल्पो न भवितुमर्हति । हि यस्मात् प्रकरणं श्रुत्युक्तस्य द्रव्यस्य पदार्थस्य बाधने समर्थं न भवतीत्यर्थः ।

तथाहि अग्न्यादीनां देवतात्वं प्रत्यक्षश्रुतिबोधितम् । विश्वेषां देवानान्तु देवतात्वं वाक्येन बोधितमपि न साक्षात् । नहि आग्नेयादियागे विश्वेषां देवानां



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



देवतात्वप्रतिपादकम् वाक्यघटकपदमस्ति । वाक्येन विश्वेषां देवानां देवतात्वमात्रं बोध्यते । प्रकरणेन तु आग्नेयादिष्विति प्रतिपाद्यते । अतो विश्वेषां देवानामाग्नेयादिदेवतात्वं प्रकरणादेव प्राप्तम् । एवञ्च श्रुतिप्राप्तप्रकरणप्राप्तयोरतुल्यशिष्टतया न विकल्पः सम्भवति । विकल्पपक्षे एकेनापरस्य पाक्षिकबाधोऽवश्याभ्युपेयः । सचान्याय्यः प्रकरणेन श्रुत्युक्तपदार्थस्य बाधासम्भवादित्युत्पत्तिशिष्टाग्न्यादिदेवतारूपगुणस्य बलीयस्तया वैश्वदेवपदस्य देवतारूपगुणबोधकत्वासम्भवात् कर्म्मनामधेयत्वमेव । अतएवोक्तं भाष्यकृद्भिः । "नचायं विषमशिष्टो विकल्पो भवितुमर्हति । नहि प्रकरणं श्रुत्युक्तस्य द्रव्यस्य बाधने समर्थम् । तस्मात् कर्म्मनामधेय"मिति ।

वार्त्तिककारैरप्युक्तम् ।

गुणान्तरावरुद्धत्वान्नावकाशोगुणोऽपरः ।
विकल्पोपि न वैषम्यात् तस्मान्नामैव युज्यते ॥

कुत्स्नादेव प्रागुक्तनिमित्तात् वैश्वदेवशब्दस्य नामधेयत्वसिद्धौ निमित्तान्तरकल्पनायां गौरवादाह वस्तुतस्त्विति । तत्प्रख्यशास्त्रादित्येवकारेण उत्पत्तिशिष्टगुणबलीयस्त्वस्य नामधेयत्वकल्पनानिमित्तत्वं नास्तीति प्रतिपादितम् । अस्य वैश्वदेवशब्दस्य । नामधेयत्वम् आग्नेयाद्यष्टयागात्मकचातुर्मास्यप्रथमपर्व्वण इति शेषः ।

अत्रायमाशयः । अग्निहोत्रं जुहोतीति वाक्यस्याग्निदेवतारूपगुणविधायकत्वाङ्गीकारे यथा सायं होमे शास्त्रान्तरेणाग्निरूपदेवतायाः प्रतिपादनादनुवादकत्वम् । तत्प्रख्यञ्चान्यशास्त्रमिति सिद्धान्तसूत्रेण दर्शितम् । सायंहोमे अनुवादकतापत्त्या अवकाशमलभमानस्य तस्य सूर्य्यप्रजापतिदेवतावरुद्धप्रातर्होमेपि नावकाशयोग्यता । अविहितदेवताके यागान्तरेपि देवताविधाने प्रकरणबाधस्तथा प्रकृतेपि आग्नेयादिसङ्घान्तर्गतामिक्षायागे वैश्वदेवीमामिक्षामिति शास्त्रान्तरेण विश्वेषां देवानां देवतात्वप्राप्त्या वैश्वदेवेन यजेतेत्यस्य तत्र देवतारूपगुणविधायकत्वे अनुवादत्वं तत्प्रख्यशास्त्रेण द्रष्टव्यम् । आमिक्षायागे अवकाशमलभमानस्य तस्य आग्नेयादियागसप्तकेपि नास्त्यवकाशः । शास्त्रान्तरप्राप्ताग्न्यादिदेवतावरुद्धत्वात् । अविहित-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रकृतयागे विश्वदेवरूपगुणसम्प्रतिपन्नशास्त्रस्यार्थवादरूपस्यैव सत्त्वात्। यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्।**

---

देवताके यागान्तरेऽपि तद्विधायकत्वे प्रकरणबाध इति वैश्वदेवेन यजेतेत्यस्याग्निहोत्रं' जुहोतीत्यस्यैव तत्प्रख्यन्यायादेव नामधेयप्रतिपादकत्वमिति।

सूत्रभाष्यकाराभ्यां यदुत्पत्तिशिष्टगुणबलीयस्त्वं दर्शितं तदाग्नेयादियागसम्बन्धे अग्न्यादिभिः सह विश्वेषां देवानां देवतात्वविकल्पनिरासे निमित्तं न तु नामधेयत्वाङ्गीकारे। नामधेयत्वाङ्गीकारबीजन्तु तत्प्रख्यशास्त्रमेवेति तदाशयः। अतएव माधवाचार्य्यैरभिहितम्।

देवताविकल्पस्तु समानबलत्वान्न युज्यते। अग्न्यादय उत्पत्तिशिष्टत्वात् प्रबलाः। विश्वेदेवास्त्वनुत्पत्तिशिष्टत्वाद्दुर्ब्बला इत्यनेन सन्दर्भेण।

अधिकरणान्तररचनन्तु तत्प्रख्यन्यायस्यैव प्रपञ्चार्थम्। अतएव भाष्योपजीवके तन्त्रवार्त्तिके भट्टपादैरेतदधिकरणभाष्यव्याख्यानेऽभिहितम्। यथा—

तस्मादेकदेशस्थैरपि विश्वदेवैरुपलक्षितानां छत्रिन्यायेन तत्प्रख्यतयैव सर्व्वेषां नामधेयत्वमिति।

पार्थसारथिमिश्रैरपि एतदधिकरणोपसंहारे उक्तम्। यथा—

अत्र च यष्टृत्वयोगेन वा एकदेशदेवतात्वेन वा विश्वेषां देवानां समवायात् तत्प्रख्यन्यायेन नामधेयं वैश्वदेवशब्द इति।

नन्वेकयागतापन्नस्य सायं प्रातर्होमस्य एकदेशे सायंहोमे अग्निदेवताकहोमसत्त्वात् यथा अग्नये होत्रमस्मिन्निति योगादग्निहोत्रपदवाच्यत्वसम्भवस्तथा प्रकृते आग्नेयादीनामष्टानां यागानां वैश्वदेवपदवाच्यता कीदृशात् योगात् सम्भवेदिति वैश्वदेवपदप्रवृत्तिहेतुयोगापेक्षायां यद्यपि एकयागतापन्नस्य आग्नेयादीनामष्टानां यागानाम् सङ्घस्य एकदेशे आमिक्षायागे विश्वेषां देवानां देवतात्वात् गच्छतः सङ्घस्यैकस्य छत्रवत्त्वेपि छत्रिणो गच्छन्तीतिवत् वैश्वदेवत्वेन व्यपदेश्यत्वसम्भवादितीत्थम् हेतूपन्यासस्य सुकरत्वेपि ततोपि प्रबलं वैश्वदेवपदवाच्यत्वहेतुमुपन्यस्यति प्रकृतयाग इति। विश्वदेवरूपेति। विश्वदेवरूपगुणसम्बन्धे सम्प्रतिपन्नस्य तथाविध

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**पुरुषस्य निवर्त्तकं वाक्यं निषेधः । निषेधवाक्या-नामनर्थहेतुक्रियानिवृत्तिजनकत्वेनैवार्थवत्त्वात् । तथाहि**

---

गुणसम्बन्धबोधकत्वेन परिनिश्चितस्य शास्त्रस्येत्यर्थः । अर्थवादमाह यद्विश्वेदेवा इति । विश्वेदेवा यत् समयजन्त एतं यागसङ्घं कृतवन्त स्तत्‌विश्वेषां देवानां करणं वैश्वदेवस्य इदानीं वैश्वदेवशब्देन व्यपदिश्यमानस्य यागसङ्घस्य वैश्वदेवत्वं वैश्वदेवपदव्यपदेश्यतावीजमित्यर्थः । तथाच तस्मिन् यागे वैश्वदेवपदप्रवृत्तौ द्वौ हेतूसम्भवतः विश्वेषां देवानां तदेकदेशदेवतात्वम् तद्यागकर्त्तृत्वञ्च । तत्र पूर्व्वत्र च्छत्रिन्यायानुसरणमुत्तरत्र तु सर्व्वस्मिन्नेव यागे विश्वेषाम् देवानां कर्त्तृत्वा-त्तन्यायानुसरणमन्तरेणापि यागसङ्घे वैश्वदेवपदव्यवहारः सूपपन्न इतिभावः ।

एवञ्च प्राचीनप्रवणे वैश्वदेवेन यजेतेति पूर्व्वनिर्द्देशगुणविधायकादिषुत्पन्नेषु वैश्वदेवशब्देन वैश्वदेवनामकानामाग्नेयादीनामष्टानामेव यागानां समुदायस्य ग्रहणं भवति । गुणविधित्वे आमिक्षायागस्यैव वैश्वदेवीमामिक्षामिति स्पष्टश्रुति-सिद्धनियतविश्वदेवदेवताकत्वेन प्राचीनप्रवणदेशसम्बन्धः स्यान्नतु वैकल्पिकविश्वदेव-देवताकानामाग्नेयादि यागानां सप्तकस्येति नामधेयविचारफलम् । सर्व्वत्रैव नाम-धेयप्रयोजनम् अन्यत्र तत्पदप्रयोगात् तस्यैव ग्रहणम् । अनेनाहं यक्ष्ये इत्यभिलापे तत्पदोल्लेखश्च ।

नामधेयञ्च क्वचित्तृतीयान्तं क्वचित् द्वितीयान्तञ्च श्रूयते । तत्र तृतीयान्ते तृतीयार्थो अभेदः । यथा वैश्वदेवेन चित्रया उद्भिदेत्यादि । अभेदान्वयात् यागस्य वैश्वदेवाद्यभिन्नत्वप्रतीत्या वैश्वदेवाख्योयाग इत्यादि लभ्यते । द्वितीयान्ते तु द्वितीया क्रियाविशेषणे । तथापि स्वप्रकृत्यर्थस्य क्रियया सहाभेदो बोध्यते । यथा अग्निहोत्रं जुहोतीत्यादौ । हवनस्याग्निहोत्राभिन्नत्वप्रतीत्या हवनमग्नि होत्रनामकमित्यर्थो लभ्यते एव मन्यत्रापि द्रष्टव्यम् ।

उद्दिष्टेषु वेदभागेषु क्रमप्राप्तं निषेधं लक्षयति पुरुषस्येति । निवर्त्तकं प्रतिषिध्य-मानक्रियाप्रवृत्तिप्रतिबन्धकम् । निषेधस्य निवर्त्तकत्वे प्रमाणमाह निषेधवाक्यानामिति अनर्थेत्यादि । अनर्थहेतुरनिष्टजनिका या क्रिया तन्निवृत्तिजनकत्वेन तद्विषयक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ननु निषेधवाक्यस्य कथं निवर्त्तनाप्रतिपादकत्वमिति चेत् उच्यते। न तावदत्र धात्वर्थस्य नञर्थेनान्वयः। अव्यवधानेपि तस्य प्रत्ययार्थभावनोपसर्ज्जनत्वेनोपस्थितेः। नह्यन्योपसर्ज्जनत्वेनोपस्थितमन्यत्रान्वेति। अन्यथा राजपुरुषमानयेत्यादावपि राज्ञः क्रियान्वयापत्तेः। अतः

---

मैहिकसुखविगमहेतुत्वादिति निषेध्यस्यानिष्टजनकत्वाद्येपेपि निवर्त्तनमसुकरमित्यत उक्तं परेति। बलवदित्यर्थः। तथाच ऐहिकक्षणिकसुखविगमरूपानिष्टापेक्षया पारलौकिकनरकादिरूपानिष्टस्य बलवत्तया तस्मिन् प्रतिपादिते पुरुषप्रवृत्तिप्रतिबन्धः सुकर एवेतिभावः। आक्षिपन् निषेध्यस्य बलवदनिष्टसाधनत्वाभावे निषेधस्य निवर्त्तकत्वानुपपत्तिरित्यर्थापत्त्या बोधयन्। ततो निषिध्यमानात्। निवर्त्तयति प्रवृत्तिप्रतिबन्धमुत्पादयति।

ननु विधिः प्रवर्त्तना। विधौ लिङोऽनुशासनात् लिङ्पदघटितवाक्यश्रवणादेव प्रवर्त्तकत्वधीरुत्पद्यताम्। निषेवाक्यश्रवणात्तु निवर्त्तकत्वज्ञानोत्पत्तौ बीजाभावात् कथम् निषेधस्य निवर्त्तनाप्रतिपादकत्वमिति पृच्छति नन्विति। इति चेदिति पृच्छसीति शेषः। अत्र प्रश्ने प्रतिवक्ति उच्यत इति, निवर्त्तनाप्रतिपादकत्वप्रकारमाह न तावदिति। अत्र निषेधवाक्ये धात्वर्थस्य भक्षणस्य नञर्थेन अभावेन। नान्वय इति। प्रतियोगितयान्वयो न सम्भवतीत्यर्थः। ननु भक्षयेदित्यत्र नञ्पदभक्षधात्वोरव्यवधानात् तदर्थयोरप्यव्यधानेनोपस्थितत्वेन कथं परस्परं नान्वय इत्यत आह अव्यवधानेपीति। तस्य धात्वर्थस्य प्रत्ययार्थेति। प्रत्ययार्थेन आख्यातार्थेन भावनया उपसर्जनत्वेन विशेषणभावेनान्वितत्वेनोपस्थितेरित्यर्थः। भावनोपसर्जनत्वेनोपस्थितस्य नञर्थेनान्वयबाधे हेतुमाह नहीति। यतो विशेषणभावेनेतरान्वितत्वेनोपस्थितस्यान्येनान्वयो न भवतीतिव्युत्पत्तिसिद्धमत इत्यर्थः। एतद्व्युत्पत्त्यनङ्गीकारे दोषमाह अन्यथेति। क्रियान्वयापत्तेरिति। आनयनक्रियान्वयापत्तेरित्यर्थः। तथाच यथा राज्ञः सम्बन्धित्वेन पुरुषेणान्वयात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



**प्रत्ययार्थस्यैव नञर्थेनान्वयः। तत्रापि नाख्यातत्वांशवाच्यार्थभावनायाः। तस्या लिङंशवाच्यप्रवर्त्तनोपसर्जनत्वेनोपस्थितेः। किन्तु लिङंशवाच्यशाब्दभावनायाः। तस्याः सर्व्वापेक्षया प्रधानत्वात्। नञस्यैष स्वभावो यत् स्वसमभिव्याहृत-**

---

कर्म्मतया आनयनक्रियान्वयस्य आकाङ्क्षाभावेनायोग्यत्वं तथा भक्षणेन भावयेदिति भक्षणस्य करणत्वेन भावनया अन्वयादाकाङ्क्षाविरहेण प्रतियोगितया नञर्थाभावेनान्वयो न सम्भवतीतिभाव.।

तर्हि नञर्थेन कस्यान्वय इत्यत्राह अत इति। यतो धात्वर्थस्यान्वययोग्यता नास्ति अत इत्यर्थः। प्रत्ययार्थस्यैवेति। भक्षयेदित्यत्र धात्वर्थप्रत्ययार्थाभ्यामन्यस्यार्थस्यानुपस्थितेरितिभावः। ननु भावयेदिति लिङर्थोऽपि द्विविधः शाब्दीभावना आर्थीभावनाच। तयोर्मध्ये शाब्दभावनाया आर्थभावनाया वा नञर्थेनान्वय इत्यत्राह तत्रापीति। प्रत्ययार्थयोर्मध्येपीत्यर्थः। आख्यातत्वांशेति आख्यातत्वरूपसामान्यधर्म्मावच्छिन्नत्वांशेन वाच्या या आर्थभावना तस्या नञर्थेनान्वयो नेत्यर्थः। अनन्वये हेतुमाह तस्या इति। लिङंशेति। लिङ्त्वरूपाख्यातत्वव्याप्यधर्म्मावच्छिन्नत्वांशेन वाच्या या प्रवर्त्तना शाब्दभावना तदुपसर्जनत्वेन तद्विशेषणविधया अन्वितत्वेनेत्यर्थः। तथाच पूर्व्वोक्तयुक्तेरन्योपसर्जनत्वेनोपस्थितस्यान्येनान्वयो न सम्भवतीति भावः। तर्हि नञर्थेन कस्यान्वय इत्यपेक्षायामाह किन्त्विति। लिङंशेति लिङंशवाच्या या शाब्दभावना प्रवर्त्तनारूपा तस्या इत्यर्थः। ननु तस्या अपि केनाप्यन्वितत्वे पूर्व्वोक्तयुक्त्या नञर्थेनान्वययोग्यता न स्यादित्यत आह तस्या इति। सर्व्वापेक्षयेति। धात्वर्थाख्यातार्थापेक्षयेत्यर्थः। प्रधानत्वादिति इतरोपसर्जनत्वेनानुपस्थितत्वादितिभावः। तथाच लिङर्थशाब्दभावनाया धात्वर्थकरणकेष्टभावनाकर्म्मकभावनारूपत्वेन विशेष्यतया इतरानुपसृष्टत्वम्। धात्वर्थस्य करणतयार्थभावनायां तस्याश्च कर्म्मतया शाब्दभावनायामन्वयादुपसृष्टत्वम्। पुरुषो धात्वर्थेनेष्टं भावयति। लिङ्तु तां भावनां भावयतीतिबोधावश्यम्भावादित्याशयः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यदा तु प्रत्ययार्थस्य तत्रान्वये वाधकं तदा धात्वर्थस्यैव तत्रान्वयः। तच्च वाधकं द्विविधं तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च। तत्राद्यं नेचेतोद्यन्तमादित्यमित्यादौ। तस्य व्रतमित्युपक्रम्यैतद्वाक्यपाठात्। तथाचात्र पर्य्युदासाश्रयणम्। तथाहि व्रतशब्दस्य कर्त्तव्यार्थे रूढ़त्वात् तस्य व्रतमित्यत्र स्नातकस्य व्रतानां कर्त्तव्यत्वेनोपक्रमात् किन्तत् कर्त्तव्यमित्याकाङ्क्षायां नेचेतोद्यन्तमित्यादिना कर्त्तव्यार्थएव प्रति-

---

श्रुतेरिति। भचणस्य लिङ्र्थभावनया यः सम्बन्धः स श्रुत्यावगम्यते तस्यैकान्ततो वाध इत्यर्थः।

अन्यत्रोक्तं तत्रैव। "भचयेदिति पदं परिपूर्णं नञा सम्बध्यते भचयेन्नेति। भचयेदिति च भचणभावनायां प्रवर्त्तना गम्यते। नञा सम्बद्धेन विधिना तद्विपरीतनिवर्त्तनाप्रतीतिः। निवर्त्तनाच निवृत्तिफलीव्यापार"इति।

लिङर्थशाब्दभावनाया नञर्थेनान्वयवाधे क्वचिद्धात्वर्थस्याप्यन्वय इत्याह यदात्विति प्रत्ययार्थस्य शाब्दभावनायाः। तत्र नञर्थे। किं तद्वाधकमित्यवाह तच्चेति। द्वैविध्यमुपदर्शयति तस्येत्यादि। विकल्पप्रसक्तिर्विकल्पप्राप्तिः। आद्यम् तस्य व्रतमित्युपक्रमरूपं वाधकम्। इत्यादीत्यादिपदात् नास्त यान्तमित्यादि वाक्यपरिग्रहः। एतद्वाक्येति। नेचेतोद्यन्तमादित्यमित्यादिवाक्येत्यर्थः। तथाच एतेषां व्रतत्वकीर्त्तनवलात् कर्त्तव्यताप्रतीतेः प्रत्ययार्थस्य नञर्थेनान्वयो न सम्भवति निषेधत्वापत्तेः। अतो धात्वर्थस्यैव नञर्थेनान्वयोऽवश्याभ्युपेय इतिभावः। तदेव विशदयति तथाचेति। धात्वर्थस्य नञर्थेनान्वये चेत्यर्थः। पर्य्युदासेति पर्य्युदासस्य नञो अन्योन्याभावरूपार्थस्य आश्रयणमङ्गीकार इत्यर्थः। पर्य्युदासाश्रयणात् व्रतत्वोपपत्तिर्यथा भवति तदुपदर्शयति तथाहीति। कर्त्तव्यार्थे सङ्कल्परूपे। कर्त्तव्यत्वेनेति। व्रतस्य भावपदार्थत्वादितिभावः। किन्तदिति। तत् व्रतरूपं कर्त्तव्यं कर्म्म किमित्याकाङ्क्षायामित्यर्थः। कर्त्तव्यार्थ एवेति। स्नातकव्रतप्रदर्शनाय

१८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पादनीयः। अन्यथा पूर्व्वोत्तरवाक्ययोरेकवाक्यत्वं न स्यात्। तथाच नञर्थेन न प्रत्ययार्थान्वयः कर्त्तव्यार्थानवबोधात् विध्यर्थप्रवर्त्तनाविरोधिनिवर्त्तनाया एव तादृश-नञा बोधनात् तस्याश्च कर्त्तव्यार्थत्वभावात्। तस्मान्ने-क्षेतेत्यत्र नञा धात्वर्थविरोध्यनीक्षणसङ्कल्प एव लक्षणया

---

प्रतिपादनीयानां नेक्षेतेत्यादीनां कर्त्तव्यार्थत्वाङ्गीकारावश्यकत्वादितिभावः। अन्यथा नेक्षेतेत्यादीनां निषेधत्वाङ्गीकारे। पूर्व्वोत्तरवाक्ययोः उपक्रमतदुत्तरवाक्ययोः। एकवाक्यत्वमेकतात्पर्य्यकत्वम्। नस्यादिति। स्नातकस्य कर्त्तव्यकर्म्माण्यभि-धीयन्ते इत्युपक्रमवाक्यतात्पर्य्यम्। उत्तरवाक्ये च कर्म्मणामकर्त्तव्यत्वे तात्पर्य्यमिति तात्पर्य्यभेदादितिभावः। तथाचेति। पूर्व्वोत्तरवाक्ययोरेकतात्पर्य्यकत्वाभावे सतीत्यर्थः। अन्वये बाधकमाह कर्त्तव्यार्थेति। कर्त्तव्यार्थानवगमे हेतुमाह विध्यर्थेति। तादृशनञा प्रत्ययार्थान्वितनञा। तस्या निवर्त्तनायाः। धात्वर्था-न्वयमुपसंहरति तस्मादिति। धात्वर्थविरोधीति। यद्यपि पर्य्युदासाश्रयणाद्दर्शने-तरस्यैव प्राप्तिस्तथापि दर्शनेतरयावत्कर्म्मणोऽनुष्ठानासम्भवात् कर्म्मविशेषस्य च विधिं विनापि प्राप्तेरीक्षणविरोधिरूपस्य ईक्षणेतरस्य ग्रहणमितिभावः। सचेक्षणविरोधी ईक्षणेतरपदार्थः क इत्यत्राह अनीक्षणसङ्कल्प इति। कङ्कल्पः कर्म्ममानसमित्युक्तेर्मानसव्यापारविशेषः सङ्कल्पः। सच भावपदार्थे यागादौ मयैतत्कर्त्तव्यमिति निश्चयः। अभावपदार्थे च मयैतन्नकर्त्तव्यमितिनिश्चयः। प्रकृतेच अभावस्थलीयत्वात् उद्यदादित्यादिदर्शनं मया न कर्त्तव्यमितिनिश्चय एवानीक्षण सङ्कल्पः। ननु पर्य्युदासोऽन्योन्याभावः स च भेदापरनामा। तथा सति धात्वर्थान्वितेनापि नञा धात्वर्थभेदमात्रं प्रतीयतां कथं तद्विशिष्टपर्य्यन्तानु-धावनम्। प्रकृते भेदविशिष्टपर्य्यन्ताप्रतीतौ अनीक्षणसङ्कल्पप्राप्त्यनुपपत्तिः। नह्यनीक्षणसङ्कल्प ईक्षणभेदपदार्थः। किन्तु ईक्षणभेदविशिष्ट एवेत्यत आह लक्षणयेति। लक्षणाचेयमनादिप्रयोगयोगित्वेन निरूढा। अतएव निषेधएव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तथाहि यद्यत्र वाक्ये नञर्थे प्रत्ययार्थान्वयः स्यात्तदानुयाजेषु ये यजामह इति मन्त्रस्य प्रतिषेधः स्यात् अनुयाजेषु ये यजामहं न कुर्य्यादिति। सच प्राप्तिपूर्व्वकएव प्राप्तस्यैव प्रतिषेधात्। प्राप्तिश्च यजतिषु ये यजामहं करोतीति शास्त्रादेव वाच्या। शास्त्रप्राप्तस्य प्रतिषेधे विकल्प एव नतु वाधः। प्राप्ति मूलरागस्येव तन्मूलशास्त्रस्य शास्त्रान्तरेण वाधायोगात्।

---

वाधकत्वमिति। ननु कथमत्र नञर्थेन प्रत्ययार्थान्वये विकल्पप्रसक्तिरित्यत स्तां दर्शयति तथाहीति। प्रतिषेधः स्यादिति। प्रत्ययार्थप्रवर्त्तनाया नञर्थेनान्वये प्रवर्त्तनाविरोधिनिवर्त्तनायाः प्रतीतेर्वाक्यस्य येयजामहनिवर्त्तकत्वापातादितिभावः। निषेधप्रकारं दर्शयति अनुयाजेष्विति। निषेधत्वे काहानिरित्याकाङ्क्षायां निषेधस्य प्राप्तिपूर्व्वकत्वनियमं प्रतिपादयति सचेत्यादि। प्राप्तस्यैवेति। प्राप्तं हि प्रतिषिध्यत इति न्यायात् प्राप्तिमन्तरेण निषेधासम्भवादितिभावः। भवतु निषेधस्य प्राप्तिपूर्व्वकत्वं तेन किमित्यचाह प्राप्तिश्चेति। शास्त्रादेवेति। कष्टं कर्म्मेति न्यायेन अदृष्टार्थकर्म्मणोरागात् प्राप्त्यसम्भवादितिभावः। यदि तु शास्त्रादेव प्राप्तौ प्रतिषेध इत्यङ्गीक्रियते तदा विकल्पापत्तिर्दुर्व्वारेत्याह शास्त्रप्राप्तस्येति। न वाध इति। सामान्यप्रमाणप्रतिपन्नस्य येयजामहमन्त्रपाठस्य कर्त्तव्यताप्रतिवन्धीनेत्यर्थः। ननु न कलञ्जं भक्षयेदित्यादिना रागप्राप्तस्येव येयजामहमन्त्रपाठस्य वाधः कुतो नस्यादित्यत आह प्राप्तिमूलरागस्येवेति। प्राप्तिमूलं प्रापको योरागस्तस्येवेत्यर्थः। प्रापकस्य रागस्य यथा शास्त्रेण वाधः प्रापकस्य शास्त्रस्य शास्त्रान्तरेण तथा वाधो न युक्त एवेतिभावः। तेन च द्वयोरेव शास्त्रप्रमाणत्वेन तुल्यवलतया एकेनापरस्य नित्यवद्वाधितुमशक्यत्वात् पाक्षिकवाधेन द्वयोः प्रवृत्त्या विकल्प एव प्रसज्यत इति सिद्धम्। तथाचोक्तं दशमाध्यायाष्टमपादेभाष्यकारैः।

प्रतिषेधो विधिं वाधित्वा भविष्यति विधिरपि प्रतिषेधमिति। तथा तदा विधिर्यदा न प्रतिषेधः। तदा प्रतिषेधो यदा न विधिरिति च।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मित्यस्यापेक्षणान्न निरपेक्षत्वम्। तस्माच्छास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्पएव। सच न युक्तः। विकल्पे

---

नास्तीति प्रश्नसम्भावनायामाह प्रकृतेत्विति। निषेधशास्त्रस्य नानुयाजेष्वित्यस्य। निषेध्येति। निषेध्यस्य येयजामहमन्त्रपाठस्य प्रसक्त्यर्थं प्राप्त्यर्थं सामान्यशास्त्रजन्य कर्त्तव्यताप्रतीत्युपस्थित्यर्थमिति यावत्। पुरुषस्य यद्विषककर्त्तव्यताप्रतीतिरेव नास्ति कथमसौ तस्मान्निवृत्तये प्रेर्य्येतेतिभावः। अपेक्षणादिति। यस्मात् पुरुषो निवर्त्यते सामान्यशास्त्रविषयतामन्तरेण तस्य तत्कर्म्मकर्त्तव्यताप्रतीतेरेवाभावादिति भावः। न निरपेक्षत्वमिति। निरपेक्षत्वात् पदाहवनीयवत् वाध्यवाधकभावो नास्तीत्याशयः। यदि वाध्यवाधकभावो नोपपद्यते तदा सुतरां विकल्प एवेत्याह तस्मादिति। वाध्यवाधकत्वाभावादित्यर्थः। विकल्प एवेति। अयमाशयः। वाधो नाम प्रतीतस्य पदार्थस्य व्यवहारप्रतिवन्धः। सच प्राप्तवाधो अप्राप्तवाधश्चेति द्विविधः। तत्र व्यवहार्थ्यतया प्रमाणविशेषप्रतीतार्थस्य व्यवहारप्रतिवन्धः प्राप्तवाधः। यथा ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यादौ। तत्र हि ब्राह्मणेभ्यो दधि दीयतामिति प्रमाणेन कौण्डिन्यायापि देयत्वेन प्रतीतस्य दध्न स्तक्रं कौण्डिन्यायेति विशेषोपदेशेन कौण्डिन्ये झटितिविषयीकुर्व्वता दधिविधेस्तक्रावरुद्ध-कौण्डिन्येतरपरताज्ञानमुत्पादयताच कौण्डिन्ये दध्नो व्यवहारनिरोधः क्रियते। नतु प्रत्यायकप्रमाणमप्रमाणीक्रियते येन दध्नः प्रमाणाप्रतीतत्वं स्यात्। तस्य प्रमाणत्वे तदितरब्राह्मणेभ्योपि दधिदानानुपपत्तेः। किन्तु तज्जन्यकौण्डिन्यपर्य्यन्त प्रतीतेरेव भ्रमत्वं कल्प्यते। एवं विशेषस्य विधिरूपत्वे सर्व्वत्रैव प्राप्तवाधः।

अप्राप्तवाधस्तु व्यवहार्थ्यतया प्रमाणविशेषप्रतिपन्नवद्भासमानस्य वस्तुतः प्रमाण-विशेषाप्रतिपन्नार्थस्य व्यवहारप्रतिवन्धः। यथा नेदं रजतं शुक्तिरेवेयमित्यादौ। यतस्तत्र चक्षुःसन्निकर्षात् रजतत्वेन प्रतीतस्य वस्तुनः परभावितया वलीयसा शुक्ति-ज्ञानेन रजतत्वप्रतीतिजनकपूर्व्वप्रत्यक्षस्य प्रमाणाभासीकृतत्वेन रजतत्वव्यवहार-प्रतिवन्धः क्रियते। प्रतीतेस्तावत् भ्रमत्वं कल्प्यत एव। अतो रजतस्य प्रमाणविशेष प्रतीतत्वाभावादप्राप्तवाध एव सुघटः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



तदयं निष्कर्षः । यत्र प्रमाणान्तरेण पूर्व्वप्रमाणस्य न प्रमाणत्वनिराकरणं, केवलं तज्जन्यज्ञानस्यैव भ्रमत्वकल्पनं तत्र प्रमाणप्रतीतार्थव्यवहारनिरोधात् प्राप्तबाधत्वम् । यत्र तु प्रमाणान्तरेण पूर्व्वप्रत्यायकस्य प्रमाणाभासीकरणं तज्जन्यप्रतीतेश्च भ्रमत्व-कल्पनं तत्र प्रमाणाप्रतीतार्थव्यवहारप्रतिबन्धादप्राप्तबाधत्वमिति ।

सच द्विविधोपि बाधः प्रकृते न सम्भवति । तथाहि अनुयाजे येयजामहबाधो न तावदप्राप्तबाधः । अनुयाजवाक्येन येयजामहविधेरप्रमाणीकरणाशक्तेः । तस्य प्रमाणाभासीकृतत्वे यागान्तरेपि येयजामहविधानानुपपत्तिः । अतो अनुयाजे येयजामहकरणस्य प्रमाणाप्रतीतार्थत्वाभावेन तद्बाधस्याप्राप्तबाधत्वं नोपपन्नम् । नापि प्राप्तबाधः । नहि अनुयाजे येयजामहकरणविषयकप्रतीतौ निषेधसहस्रेणापि भ्रमत्वं कल्पयितुं शक्यते । नच झटिति प्रवर्त्तमानो निषेधः स्वप्रतिपाद्ययेयजामहा-भावावरुद्धमनुयाजं विषयमलभमानस्य येयजामहकरणविधेस्तदितरपरत्वं बोधयन् तद्विधिजन्ययेयजामहकरणप्रतीतौ भ्रमत्वं कल्पयत्येवेति वाच्यम् । अनुयाजे येयजामहविधेः प्रवृत्तेः प्राक् निषेध्यसमवधानाभावेन निषेधप्रवृत्त्यसम्भवादित्युक्तमेव ।

नच माभूद्बाधस्तथापि न विकल्पः सम्भवति । येयजामहविधेरनुयाजेतरविषयत्व एव तात्पर्य्यमितिवाच्यम् । सामान्यविधेस्तदितरविषयकत्वे अनुयाजे विधि-प्रवृत्त्यभावादेव येयजामहकरणस्याप्राप्तौ स्वच तन्निषेधस्य रात्रौ सूर्य्यं न पश्येदितिवत् प्रमत्तगीततापत्तेः । नच येयजामहविधेरनुयाजेतरपरत्वतात्पर्य्यानवबोधनिबन्धनस्य अनुयाजे येयजामहकरणस्य सम्भावितस्यावारणीयतया विधेरनुयाजेतरपरत्व तात्पर्य्यग्राहकमेव निषेधवाक्यमिति वाच्यम् । निषेधस्य प्रतियोगिसापेक्षतया निषेधवाक्यस्य स्वविषये प्रतियोगिप्रापकयत्किञ्चित्प्रमाणसत्ताया एवानुमापकत्वेन प्रापकप्रमाणस्य तदितरविषयकत्वतात्पर्य्यग्राहकत्वासम्भवात् । पर्य्युदासपक्षेतु अनुयाजेतरत्व यागेषु येयजामहं करोतीत्येकवाक्यतया सामान्यशास्त्रस्य तदितर-विषयत्वं सुघटम् ।

ननु विकल्पपक्षेपि कथं पाक्षिकबाधः स्यात् । तत्प्रापकप्रमाणस्याप्रमाणी-करणासम्भवात् तज्जन्यप्रतीतौ भ्रमत्वकल्पनानुपपत्तेश्चेतिचेन्न । उभयोरेव तुल्य-प्रमाणबोधितत्वेन द्वयोरेव पालनीयतया अगत्या एकस्य प्रमाणस्य पक्षतोऽप्रमाणत्व-



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शास्त्रस्य पाक्षिकाप्रामाण्यात् । नह्यनुयाजेषु येयजामह इत्यस्यानुष्ठाने नानुयाजेष्वित्यस्य प्रामाण्यं सम्भवति । व्रीहिशास्त्रस्यानुष्ठाने यवशास्त्रस्येव । द्विरदृष्टकल्पना च स्यात् । विधिप्रतिषेधयोरपि पुरुषार्थत्वात् । अतो नात्र

---

कल्पनया तज्जन्यप्रतीतेर्मिथ्याप्रत्ययत्वस्याङ्गीकर्त्तव्यत्वात् पक्षे तत्प्रामाण्यस्योज्जीवनीयतया प्रमत्तगीतत्वासम्भवाच्च । अतएव विकल्पस्य प्रामाण्यपरित्यागादिदोषाष्टकदुष्टत्वमुक्तम् । अत्र दशमाध्यायाष्टमपादे षोड़शिग्रहणाग्रहणाधिकरणे भाष्यम् ।

नतु परस्परविरुद्धौ विधिनिषेधौ न सम्भवतः ।
उच्यते, वचनप्रामाण्यात् प्रतिषेधो विधिं बाधित्वा
भविष्यति, विधिरपि प्रतिषेधम् । न अन्या गतिरस्तीति
पक्षे मिथ्याप्रत्ययः कल्पयिष्यते इति ।

ननु विकल्प एवास्तामलं नञः पर्युदासलक्षणयेत्यत आह सच न युक्त इति । अयुक्तत्वे हेतुमाह विकल्प इति । शास्त्रस्य विधेः निषेधस्य च । पाक्षिकेति । विधेः पालनपक्षे निषेधस्य, निषेधपालनपक्षे च विधेरप्रामाण्यापत्तेरित्यर्थः । युगपदुपसंहारासम्भवएव एकतराप्रामाण्यहेतुरित्याह नहीति । येयजामहमित्यस्य येयजामहं करोतीतिवाक्यार्थस्य । इदमुपलक्षणम्, एवं नानुयाजेष्वित्यस्य पालनेपि येयजामहमित्यस्य प्रामाण्यं न सम्भवतीत्यपि द्रष्टव्यम् । तथाचोक्तम् ।

प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पनात् ।
तदुज्जीवनहानिभ्यां विकल्पे चाष्टदोषता ॥

एकतराप्रामाण्ये दृष्टान्तमाह व्रीहीति । व्रीहिभिर्यजेत यवैर्यजेतेति श्रुतिविहितव्रीहियवयो र्वैकल्पिकत्वस्य सिद्धान्तितत्वादितिभावः । यवशास्त्रस्येवेति, यथा व्रीहिप्रयोगे यवशास्त्रस्याप्रामाण्यं, यवप्रयोगे च व्रीहिशास्त्रस्य, तद्वदितार्थः । दोषान्तरमाह द्विरिति । विकल्पपक्षे विधिनिषेधाभ्यां द्वाभ्यामेव अदृष्टं बोधयितव्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रतिषेधस्याश्रयणम्। किन्तु नञोऽनुयाजसम्बन्धमाश्रित्य पर्य्युदासस्यैव। इत्यञ्चानुयाजव्यतिरिक्तेषु येयजामह इति मन्त्रं कुर्य्यादिति वाक्यार्थबोधः। नञोऽनुयाज-व्यतिरिक्ते लाक्षणिकत्वात्। एवञ्च न विकल्पः। अत्र च वाक्ये येयजामहमिति न विधीयते यजतिषु येयजामह

---

मितिभावः। पुरुषार्थत्वात् यागोपकारद्वारेण पुरुषोपकारकत्वात्। पर्य्युदास-पक्षेतु विधिद्वयाभावेन नादृष्टद्वयकल्पनेतिभावः। उपसंहरति अत इति। यतः प्रतिषेधपरत्वे विकल्पप्रसक्तिर्विकल्पस्य चाष्टदोषदुष्टत्वमदृष्टद्वयकल्पनञ्च, अत इत्यर्थः, अनुयाजसम्बन्धमनुयाजान्वितत्वम्। पर्य्युदासस्यैवेति। आश्रयणमित्यनु-षङ्गः। तथाचोक्तम्।

यतएव विकल्पोऽयं प्रतिषेधे प्रसज्यते।
अतस्तत्परिहाराय पर्य्युदासाश्रयो वरमिति॥

ब्रीहियववाक्ययोस्तु पर्य्युदासाश्रयणादिरूपगत्यन्तराभावादष्टदोषदुष्टोपि विकल्प आश्रीयते। तदुक्तम्।

एवमेषोऽष्टदोषोपि यद्व्रीहियववाक्ययोः।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते॥

पर्य्युदासप्रकारं दर्शयति इत्यञ्चेति। नञोऽनुयाजसम्बन्धाश्रयणे सतीत्यर्थः। नन्वनुयाजसम्बन्धेनापि नञा तदभावरूपं तद्विरोधित्वमेव बोध्यतां, कथं तद्व्यतिरिक्तत्वं, तस्य मुख्यार्थत्वाभावादित्यत आह नञ इति। लाक्षणिकत्वादिति विकल्पापत्तिरूप-मुख्यार्थपरत्वबाधकसत्त्वात् प्रवर्त्तनान्वितत्वासम्भवेन नामान्वितत्वाङ्गीकारेण नञो-ऽन्योन्याभाववत्परत्वरूपलाक्षणिकत्वादित्यर्थः। नामान्वितस्य नञोऽन्योन्याभावे निरूढ़त्वादितिभावः। तथा सति, विकल्पापत्तिः परिहृतेत्याह एवञ्चेति। अत्र चेति। अनुयाजव्यतिरिक्ते येयजामहं करोतीति वाक्ये इत्यर्थः। येयजा-महमितीति। येयजामहकरणमित्यर्थः। तस्याविधेयत्वे हेतुमाह यजतिष्विति।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



मित्यनेनैव प्राप्तत्वात्। किन्तु सामान्यशास्त्रप्राप्त-येयजामहमित्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते। यद् यजतिषु येयजामहं करोति, तदनुयाजव्यतिरिक्तेष्वेवेति।

नन्वेवं सामान्यशास्त्रप्राप्तस्य विशेषे सङ्कोचनरूपादुप-

---

यजतिषु येयजामहं करोतीति वाक्यात् यागमात्रे येयजामहकरणस्य विहितत्वेन अनुयाजातिरिक्तयागेपि तस्य प्राप्तत्वात् विधानानुपपत्तेरितिभावः। तर्हि किमत्र विधेयमित्यवाह किन्त्विति। सामान्यशास्त्रेति। यजतिषु येयजामहं करोतीति शास्त्रेत्यर्थः। तस्य सामान्यशास्त्रप्राप्त येयजामहकरणस्य। अनुयाजव्यतिरिक्त-विषयत्वम् अनुयाजभिन्नयागमात्रनिष्ठत्वम्। विधीयते बोध्यते। तदेव व्यञ्जयति यदिति। करोतीत्यनेनान्वितम्। यद् येयजामहकरणमित्यर्थः। तथाच दशमाध्यायाष्टमपादे।

प्रतिषेधः प्रदेशेऽनारभ्यविधाने च प्राप्तप्रतिषिद्धत्वात् विकल्पः स्यात्।

इति सूत्रेण साक्षादतिदेशस्थले अनारभ्यविधानस्थले च प्रतिषेधो विकल्पः स्यात्। तत्तत्प्रमाणप्राप्तत्वात् प्रतिषिद्धत्वाच्च। इति पूर्व्वपक्षयित्वा।

अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात्।

इति सूत्रेण सिद्धान्तितम्। सिद्धान्तसूत्रार्थस्तु अपित्विति पूर्व्वपक्षव्यावृत्तिः। नानुयाजेष्वित्यादिवाक्यं न प्रतिषेध इत्यर्थः। किन्तर्हि, वाक्यशेषः स्यात्, अनुयाजेन सह नञः सम्बन्धाल्लभ्यस्य अनुयाजभिन्नेषु येयजामहः कार्य्य इति वाक्यार्थस्य साकाङ्क्षतया पृथक्पर्य्यवसानासम्भवात् पूर्व्ववाक्यस्यैकदेशः स्यात्। अतो येयजामहकरणानुवादेन सामान्यशास्त्रप्राप्तयजतेरनुयाजातिरिक्तत्वविधानाद्विधीनामेकदेशः स्यात्। अत्र हेतुः, प्रतिषेधपरत्वे यो विकल्प आपद्येत तस्याष्टदोष-दुष्टत्वेनान्याय्यत्वादिति।

एवंविधपर्य्युदासोपसंहारयोरभेदापत्तिमाशङ्कते नन्विति। एवं नानुयाजेष्वित्यत्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कुत्रचित् विकल्पप्रसक्तावप्यनन्यगत्या प्रतिषेधाश्रयणम् । यथा नातिरात्रे षोड़शिनं गृह्णातीत्यादौ । अत्र हि अतिरात्रे षोड़शिनं गृह्णातीति शास्त्रप्राप्तषोड़शिग्रहणस्य

---

सङ्कोच्यत इति । यद्यपि अग्नीषोमीयैन्द्राग्नयोरप्यग्निर्देवताकत्वाविशेषस्तथापि तत्र द्वयोर्द्वयोरेकदेवतात्वेन अग्नित्वेनानुपस्थितेस्तदीयपुरोडाशस्याग्नेयत्वेन ग्रहणं नस्यात् ।

पर्य्युदासगतभेदं दर्शयति । पर्य्युदासस्त्विति । सामान्यप्राप्तुपजीविपर्य्युदासस्त्वित्यर्थः । तदन्यमात्रेति । नञ्पदघटितवाक्यघटकपदविशेषबोध्य पदार्थविशेषेतरनिखिलपदार्थनिष्ठताकल्पनाफलक इत्यर्थः । इति हेतोः । तत उपसंहारात् । भेदइति । उपसंहारस्थले सङ्कोचकवाक्यं नञ्पदाघटितम् । पर्य्युदासस्थलेतु सङ्कोचकवाक्यं नञ्पदघटितम् । तथा तत्र सङ्कोचकवाक्यघटकपदविशेषबोध्यपदार्थनिष्ठतया सङ्कोचो, अत्रतु तथाविधपदार्थेतरनिष्ठतया सङ्कोचः । तथा तत्र यत्किञ्चिद्विषयनिष्ठतया सङ्कोचो, अत्रतु यत्किञ्चिदितरनिखिलविषयतया सङ्कोच इत्येवं भेद इत्यर्थः । ननु विफलोऽयं विचारः, सामान्यप्राप्तुपजीविपर्य्युदासस्थले उपसंहारत्वाङ्गीकारेपि क्षतिविरहादितिचेन्न । तथात्वे उपसंहारवाक्यत्वपर्य्युदासवाक्यत्वयोः साङ्कर्य्यापत्तेः । तथाहि उपसंहारवाक्यत्वं, पर्य्युदासवाक्यत्वाभाववति आग्नेयं चतुर्द्धा करोतीत्यादिवाक्ये विद्यमानम् । पर्य्युदासवाक्यत्वञ्च उपसंहारवाक्यत्वाभाववति नेक्षेतोद्यन्तमित्यादिवाक्ये दृश्यते । एवञ्च यदि सामान्यशास्त्रप्राप्तुपजीविनि नानुयाजेष्वित्यादिवाक्ये उपसंहारवाक्यत्वं पर्य्युदासवाक्यत्वञ्चाङ्गीक्रतं स्यात्तदा परस्परात्यन्ताभावसमानाधिकरणयोर्धर्म्मयोः सामानाधिकरण्यं प्रसज्येतेति । अतस्तन्निराकरणार्थोऽयं विचारइति बोध्यम् ।

प्रत्ययार्थस्य नञर्थेनान्वये विकल्पप्रसक्तिर्बाधिकेति यदुक्तं तत्रापवादमाह कुत्रचिदिति । . अनन्यगत्या गत्यन्तराभावेन । प्रतिषेधाश्रयणं नञर्थेन प्रत्ययार्थान्वयादितिभावः । अत्रोदाहरणमाह यथेति । अतिरात्रे तदाख्ययागे । षोड़शी सोमपात्रविशेषः । गत्यन्तराभावे हेतुमाह अत्रहीति । हि यस्मादत्र विकल्पप्रसक्तावपि न पर्य्युदासाश्रयणमतो गत्यन्तराभावइत्यर्थः । सामान्यशास्त्रप्राप्तुपजीविनञ्पद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निषेधाद्विकल्पप्रसक्तावपि न पर्य्युदासाश्रयणम्। असम्भवात्, तथाहि यद्यत्र षोड़शिपदार्थेन नञर्थान्वय स्तदातिरात्रे षोड़शिव्यतिरिक्तं गृह्णातीति वाक्यार्थबोधः स्यात् सच न सम्भवति। अतिरात्रे षोड़शिनं गृह्णातीति प्रत्यक्षश्रुति-विरोधात्। यदि चातिरात्रपदार्थेनान्वयस्तदातिरात्र-व्यतिरिक्ते षोड़शिनं गृह्णातीति वाक्यार्थबोधः स्यात्। सोपि न सम्भवति। तद्विधिविरोधात् अतोऽत्रानन्यगत्या

---

घटितवाक्यस्य पर्य्युदासपरतायाएव विकल्पपरिहारकत्वादितिभावः। ननु यथा यजतिषु येयजामहं करोतीति शास्त्रप्राप्त येयजामहकरणनिषेधे पर्य्युदासाश्रयणं, तथाति-रात्रे षोड़शिनं गृह्णातीतिशास्त्रप्राप्तषोड़शिग्रहणनिषेधेपि पर्य्युदासाश्रयणं कुतोनेत्यत आह असम्भवादिति। नानुयाजेष्वितिवत् पर्य्युदासाश्रयणमत्र कथमपि न सम्भव-तीतिभावः।

असम्भवं व्यञ्जयति तथाहीति। पर्य्युदासाश्रयणे षोड़शिना अतिरात्रेण वा नञर्थान्वयोऽभ्युपेयः। तत्रोभयथाप्यन्वयबाधकं प्रदर्शयिष्यन् प्रथमं षोड़शिना नञर्थान्वये बाधकमाह यद्यीति। प्रत्यक्षश्रुतीति। षोड़शिव्यतिरिक्तम् गृह्णातीत्यस्य षोड़शिनं विहायान्यत् गृह्णीयादित्यर्थकत्वावश्यकतया प्रत्यक्षश्रुत्या तद्ग्रहणविधानेन विरोधादित्यर्थः। नच षोड़शिव्यतिरिक्तं गृह्णातीत्यस्य षोड़शिनं विहायान्यद्-गृह्णीयादित्यर्थकत्वे मानाभावात् षोड़शीतरपात्रग्रहणार्थकत्वमेव युक्तं, तथासति, षोड़श्यन्तर्भावे विधेरौदासीन्यात् तद्ग्रहणविधानेन न विरोधसम्भव इति वाच्यम्। तथार्थत्वे षोड़शीतरपात्रग्रहणस्य तत्तद्विधिभिरेव प्राप्ततया वाक्यस्यानुवादतापत्तेः। तत्सार्थक्याय तद्वाक्यस्य षोड़शिवर्जनार्थकत्वस्यावश्यवक्तव्यत्वात्।

इदानीमतिरात्रेण नञर्थान्वयबाधकमाह यदिचेति। अन्वयी नञर्थान्वयः। तत्रापि सएव विरोध इत्याह सोपि नेति। तद्विधिविरोधादिति। अतिरात्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



शास्त्रप्राप्तषोड़शिग्रहणस्यैव निषेधः । नच विकल्पप्रसक्तिः, स्तस्याप्यपेक्षणीयत्वात् । इयांस्तु विशेषो यद्विकल्पादेक-प्रतिषेधेपि प्रतिषिध्यमानस्य नानर्थहेतुत्वम् । विधि-निषेधोभयस्यापि क्रत्वर्थत्वात् । यत्र तु न विकल्पः, प्राप्तिश्च

---

व्यतिरिक्ते षोड़शिनं गृह्णातीत्यस्य अतिरात्र' वर्जयित्वा अन्यत्र षोड़शिनं गृह्णाती-त्यर्थकत्वस्यावश्यवक्तव्यत्वे अतिरात्रे षोड़शिनं गृह्णातीति विधिविरोधादित्यर्थः । अतदिति । यतो न पर्य्युदासरूपा गतिः सम्भवति अतइत्यर्थः । शास्त्रप्राप्तेति । अतिरात्रे षोड़शिनं गृह्णातीतिशास्त्रप्राप्तेत्यर्थः । विकल्पप्रसक्तिरिति । तद्बाधिकेति-शेषः । तस्य विकल्पस्य । अपेक्षणीयत्वात् गत्यन्तराभावेनावश्याभ्युपेयत्वात् । तथाच, इच्छया षोड़शिनं गृह्णीयान्नगृह्णीयादित्येवमिच्छाविकल्पइतिभावः । नच, कष्टं कर्म्मेतिन्यायादग्रहणेपि यागसिद्धौ ग्रहणविधेरननुष्ठानलक्षणमप्रामाण्यमापद्ये-तेति वाच्यम् । विधिदर्शनादनुष्ठाने प्रधानस्य फलभूयस्त्वं, निषेधदर्शनाच्च वैगुण्येपि पूर्णफलसिद्धिरित्येतद्विशेषस्य कल्पनीयत्वात् ।

ननु विधिर्विधेयस्यार्थसाधनत्वमिव निषेधस्य निषिध्यमानानर्थसाधनत्वं प्रतिपाद्य-मित्युक्तम् । अर्थसाधनत्वञ्च वलवदनिष्टाननुवन्धीष्टसाधनत्वमनर्थसाधनत्वन्तु वलव दनिष्टसाधनत्वम् । तथा सति, एकस्मिन् यागे एकस्य षोड़शिग्रहणस्य विधिनिषेध-प्रतिपाद्ये निरुक्तार्थसाधनत्वानर्थसाधनत्वे कथमुपपद्येतां विरोधादित्यत आह इया-निति । विशेषो रागप्राप्तनिषेधादितिशेषः । यदिति । यन्नानर्थहेतुत्वमियानेव विशेष इत्यन्वयः । एकप्रतिषेधे यस्य विधिस्तस्यैव प्रतिशेषे । नानर्थहेतुत्वं न वल-वदनिष्टाननुवन्धीष्टसाधनत्वम् । हेतुमाह विधिनिषेधेति । क्रत्वर्थत्वात् क्रत्वर्थत्व-प्रतिपादकत्वात् । तथाच विधिनिषेधयोर्द्वयोरप्यङ्गविधित्वेन क्रत्वर्थत्वप्रतिपादकत्वात् विधेरिवनिषेधस्यापि क्रत्वर्थत्वमात्रबोधकतया, विधिना यथा षोड़शिग्रहणं क्रत्वर्थमिति बोध्यते, तथा निषेधेनापि षोड़शिग्रहणनिवृत्तिः क्रत्वर्था, इत्येव बोधनीयमितिभावः । ननु माभूदनर्थसाधनत्वप्रतीतिः, परन्तु, यत् यत्साधनं, तदभावस्तत्परिहारसाधनमिति-नियमात् षोड़शिग्रहणनिवृत्तेः क्रतूपकारसाधनत्वे षोड़शिग्रहणप्रवृत्तेः क्रत्वनुप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नादेः । तन्निषेधस्य क्रत्वर्थत्वेन तस्य क्रतुवैगुण्यसम्पादकत्वात् ।

---

क्रत्वर्थत्वम्, न पुरुषार्थत्वमितिभावः । एतेन विधिनिषेधौ न तुल्यार्थाविति दर्शितम् । एवञ्च तुल्यार्थत्वाभावान्नविकल्प इति स्थितम् । यद्यपि पुरुषार्थस्य क्रतोरुपकारकत्वात् प्रतिषेधस्य परम्परया पुरुषार्थत्वं सुवचं, तथापि स्वतः पुरुषार्थत्वाभावेन तुल्यार्थत्वमनिवार्य्यम् । ननु दानादे विधेयतया अर्थसाधनत्वमिव निषिद्धतया अनर्थसाधनत्वमपि प्रतीयते । ततश्च दानादिनिषेधस्य पुरुषार्थत्वाभावेपि निषिध्यमानदानादेरनर्थहेतुत्वप्रतीत्या तुल्यबलविरोधाद्विकल्पः स्यादित्यतो निषेधस्य पुरुषार्थत्वाभावेन निषिध्यमानस्यापि अनर्थहेतुत्वं नस्यादित्येतदाह निषिध्यमानस्येति । अननर्थहेतुत्वादनर्थहेतुत्वाभावात् । तथाच दानाद्यभावस्य क्रतूपकारकत्वे, दानादेः क्रत्वनुपकारकत्वमेव प्रतीयते, न तु पुरुषानर्थहेतुत्वमिति तुल्यार्थविरोधाभावात् कथं विकल्पसम्भव इतिभावः । शास्त्रप्राप्तस्य क्रत्वङ्गतया निषेधे निषिध्यमानस्याननर्थहेतुतायां दृष्टान्तमाह यथेति । स्वस्त्रीगमनादेरिति । निषेधस्य पुरुषार्थत्वाभावे निषिध्यमानस्याननर्थहेतुत्वमित्यनेनान्वितम् । तथाच ऋतौ स्वदारान् गच्छेदिति शास्त्रप्राप्तस्य ऋत्वभिगमनस्य कर्म्मविशेषाङ्गतया ऋतुस्नातां तदहीराव परिहरेदिति निषेधस्य यथा पुरुषार्थत्वाभावे निषिध्यमानस्य ऋत्वभिगमनस्य नानर्थहेतुत्वं, तथेत्यर्थः । आदिपदात् स्मरणसङ्कल्पादिपरिग्रहः । तथाच स्मृतिः, स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । अनुरागात् कृतश्चैतद्ब्रह्मचर्य्यविरोधकमिति ।

ननु शास्त्रप्राप्तस्य दानादेः स्वस्त्रीगमनादेश्च कर्म्माङ्गतया निषेधस्थले निषिध्यमानस्य तस्यानुष्ठानं यद्यनर्थहेतुर्न स्यात्तदा किंजनकमित्यत्राह तन्निषेधस्येति । दानादिस्वस्त्रीगमनाद्यभावस्येत्यर्थः । तस्य निषिध्यमानस्य । क्रत्विति यदङ्गतया तदभावो विहितस्तद्वैगुण्यजनकत्वादित्यर्थः । तथाच तदभावस्य क्रतूपकारकत्वे प्रतियोगिनः क्रत्वनुपकारकत्वस्यैव, यद्धि यत्साधनं तदभावस्तत्परिहारसाधनमिति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः। तस्य च लक्षणया प्रयोजनवदर्थपर्य्यवसानम्। तथाह्यर्थवादवाक्यं स्वार्थप्रतिपादने प्रयोजनाभावाद्विधेयनिषेध्ययोः प्राशस्त्य-

---

नियमेन कल्प्यत्वं, न पुनः फलान्तरजनकत्वमितिभावः। एष एव सिद्धान्तः पार्थसारथिमिश्रैः शास्त्रदीपिकादशमाध्यायाष्टमपादेऽङ्गीकृतो, यथा।

"तस्मात् प्रतिषेध एवायम्। नच विकल्पप्रसक्तिरेकार्थाभावात्। यद्यभावपि विधिनिषेधौ पुरुषार्थौ क्रत्वर्थौ वा अभविष्यतां, ततो व्यकल्पिष्येताम्। पुरुषार्थतया तु विहितानामग्निहोत्रादीनां क्रतुमध्येऽपि प्राप्तानां प्रतिषेधः क्रत्वर्थतया क्रियते। स्थ्युपगमादिप्रतिषेधवत्। अतः क्रतुमनुतिष्ठता अवश्यं वर्ज्जनीयान्यग्निहोत्रहोमादीनि भवन्तीति नास्ति विकल्पप्रसङ्गः। यदा च प्रतिषेधपक्षेप्यविकल्पस्तदा श्रुत्यर्थलिप्सया प्रकरणानुजिघृक्षयाच प्रतिषेधत्वमेव न्याय्य"मिति। तथा—

"विकल्पाभावात् फलतः पर्य्युदासत्वं भवतीति मत्वा सूत्रभाष्यकाराभ्यां पर्य्युदासत्वमुक्त"मितिच।

क्रमप्राप्तमर्थवादं निरूपयति प्राशस्त्येति। प्राशस्त्यं विशिष्टोपकारहेतुत्वेन प्रतीतिविषयत्वम्। निन्दा निन्दितत्वम् अपकारहेतुतया प्रतिपत्तिविषयत्वमिति यावत्। तदन्यतरपरं तदन्यतरतात्पर्य्यकम्। ननु वायुर्वै क्षेपिष्ठा देवता। सोऽरोदीत् यदरोदीत्तद्रुद्रस्य रुद्रत्वमित्याद्यर्थवादेषु विधेयनिषेध्यनिष्ठप्राशस्त्य-निन्दितत्वाबोधकत्वाल्लक्षणमव्याप्तमित्यत आह तस्यचेति। प्रयोजनवदर्थौ विधिनिषेधप्रतिपाद्ययागादिकलञ्जभक्षणनिवृत्त्यादिरूपः। तत्पर्य्यवसानं तद्गतश्रेयस्त्वप्रतिपादनोपक्षीणम्। तथाच वायुर्वै इत्यादिवाक्यं लक्षणया विधिबोधितकर्म्मविशेषस्य श्रेयस्त्वं प्रतिपादयति। सोऽरोदीदित्यादिवाक्यञ्च निषेध्यनिन्दनमुखेन निषेधवाक्यावगततन्निवृत्तेः श्रेयस्त्वमवगमयतीति प्राशस्त्यनिन्दान्यतरपरवाक्यत्वरूपलक्षणाक्रान्तमेवेति नाव्याप्तिरितिभावः। लक्षणाहेतुं मुख्यार्थपरत्वानुपपत्तिं दर्शयति तथाहीति। अर्थवादवाक्यमिति। प्रतिपादयतीत्यन्वितम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निन्दितत्वे लक्षणया प्रतिपादयति। स्वार्थमात्रपरत्वे आनर्थक्यप्रसङ्गात्। आम्नायस्य क्रियार्थत्वात्। नचेष्टापत्तिः। स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिना सकलवेदाध्ययनं कर्त्तव्यमिति बोधयता सर्व्ववेदस्य प्रयोजनवदर्थपर्य्यवसायित्वम् सूचयतोपात्तत्वेनानर्थक्यानुपपत्तेः।

स द्विविधो विधिशेषो निषेधशेषश्चेति। तत्र वायव्यं

---

स्वार्थप्रतिपादने मुख्यार्थप्रतिपादने। प्रयोजनाभावादिति। एतेन वाक्यवैफल्यमेव मुख्यार्थपरत्वानुपपत्तिः प्रतिपादिता। ननु तत्तद्वाक्यवैफल्ये का हानिरित्यत आह स्वार्थमात्रेति। शब्दानां मुख्यार्थेन सह नित्यसम्बन्धात् लाक्षणिकार्थप्रतिपादनेपि स्वार्थप्रतिपादनावश्यम्भावान्मात्रपदम्। आनर्थक्यप्रसङ्गादप्रामाण्यप्रसङ्गात्। अप्रामाण्ये हेतुमाह आम्नायस्येति। वेदमात्रस्य क्रियार्थत्वात् क्रियोपयोगित्वनियमात्। तथाच प्रथमाध्यायद्वितीयपादे पूर्व्वपक्षसूत्रम्।

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्।

तस्मादनित्यमुच्यते इति।

अत्र भाष्यकारा आहुः। क्रिया कथमनुष्ठेया इति तां वदितुं समाम्नातारो वाक्यानि समामनन्ति। तत् यानि वाक्यानि क्रियां नावगमयन्ति क्रियासम्बद्धं वा किञ्चिदित्यादिना। अत एषामानर्थक्यम्। तस्मादेवञ्जातीयकान्यनित्यान्युच्यन्त इत्यन्तेन। अप्रामाण्ये इष्टापत्तिं परिहरति न चेति। स्वाध्याय इति उपात्तत्वेन परिगृहीतत्वेन। तथाचाविशेषादनेन सर्व्वस्यैव वेदस्याध्ययनं विधीयते। तस्माच्च सर्व्वस्यैव वेदस्य प्रयोजनवदर्थत्वेन सूच्यते। तत् सूचनाच्च अर्थवादानामपि प्रयोजनवदर्थपर्य्यवसायित्व रूपेणोपात्तत्वं वाच्यं तर्हि कथमेषामप्रामाण्यस्येष्टत्वं सम्भवतीतिभावः।

अर्थवादं प्रथमं द्वैविध्येन विभजति स द्विविध इति। विधिशेषो विध्युपकारकः। निषेधशेषो निषेधोपकारकः। तथाच अर्थवादानां विध्येकवाक्यतयैव प्रामाण्यं सिद्धान्तितं प्रथमाध्यायद्वितीयपादे।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



बाधितत्वादादित्यवदुज्ज्वलत्वरूपगुणोऽनेन लक्षणया प्रतिपाद्यते। प्रमाणान्तरावगतार्थबोधकोऽनुवादः। यथाग्निर्हिमस्य भेषजमिति। अत्र हिमविरोधित्वस्याग्नौ प्रमाणान्तरावगतत्वात्। प्रमाणान्तरविरोध-तत्प्राप्तिरहितार्थ-

---

नीलाभिन्नत्वमिव, आदित्यो यूप इत्यत्र सामानाधिकरण्येनान्वयसम्भव एव यूपस्यादित्याभिन्नत्वं घटते। तादृशान्वयस्तु न सम्भवति यूपे आदित्यत्वस्य प्रत्यक्षप्रमाणविरुद्धत्वादितिभावः। तर्हि आदित्यपदेन किं बोध्यत इत्यत्राह आदित्यवदिति। गुणः सादृश्यम्। अनेनार्थवादेन। नन्वादित्यपदेन उज्ज्वलत्वलक्षणमादित्यसादृश्यं कथं प्रतीयतां तस्य तदशक्यत्वादित्यत आह लक्षणयेति। तथाच मुख्यार्थपरतया सामानाधिकरण्येनान्वयस्य प्रत्यक्षप्रमाणबाधितत्वादादित्यसादृश्यलक्षणया आदित्यसदृशाभिन्नत्वं प्रतिपाद्यते। तच्च सादृश्यमुज्ज्वलत्वमितिभावः।

आदित्यो यूप इत्यादीत्यादिपदात् यजमानो यूपः, यजमानः प्रस्तरः, यजमान एककपाल इत्यादीनां परिग्रहः। यूपे यजमानाभेदस्य प्रत्यक्षबाधितत्वात् यजमानसादृश्यं यजमानवदूर्द्धत्वमनेन प्रतिपाद्यते। प्रस्तरे जुहूमासादयति, सर्व्वा वा स्रुच, इति श्रुतिविहिते प्रस्तरे, एककपाले च यजमानशब्दः प्रयुक्तस्तत्रापि अभेदान्वयस्य प्रत्यक्षबाधितत्वात् प्रस्तरैककपालयोर्यजमानवद्यागसाधकत्वं प्रतिपाद्यत इति। अतएव तन्त्रवार्त्तिके।

प्रस्तरैककपालावपि पारम्पर्य्येण यजमानार्थसिद्धिं कुरुतइति काय्योपपत्तेस्तच्छब्देन स्तूयेते इत्युक्तम्।

द्वितीयचरणं व्याचष्टे प्रमाणान्तरावगतेति। इयमवधारित इत्यस्य व्याख्या। तदुदाहरणमाह यथेति। भेषजमौषधं तन्निवारकमिति यावत्। तस्यानुवादत्वे हेतुम् अवधारितार्थवादत्वं प्रतिपादयति हिमविरोधित्वस्येति। अग्नेरियं प्रशंसा। एवं न पृथिव्यामग्निश्चेतव्यो नान्तरीक्षे, न दिवीति निषेधेष्वपि। नान्तरीक्षे इत्यादिवाक्यस्य प्रमाणान्तरावधारितार्थवादत्वेनानुवादत्वम्। सचार्थवादो हिरण्यं निधाय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



बोधको वादो भूतार्थवादः । यथेन्द्रो वृत्राय वज्रमुदयच्छदित्यादि ।

एवञ्च यजेत स्वर्गकाम इत्यादिनिखिलवेदस्य साक्षात् परम्परया वा यागादिधर्म्मप्रतिपादकत्वं सिद्धम् ।

---

चेतव्यमित्युक्तहिरण्योपरि वह्निचयनस्य प्रशंसा । अतएवोक्तं प्रथमाध्यायद्वितीयपादे भाष्यकारैः ।

"पृथिव्यादीनां निन्दा हिरण्यस्तुत्यर्था । असति प्रसङ्गे प्रतिषेधो नित्यानुवाद इति ।"

तन्त्रवार्त्तिकेतु

"यथान्तरिक्षे दिवि वा चयनं न प्रसिद्धं तथा हिरण्यरहितायां पृथिव्यामितिस्तवन"मित्युक्तम् ।

तद्ज्ञानादित्यनेन प्रागुक्तविरोधावधारणयोरभावादिति प्राप्तेराह प्रमाणान्तरेति । विरोधो वाधः । तत्प्राप्तिः प्रमाणान्तरजन्यावधारणम् । तद्रहितस्तदविषयो यो अर्थस्तद्बोधकइत्यर्थः । प्रमाणान्तरजन्यवाधाविषयस्य प्रमाणान्तरजन्यावधारणाविषयस्य चार्थस्य बोधक इति स्पष्टम् । तदुदाहरणमाह यथेति । इन्द्र इति । शरीरिणोपि माद्दशामप्रत्यक्षस्य इन्द्रस्य वज्रोद्यमो न प्रत्यक्षादिप्रमाणवाधितः । प्रत्यक्षप्रमायोग्यत्वेनाभिमतस्य सामग्रीसत्त्वे प्रत्यक्षप्रमाया अविषयत्वएव प्रत्यक्षप्रमाणविरुद्धतया शरीरिणस्तस्य वज्रोद्यमस्य प्रत्यक्षप्रमाणविरुद्धत्वाभावात् । तथानुमानविरुद्धत्वाभावाच्च । नापि माद्दशां प्रत्यक्षादिप्रमाणजन्यावधारणविषय इतीन्द्रदेवताप्रशंसारूपतया भूतार्थवादत्वम् सिद्धमितिभावः । एवं वायुर्वै क्षेपिष्ठा देवता, सोऽरोदीदित्यादीनामपि भूतार्थवादत्वम् । तन्त्रान्तरोक्तानां परकृतिपुराकल्पादीनामप्येष्वेवान्तर्भावान्न पृथग्विभाग आवश्यक इतिबोध्यम् । वेदस्य सर्व्वस्य धर्म्मतात्पर्य्यकत्वेन धर्म्मप्रतिपादकत्वादिति प्राक्तनग्रन्थेन निर्द्दिष्टं समस्तवेदस्य धर्म्मप्रतिपादकत्वं क्रमेण प्रमाप्य इदानीं तदुपसंहरति एवञ्चेति । उक्तप्रकारेण सर्व्वेषां वेदानां विध्यपकारकत्वे सतीत्यर्थः ।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भावादित्यापत्तिं निराकरोति न चेति। आपत्तिनिरासकं प्रमाणमुपन्यस्यति यदिति। यत् करोषि यदाचरसि शास्त्रीयं स्वतः प्राप्तं वा। मदर्पणं मयि अर्पितं यथा भवति एवं कुरुष्वेत्यर्थः। इदमुपलक्षणम्। युक्तः कर्म फलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्। अयुक्तः कामकारेण फले सक्तो निबध्यत इति भगवद्गीतास्मृत्यन्तरस्यापि प्रमाणत्वात्।

ननु समस्तस्य वेदस्य धर्मप्रतिपादकत्वमुक्तं, तत् कथमिदानीं धर्मनिर्णयाय स्मृतिवचनमुपन्यस्यसि ? तस्याप्रामाण्यादित्यत आह स्मृतिचरणे इति। स्मृतिप्रामाण्योपक्रमकप्रथमाध्यायतृतीयपादे इत्यर्थः। श्रुतिमूलकत्वेनेति अनुमितश्रुतिमूलकत्वेनेत्यर्थः। तेन स्मृतिप्रतिपादितधर्मस्यापि वेदप्रतिपादितत्वमेवेति भावः। व्यवस्थापनात् सिद्धान्तनात्। तथाहि

अष्टकाः कर्त्तव्याः, गुरुरनुगन्तव्यः, तड़ागं खनितव्यम्, प्रपा प्रवर्त्तयितव्या, शिखया कर्म्म कर्त्तव्यम्, उपनयीत, इत्यादिस्मृतीनां प्रामाण्यमप्रामाण्यं वेति संशये चोदनालक्षणोऽर्थो धर्म्म इति सूत्रेण धर्म्मस्य वेदमात्रमूलकत्वाभिधानात् स्मृतीनां धर्म्मे प्रामाण्यं नास्तीति पूर्व्वपक्ष.। नचासां श्रुतिमूलकत्वात् प्रामाण्यम्। तन्मूलभूतश्रुतीनामनुपलम्भात्। ननु वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। एतच्चतुर्विधं प्राहुः साक्षाद्धर्म्मस्य साधनमिति मानवीयात् स्मृतीनां प्रामाण्यमिति चेन्न। स्मृतिसापेक्षं स्मृतिप्रामाण्यमित्यात्माश्रयापत्तेः। मूलभूतश्रुत्यनुपलम्भे न मनोरपि स्मृत्यन्तरात् प्रामाण्यज्ञानं तत्प्रणेतुश्च स्मृत्यन्तरादित्यन्धपरम्परया रूपविज्ञानवत् स्मृतिप्रामाण्यज्ञानस्य निर्म्मूलत्वापत्तेश्च। तस्माद्विप्रलम्भकवाक्यवदप्रामाण्यमेव स्मृतीनाम्।. पौरुषेयवाक्यत्वात्। तथाचोक्तं मिश्रैः।

प्रायेणानृतवादित्वात् पुंसां भ्रान्त्यादिसम्भवात्।
चोदनानुपलब्धेश्च श्रद्धामात्रप्रमाणतेति॥

अत्रैव प्रथमाध्यायतृतीयपादे पूर्व्वपक्षसूत्रम्।

धर्म्मस्य शब्दपूर्व्वत्वादशब्दमनपेक्षं स्यादिति।

शब्दो वेदवाक्यम्। अत्र सिद्धान्तः। स्मृतिस्तावत् स्मरणम्। तच्च संस्कारजन्यम्। संस्कारश्च प्रत्यक्षादनुभवजन्यः। एवञ्च यथा वेदस्यापौरुषेयत्वेन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सर्व्वलोकप्रसिद्धेः प्रामाण्यं, तथा अदृष्टार्थकमहर्षिवाक्यानामपि प्रामाण्यविद्वेषिभिरपि स्मृतित्वेनाङ्गीकारात् पूर्व्वानुभवजन्यत्वं मन्तव्यमेव। सचायमनुभवः स्मृत्यन्तरार्थ-सीयत्वाभ्युपगमे अन्धपरम्परान्यायावतारात् दुःखावहे कर्म्मणि लोकप्रवृत्तेरसम्भवात् लोकाचारप्राप्तसीयत्वाभ्युपगमासम्भवाच्च श्रुतिवाक्यसीयत्वेव वाच्यम्। अतः स्मृत्या लिङ्गेन श्रुतेरनुमेयतया वेदमूलकत्वेन स्मृतिप्रामाण्यं सूपपन्नमेव। नन्वेवं श्रुत्यैव तर्हि तदर्थप्रतिपत्तिसिद्धेः स्मृतिप्रणयनमनर्थकमितिचेन्न, सहस्रं सामशाखाः, एकशतमध्वर्य्युशाखाः, एकविंशतिशाखं वह्वृच, मित्युक्तबहुशाखाविस्तृतस्य वेदस्य विप्रकीर्णत्वात् एकशाखाध्यायिनां शाखान्तरोपलम्भस्य, उपलम्भेपि मन्दधियामर्थाव-गमस्यासम्भवाच्च अस्मदाद्युपकारायैवानुष्ठेयार्थसंग्रहरूपेण प्रेचावतां स्मृतिप्रणयन-साफल्यात्। इदानीं मूलानुपलब्धिस्तु क्रमशः सम्प्रदायज्ञासादुपपन्नतरा।

अतएवच्छान्दोग्ये मनुर्वै यत्किञ्चिदवदत्तद्भेषजं भेषजताया इति मानवस्मृतेः प्रामाण्यं श्रावितम्। आथर्व्वणिकेपि "तदेतत् सत्यं मन्त्रेषु कर्म्माणि कवयीयान्यपश्यंस्तानि त्रेतायां वहुधा सन्ततानि तान्याचरथ नियतं सत्यकामा" इति। सर्व्वासां स्मृतीनां प्रामाण्यमाम्नातम्। व्याख्यातमेतदाम्नानं भगवच्छङ्कराचार्य्य-चरणैः।

मन्त्रेषु कर्म्माणि मन्त्रप्रकाशितानि कर्म्माणि कवयो मेधाविनो वशिष्ठादयो यान्यपश्यन् दृष्टवन्तस्तदेतत् सत्यम्। तानि त्रेतायां युगे प्रायशः प्रवृत्तानि। अतो यूयं तान्याचरथ। नियतं नित्यम्। सत्यकामास्तत्तत्फलकामा इति। तथाचोक्तं मिश्रैः सिद्धान्तवाक्यम्।

वैदिकैः स्मर्य्यमाणत्वात् तत्परिग्रहदार्ढ्यतः।
सम्भाव्यवेदमूलत्वात् स्मृतीनां वेदमूलतेति॥

सिद्धान्तसूत्रञ्च

"अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यादिति।"

अपि वेति सिद्धान्तद्योतनार्थम्। स्मृतिः प्रमाणम्, तत्र मूलानुमानं स्यात् स्मरणानुभवयोरेककर्तृकत्वादित्यर्थः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



बालानां सुखबोधाय भास्करेण सुमेधसा।
रचितोऽयं समासेन जैमिनीयार्थसंग्रहः॥
इति महामहोपाध्यायलौगाक्षिश्रीभास्करविरचितं
पूर्व्वमीमांसार्थसंग्रहनामकं प्रकरणं
समाप्तम्।

---

ग्रन्थस्य दुरूहता शून्यत्वप्रतिपादनेन जैमिनिनये प्रवेष्टुकामानामध्ययनप्रवृत्ति-मुत्पादयति बालानामिति। धर्म्माधर्म्मविचारे अकृतप्रवेशानामित्यर्थः। समासेन स्वल्पाक्षरेण। जैमिनीयेति। जैमिनीयाः कर्म्ममीमांसादर्शनोपयोगिनो अर्थाः पदार्थाः संगृह्यन्ते नानास्थानस्था एकस्थानस्थाः क्रियन्ते यत्र स तथाभूतो ग्रन्थ इत्यर्थः।

नन्वेतन्मते कानि प्रमाणानि यैः स्वाभिमता अर्था: प्रमीयन्ते। अत्रोच्यते भाष्यकारतन्त्रवार्त्तिककारादीनां मते प्रत्यक्षानुमानोपमानशाब्दार्थापत्त्यनुपलब्धि-नामानि षड़ेव प्रमाणानि।

प्रमीयतेऽनेनेति व्युत्पत्त्या प्रमाकरणं प्रमाणम्। करणत्वञ्च व्यापारवदसाधारण-कारणत्वम्। व्यापारत्वञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वम्। प्रमात्वञ्च स्मृतीतराबाधितज्ञानत्वम्। स्मृतिभेदनिवेशात् प्रमात्वमनुभवत्वमिति स्थितम्। तत्राप्यबाधितत्वविशेषणादाभासव्यावृत्तिः। आभासस्योत्तरकालीनबाधविषयत्वात्। तेन व्यापारवत्तासम्बन्धेन प्रमितिविभाजकोपाध्यवच्छिन्नासाधारणकारणत्वं प्रमाणत्व-मिति प्रमाणलक्षणम्। तच्च प्रत्यक्षादिप्रमायामिन्द्रियादीनाम्। विषयेन्द्रिय-सन्निकर्षादीनान्तु व्यापारत्वम्।

अथ प्रत्यक्षलक्षणम्। तत्र सूत्रम्।

"सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म, तत् प्रत्यक्ष"मिति।

तत् प्रत्यक्षमित्यत्र तदित्यव्ययं तृतीयान्तञ्च। तत्सत्योर्व्यत्ययेनान्वयः। तथाच पुरुषस्येन्द्रियाणां तत्सम्प्रयोगे तेन सन्निकर्षे यद्बुद्धिजन्म तत् सत् प्रत्यक्षमित्यर्थः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एवञ्च यस्य प्रत्यक्षं तेनैवेन्द्रियसन्निकर्षे यत् प्रत्यक्षं तदेव सत्प्रत्यक्षम्। यस्य पुनः प्रत्यक्षव्यवहारो भवति तेन यदीन्द्रियसन्निकर्षो न जायते यथा शुक्तिरजतादे स्तदसत्प्रत्यक्षमिति फलितम्।

ननु तत्सतो र्व्यत्ययेनान्वयमन्तरेणापि रजताद्याभासेन सङ्करो न भवत्येव। इन्द्रियसम्प्रयोगजं ज्ञानं प्रत्यक्षमित्येतावदेव वक्तव्यम्। न हि शुक्तिकायां रजतज्ञानमिन्द्रियसम्प्रयोगजम्। किन्तर्हि? इन्द्रियसम्प्रयोगाच्छुक्तिखण्डं रजतसाधारणेन भास्वरत्वादिरूपेण ज्ञायते। इन्द्रियदौर्ब्बल्यात्तु तद्गतमसाधारणं शुक्तिकात्वं ज्ञातुं न शक्यते। अनन्तरं रजतसंस्कारोद्बोधाद्रजतं स्मृतं भवति। ततो दोषविशेषेण स्मृतरजते शुक्तिकायामारोप्यमाणे शुक्तिकारजतत्वेन गृह्यते। तस्मान्नेन्द्रियसम्प्रयोगजं रजतविज्ञानमिति नातिप्रसङ्गः। नच तज्ज्ञानस्यापि परम्परया इन्द्रियसम्प्रयोगजन्यत्वात् तद्व्यावृत्त्यर्थं तत्सम्प्रयोगजन्यत्वमवश्यवक्तव्यमिति वाच्यम्। साक्षाज्जन्यत्वस्य निवेशनीयत्वात्। अन्यथा तत्सम्प्रयोगजन्यत्वकथनेपि दूरादग्निं पश्यतो यत्तद्गतौष्ण्यानुमानं तदपि प्रत्यक्षं स्यात्। परम्परयेन्द्रियसन्निकर्षजन्यत्वात्। औष्ण्यस्य संयुक्तसमवायरूपसन्निकर्षाच्च। तस्मात् साक्षात् सम्प्रयोगजन्यत्वस्य निवेशनीयतया शुक्तिरजतानुभवस्यापि वारणादनर्थकस्तत्सतोर्व्यत्ययेनान्वय, इति चेत्। सत्यं, साक्षाज्जन्यत्वं लक्षणघटकम्। सत्यञ्च शुक्तिरजतानुभवेपि नातिप्रसङ्ग इति। तथापि पीतशङ्खद्विचन्द्रादिज्ञानेष्वतिव्याप्तिरवारणीया स्यात्। साक्षात्सम्प्रयोगजन्यत्वात्। किञ्च स्मृतेन रजताकारेण सन्निहितस्य शुक्तिशकलस्य यत् तादात्म्यग्रहणं तदनुपरतेन्द्रियव्यापारदशायां भवत्, साक्षात्सम्प्रयोगजन्यमेव। अपरोक्षत्वात्। तस्मादाभासव्यावृत्त्यर्थं तत्सतोर्व्यत्ययेनान्वयः कार्य्यएव। एवमेव पार्थसारथिमिश्राः।

भाष्यकारा अपि

यत् शुक्तिकायामपि रजतं मन्यमानो रजतसन्निकृष्टं मे चक्षुरिति मन्यते, बाधकं हि ज्ञानमुत्पद्यते नैतदेवं, मिथ्याज्ञानमिति। तत् अन्यसम्प्रयोगे। विपरीतं तत्सम्प्रयोगे इत्याहुः।

विषयेन्द्रियसन्निकर्षश्च संयोगादिः। निरुक्तप्रत्यक्षप्रमायाः करणं प्रत्यक्षप्रमाणम्। तच्चेन्द्रियमेव। तच्च द्विविधं बाह्यमान्तरञ्च। तत्र बाह्यं पञ्चविधं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



घ्राणरसनाचक्षुस्त्वक्श्रोत्रात्मकम्। आन्तरमेकं मनः। बाह्यपञ्चकेषु आद्यानि चत्वारि पृथिव्यप्तेजोवायुप्रकृतीनीत्याक्षपाददर्शनवदेतैरप्यभ्युपगम्यते। श्रोत्रन्त्वाकाशात्मकमिति तेषामभ्युपगमः। एतन्मते तु दिशः श्रोत्रमितिश्रुतेः कर्णशष्कुल्यवच्छिन्नदिग्भागात्मकमेव। मनस्तु पृथिव्यादीनामेवान्यतमात्मकं तेभ्योऽन्यद्वा सर्व्वथा तावन्मनोऽस्त्येव। तच्चात्मप्रत्यक्षे आत्मगुणप्रत्यक्षे च स्वतन्त्रं प्रवर्त्तते। न बाह्येषु रूपारूपादिषु स्वातन्त्र्यमस्य। अतएवान्तरमुच्यते। रूपादिविज्ञानेपि चक्षुरादिसहायभावेन तत् प्रवर्त्तते। अन्यमनस्कस्येन्द्रियसन्निकृष्टेष्वपि रूपादिविज्ञानानुत्पत्तेः। एवमनुमानादावपि लिङ्गादिसहायभावेन स्मृतावपि संस्कारपरतन्त्रतया मनसः प्रवृत्तिर्न स्वातन्त्र्यम्। एवञ्च सुखादिप्रत्यक्षे मनोमात्रस्य व्यापारद्वारा असाधारणकारणत्वेन तत्प्रत्यक्षं मानसमित्युच्यते। यत्र च चक्षुरादीनामसाधारणत्वं, तानि चाक्षुष-घ्राणज-रासन-त्वाच-श्रावणान्युच्यन्ते। तत्र रूपप्रत्यक्षं चाक्षुषम् गन्धप्रत्यक्षं घ्राणजं रसप्रत्यक्षं रासनं स्पर्शप्रत्यक्षं त्वाचं शब्दप्रत्यक्षं श्रावणम्। चक्षुर्घ्राणरसनात्वक्श्रवणानामिन्द्रियाणां क्रमेण रूपगन्धरसस्पर्शशब्दानां विषयत्वात्।

एतन्मते प्रत्यक्षादीनि सर्व्वाण्येव ज्ञानानि ज्ञेयज्ञातृज्ञानविषयाणि। तत्रायं नियमः यज्ज्ञानं यद्व्यवहारानुकूलशक्तिमत् तज्ज्ञानस्य स एव विषय इति। एवञ्च यथा घटोऽयमिति प्रत्यक्षस्य घटव्यवहारप्रयोजकत्वात् ज्ञेयविषयकत्वं सर्व्ववादिसिद्धम् तथा तन्नियमबलेन ज्ञातृज्ञेयविषयत्वमपि सिध्यति। तथाहि घटोऽयमिति प्रत्यक्षं घटमहं जानामीत्यनुव्यवसायजननशक्तिमत्तया ज्ञेयस्य घटस्य, ज्ञातुरात्मनो, ज्ञानस्य च तत्प्रत्यक्षस्य, व्यवहारप्रयोजकं भवति। अनुव्यवसाये अहमित्यात्मनः कर्त्तृतया ज्ञातृत्वेन, घटमिति कर्म्मतया ज्ञेयत्वेन, जानामीति क्रियारूपतया ज्ञानत्वेन, व्यवहारदर्शनात्। एवमनुमानादावपि।

अथानुमानं निरूप्यते। तत्र भाष्यम्।

"ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टे बुद्धि"रिति।

ज्ञातसम्बन्धस्य अवगतव्याप्यव्यापकभावरूपसम्बन्धस्य लिङ्गलिङ्गिरूपस्य, एकदेशदर्शनात् व्याप्यभूतैकदेशदर्शनात् लिङ्गदर्शनादिति यावत्। असन्निकृष्टे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



इन्द्रियसन्निकर्षाभाववति एकदेशान्तरे लिङ्गिरूपे या बुद्धिरुत्पद्यते सा बुद्धिरनुमानमनुमितिरित्यर्थः । अत्र केचित् । व्याप्तिज्ञानत्वेन व्याप्तिज्ञानकारणकम् ज्ञानमनुमितिः । व्याप्तिज्ञानानुव्यवसायं प्रति व्याप्तिस्मरणं प्रति च व्याप्तिज्ञानस्य कारणत्वेपि व्याप्तिज्ञानत्वेन कारणत्वाभावान्नातिव्याप्तिः । अनुव्यवसायं प्रति विषयत्वेन स्मृतिं प्रति च स्वसमानविषयकानुभवत्वेन व्याप्तिज्ञानस्य कारणत्वात् । अनुमानप्रमाणन्तु व्याप्तिज्ञानम् । तस्यैव स्वजन्यव्यापारवत्तासम्बन्धेनानुमितिकारणत्वात् । अवान्तरव्यापारस्तु वह्निव्याप्यधूमवानयं पर्व्वत इत्यादि परामर्शो व्याप्तिसंस्कारो वेत्याहुः ।

प्रागुक्तज्ञातसम्बन्धस्येत्यादिभाष्यग्रन्थानुसारिणस्तु । व्याप्यत्वेन ज्ञायमानलिङ्गज्ञानजन्यज्ञानमनुमितिः । अनुमानन्तु लिङ्गज्ञानम् अवान्तरव्यापारो व्याप्तिसंस्कारोद्बोधः । तथाचादौ महानसादिषु धूमे वह्निव्याप्तिर्ज्ञाता । अनन्तरं कदाचित् व्याप्यत्वेन ज्ञातस्य धूमस्य पर्व्वते दर्शनम् । तदनन्तरमेव धूमो वह्निव्याप्य इति प्राक्तनानुभवजन्यसंस्कारोद्बोधस्तदनन्तरमेव पर्व्वतोऽयं वह्निमानित्यनुमितिर्जायते । एवञ्च धूमज्ञानं व्याप्तिसंस्कारोद्बोधद्वारा अनुमितिकारणत्वादनुमानम् । अनुमितेः संस्कारजन्यत्वेपि न स्मृतित्वापत्तिराशङ्कनीया । स्मृतेः संस्कारमात्रासाधारणकारणकत्वाभ्युपगमात् । अत्र तु लिङ्गज्ञानस्यापि कारणत्वेन तथात्वाभावात् । लिङ्गज्ञानञ्च प्रत्यक्षानुमित्याद्यन्यतमं ज्ञानमात्रम् । एवञ्चानागतेविनष्टेपि लिङ्गे लिङ्गिनो नानुमित्यनुपपत्तिः । विनष्टानागतयोरपि ज्ञानसम्भवात् ।

व्याप्तिस्तु स्वव्यापकसाध्यसामानाधिकरण्यम् । तद्व्यापकत्वञ्च तन्निष्ठात्यन्ताभावाप्रतियोगित्वम् ; तथाच साधनत्वेन योऽभिमतस्तदधिकरणे यस्यात्यन्ताभावो नास्ति तथाविधसाध्येन सह एकाधिकरणवृत्तित्वमिति फलितम् । साच व्याप्तिर्व्यभिचारादर्शने सति सहचारदर्शनान्निश्चीयते । तथाचोक्तम्—

साहित्ये मितदेशत्वात् प्रसिद्धे वह्निधूमयोः ।
व्यतिरेकस्य चादृष्टे गमकत्वं प्रकल्पितस्मिति ॥
धूमस्तु दृष्टिमात्रेण गमकः सहचारिण इति च ।

तच्च सहचारदर्शनं भूयोदर्शनं येन सर्व्वत्र व्याप्त्यनुमानं स्यात् । अतएवोक्तं शास्त्रदीपिकायाम् ।



For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ततश्चानुमितसता न सर्वेषां धूमवतामग्निसत्तावगन्तव्या। नापि सर्वत्राग्नौ धूमस्याभावः। भूयोऽग्निसाहित्य' व्यभिचारादर्शनमित्येतावदेवानुमानार्थिभिरभ्यर्थनीयम् नाधिकं किञ्चिदिति ।

व्यभिचारास्फूर्त्तौ सकृद्दर्शनेनापि व्याप्तिग्रहः। यथा इदं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ। व्यभिचारशङ्कायान्तु भूयोदर्शनादेव। यथा वह्निमान् धूमादित्यादौ ।

स्वव्यापकसाध्यसामानाधिकरण्यमेवान्वयव्याप्तिरुच्यते। एतस्या अन्वयव्याप्तेरेव सर्व्वत्रानुमितिरुत्पद्यते। यथा वह्निमान् धूमादिति। अत्र साधनत्वाभिमतो धूमस्तदधिकरणे वह्नेरत्यन्ताभावाभावात् वह्नेर्धूमव्यापकत्वं धूमस्य च तत्सामानाधिकरण्याद्व्याप्यत्वमिति व्याप्यत्वेन ज्ञातस्य धूमरूपलिङ्गस्य ज्ञानाद्वह्निरनुमीयते। एवमिदं द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ द्रष्टव्यम् ।

अन्यैस्तु व्यतिरेकव्याप्त्यापि अनुमितिरिष्यते। साच साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। यथा वह्निमान् धूमादित्यत्र साध्योवह्निस्तदभावव्यापको धूमाभावस्तत्प्रतियोगित्वं धूमस्येति व्यतिरेकेणापि व्याप्यत्वं गृह्यते। धूमाभावस्य वह्न्यभावव्यापकत्वन्तु वह्न्यभावाधिकरणे धूमाभावस्यात्यन्ताभावाभावात्। अभावात्यन्ताभावस्य प्रतियोगिरूपत्वात्। मीमांसकैस्तु व्यतिरेकव्याप्तिर्नाद्रियते। तथाचोक्तं पार्थसारथिमिश्रैः।

सम्यगुक्ते साधर्म्ये न वैधर्म्यं वक्तव्यं गतार्थत्वादिति ।

नन्वेवं पृथिवी जलादिचतुष्काद्भिद्यते गन्धवत्त्वादित्यनुमानानुपपत्तिः। नहि पृथिव्यां जलादिचतुष्कप्रतियोगिकभेदस्य गन्धवत्त्वस्य च सामानाधिकरण्यरूपान्वयव्याप्तिज्ञानमादौ सम्भवति। सम्भवतितु जलादिभेदाभाववति जलादिरूपे गन्धवत्त्वाभावज्ञानानन्तरमिति व्यतिरेकव्याप्तेरवश्यादरणीयत्वमितिचेन्न। एतन्मते अर्थापत्तिप्रमाणादेव पृथिव्यां जलादिभेदज्ञानं, नानुमानादित्यङ्गीकारात्। अतएवानुव्यवसायः पृथिव्यां जलादिभेदं कल्पयामीति नत्वनुमिनोमीति।

यस्तु स्वप्रतिपन्नमर्थं परमनुमानेन प्रतिपादयितुमिच्छति तेन साधनं प्रयोक्तव्यम्। येन वाक्येन परस्यानुमितिरुत्पद्यते तत् साधनमुच्यते। तच्च साधनं केचित्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पञ्चावयवं, केचित् त्र्यवयवं, मीमांसकास्तु त्र्यवयवमाहुः । तदुक्तम् शास्त्र-दीपिकायाम् ।

तत्र पञ्चतयं केचित् द्वयमन्ये वयं त्रयम् ।
उदाहरणपर्यन्तं यद्वोदाहरणादिकम् ॥

नैयायिकास्तावत् प्रतिज्ञाहेतूदाहरणोपनयननिगमनैः पञ्चावयवं साधनं मन्यन्ते । यथा अनित्यः शब्द इति प्रतिज्ञा । कृतकत्वादिति हेतुः । यत् कृतकं तदनित्यं यथा घटादीत्युदाहरणम् । कृतकश्च शब्द इत्युपनयः । तस्मादनित्य इति निगमनम् । अयञ्चातिविस्तरो गतार्थश्चेति मन्वानाः सौगता उदाहरणोपनयनात्मकं द्व्यवयवमङ्गी कुर्व्वन्ति । यतो यत् कृतकं तदनित्यं यथा घटादीत्युदाहरणेन कृतकत्वस्या-नित्यत्वव्याप्यत्वं स्मारयित्वा कृतकश्च शब्द इत्युपनयमात्रे कृते पुरुषान्तरेण शब्दस्यानित्यत्वमवगम्यत एव अलमवयवान्तरैरिति ।

एवमप्यत्यन्तसाकाङ्क्षमेव वाक्यम् क्लेशगम्यार्थं भवतीति त्र्यवयवमेव युक्तम् । अनित्यः शब्दः कृतकत्वात् यत् कृतकं तदनित्यं यथा घटादीत्युदाहरणान्तं साधनं सर्व्वत्र वार्त्तिककारः प्रयुङ्क्ते । अथवा यत् कृतकं तदनित्यं यथा घटादि । कृतकश्च शब्दः । तस्मादनित्य इत्युदाहरणादि प्रयोक्तव्यम् । तथाच यत् कर्म्म तत् फलवत् । होमोपि कर्म्म तेनापि फलवता भवितव्यमित्येवं सर्व्वत्र भाष्यकारः प्रयुङ्क्ते ।

प्रतिज्ञादोषाः प्रत्यक्षविरोधादयो अप्रसिद्धविशेषणत्वादयश्च वार्त्तिके प्रपञ्चिताः । अप्रसिद्धिरनैकान्तिकत्वं वाधकत्वञ्चेति त्रयो हेतुदोषाः शास्त्रदीपिकायां प्रपञ्चिता द्रष्टव्याः ।

अस्याश्चानुमिते र्मेयवत्त्वाद्यंश एवानुमितिरूपता पर्व्वतांशे मात्रंशे स्वांशेच प्रत्यक्षरूपतैव, तत्रत्वानुमितिसामग्र्यभावात् । ज्ञानमात्रस्य मितिमातृमेय-विषयकत्वाभ्युपगमाच्च । अन्यदनुसन्धेयम् ।

अर्थापत्तिमानम् ।

अत्र भाष्यम् ।

उपमानमपि सादृश्यमसन्निकृष्टे अर्थे बुद्धिमुत्पादयतीति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एकत्र सादृश्यज्ञानादपरत्रासन्निकृष्टे सादृश्यज्ञानमुपमितिरिति फलितम्। तत्र प्रथमसादृश्यज्ञानं करणं द्वितीयसादृश्यज्ञानं फलमित्यतः प्रथमसादृश्यज्ञानमेव व्यापारवत्कारणत्वेन उपमानाख्यप्रमाणम्। व्यापारस्तु सदृशवस्तुनः स्मरणम्। तथाहि नगरे गां दृष्टवतः पुरुषस्य विपिने गवयसन्दर्शनात् गवये गोसादृश्यज्ञानमुत्पद्यते। अनन्तरञ्च गोः स्मरणम्। तदनन्तरञ्च यासावस्माभि र्नगरे दृष्टा गौः सा अनेन गवयेन सदृशीति गोगतगवयसादृश्यज्ञानं जायते। सादृश्यञ्चातिरिक्तः पदार्थ इति केचित्। पार्थसारथिमिश्रास्तु अर्थान्तरयोगिभिः सम्बन्धसामान्यैरर्थान्तरस्य तादृशयोगः सादृश्यम्। यथा गोजातियोगिभिः कर्णाद्यवयवसामान्यैर्गवयजातेर्योगो गवयस्य सादृश्यम्। गवययोगिभिश्च गोर्योगस्तत्सादृश्यम्। अतएव च सामान्यभूयस्त्वाल्पत्ववशेन सादृश्यप्रकर्षाप्रकर्षौ। ये तु सामान्ययोगातिरिक्तमन्यदेव तत्त्वं सादृश्यं मन्यन्ते तेषां प्रकर्षाप्रकर्षभेदः किन्निमित्त इति चिन्तनीयमित्याहुः। एतच्चोपमानं केचित्तान्त्रिकाः प्रत्यक्षेषु केचिच्चानुमानेष्वन्तर्भावयन्ति तद्विस्तरस्तु वेदान्तपरिभाषाटीकायां प्रदर्शितोऽस्माभिः।

## अथ शब्दप्रमाणम्।

तत्र भाष्यम्।

शाब्दं शब्दविज्ञानादसन्निकृष्टे ऽर्थे विज्ञानमिति।

विज्ञाताच्छब्दादर्थाभिधानद्वारेण यद्वाक्यार्थविज्ञानं सा शाब्दीप्रमितिरित्यर्थः। तत्करणञ्च पदकदम्बात्मकं वाक्यम्। व्यापारस्तु तत्तत्पदार्थज्ञानम्। अतो वाक्यमेव शब्दात्मकं प्रमाणम्। तच्च वाक्यं पौरुषेयापौरुषेयभेदेन द्विविधम्। तत्र पौरुषेयमाप्तवाक्यम्। तेन शाक्यभिक्षुप्रभृतीनां वाक्यानि न प्रमाणानि। अपौरुषेयञ्च वेदवाक्यम्। उभयमप्यनाप्तप्रणीतत्वदोषविरहात् प्रमाणम्। तच्च पुनर्द्विविधं सिद्धार्थं विधायकञ्चेति। पुत्रस्ते जातः ब्राह्मणोऽस्य मुखमासीदित्यादि सिद्धार्थम्। विधायकमपि द्विविधम् उपदेशकमतिदेशकञ्च। इत्थमिदं कर्त्तव्यमित्युपदेशः। यथा लोके दधिघृतसूपशाल्यादिभिर्देवदत्तो भोजयितव्य इति। वेदेपि प्रयाजावघातादिप्रकारेण दर्शपौर्णमाभ्यां स्वर्गं कुर्य्यादिति। तद्वदिदं कर्त्तव्यमित्यतिदेशः। यथा लोके देवदत्तवत् यज्ञदत्तो भोजयितव्य इति।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



वेदेऽपि लौकिकवत् कुर्य्यात् यथार्थेन। एतेषां सर्व्वेषां वाक्यानामार्थावगमे आकाङ्क्षायोग्यतासत्तयस्तात्पर्य्यज्ञानञ्च निमित्तानि। तैर्विना अर्थग्रहासम्भवात्। शास्त्रदीपिकादौ विस्तरोऽनुसन्धेयः।

अथार्थापत्तिः।

अत्र भाष्यम्।

अर्थापत्तिरपि दृष्टः श्रुतो वाऽन्यथानुपपद्यत इत्यर्थकल्पनेति।

दृष्टः श्रुतो वा कश्चित् पदार्थो अन्यथा उपपादककल्पनामन्तरेण नोपपद्यते इत्युपपादककल्पना उपपादकज्ञानमर्थापत्तिरिति तस्यार्थः। तेन उपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिरिति लक्षणम्। तत्रोपपादकज्ञानमर्थापत्तिरूपा प्रमा। उपपाद्यज्ञानन्तु करणतया अर्थापत्तिनामकं प्रमाणम्। तत्रावान्तरव्यापारस्तु संस्कारः। एवञ्च अर्थस्य पदार्थविशेषस्य आपत्तिर्ज्ञानमिति तत्पुरुषसमासेनार्थापत्तिशब्दः प्रमापरः। अर्थस्यापत्तिर्यस्मादिति बहुव्रीहिणा प्रमाणपरोऽपीत्यर्थापत्तिशब्दः प्रमाप्रमाणोभयपरः। प्रत्यक्षशब्दवत्।

यथा अहरहर्दिवा अभुञ्जानं पीनं देवदत्तमवलोक्य रात्रावप्यस्याभोजने दृष्टस्य पीनत्वस्यानुपपत्त्या रात्रिभोजनमस्य कल्प्यते। रात्रिभोजनमन्तरेण पीनत्वमनुपपद्यमानमिति तज्ज्ञानमर्थापत्तिप्रमाणम्। तदुपपादकरात्रिभोजनज्ञानमर्थापत्तिनाम्नी प्रमा। एवं जीवी देवदत्तो गृहे नास्तीति शृण्वन् गृहादन्यत्राप्यस्यासद्भावे श्रुतस्य जीवित्वस्यानुपपत्त्या बहिःसत्त्वमस्य कल्पयति। अत्रापि अनुपपद्यमानजीवित्वज्ञानं प्रमाणम्। तदुपपादकबहिःसत्त्वज्ञानं प्रमा। पूर्व्वत्र दृष्टार्थापत्तिरुत्तरत्र श्रुतार्थापत्तिः।

श्रुतार्थापत्तिश्च द्विविधा अभिधानानुपपत्तिरभिहितानुपपत्तिश्च। तत्र प्रथमा यथा। स्वर्गकामपदाध्याहारमन्तरेण विश्वजिता यजेतेत्यस्यान्वयानुपपत्त्या स्वर्गकामपदाध्याहारकल्पना। द्वितीया यथा। स्वर्गकामो यजेतेत्यत्र यागेन स्वर्गं भावयेदिति यागस्य स्वर्गसाधनतायाः क्षणिकत्वेनानुपपत्त्या द्वारीभूतमपूर्व्वं कल्प्यते।

साङ्ख्यवैशेषिकनैयायिकास्तु अर्थापत्तेः प्रमाणान्तरत्वं नाङ्गीकुर्व्वन्ति अनुमानएवान्तर्भावयन्ति च। मीमांसकास्तु तन्मतं नाद्रियन्ते। तथाहि जीवित्वबहिः-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



सत्तयोरव्यभिचारेण सहचारदर्शनाभावाज्जीवित्वस्य वहिःसत्त्वान्वयव्याप्त्यसम्भवात्। जीवित्वस्य सत्ताभावव्याप्यतया तेन लिङ्गेन सत्ताभावस्यैवानुमेयत्वात्। नच जीवित्वज्ञानात् सत्त्वं, गृहासत्त्वज्ञानाच्च वहिःसत्त्वमनुमीयत इति वाच्यम्। गृहासत्त्वस्य च वहिःसत्ताव्याप्यत्वाभावेन गृहासत्त्वलिङ्गेनापि वहिःसत्त्वानुमित्यनुपपत्तेः। ननु मा भूदन्वयव्याप्त्यानुमानं व्यतिरेकव्याप्तिवलेनानुमितिर्भविष्यति। तथाहि गृहासत्त्वाभाववतोवहिःसत्त्वाभावे जीवित्वाभावः स्यादतो गृहासत्त्वाभाववतो जीवित्वलिङ्गेन वहिःसत्त्वानुमितिः सुघटेतिचेन्न एतन्मते व्यतिरेकव्याप्त्यनङ्गीकारात्। ननु जीवद्गतं गृहासत्त्वं वहिःसत्त्वव्याप्यम् अतो जीवन् देवदत्तो वहिरस्ति गृहासत्त्वात् गृहास्थितस्वशरीरवदित्यनुमिति र्निर्दोषेति चेन्न तथाविधविषये अनेनेदमनुमिनोमीत्यनुव्यवसायाभावात्। अनेनेदं कल्पयामीत्यनुव्यवसायस्यैव जायमानत्वादित्यास्तां विस्तरः।

## अथानुपलब्धिः।

अत्र भाष्यम्।

अभावोपि प्रमाणाभावो नास्तीत्यस्यार्थस्यासन्निकृष्टस्येति।

प्रमाणाभावः प्रमाणान्तरजन्यप्रमाभावरूपः। अभावो अनुपलब्धिः। असन्निकृष्टस्य इन्द्रियसन्निकर्षाविषयस्य नास्तीत्यस्य नास्तीतिप्रतीतिसाक्षिकस्य अर्थस्य प्रतियोग्यभावरूपस्य कल्पक इतिशेष इति तस्यार्थः। तथाच ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणमिति फलितम्। अवान्तरव्यापाराभावात् करणमित्यपहाय कारणमित्युक्तम्। प्रमाणमात्रस्य प्रमीयते अनेनेति व्युत्पत्तिसिद्धप्रमाकरणत्वोपपत्तिस्तु अव्यभिचारेण क्रियया सह सम्बन्धित्वं करणत्वमितिकरणलक्षणाश्रयणात्। अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति। ज्ञानकरणाजन्यघटादिभावपदार्थप्रत्यक्षानुभवासाधारणकारणे चक्षुरादावतिव्याप्तिवारणाय अभावानुभवेति। अभावस्मृतिहेतौ संस्कारेऽतिव्याप्तिवारणाय अभावानुभवेत्यत्र ज्ञानपदमपहाय अनुभवेति। अयं विद्याफलकधर्माभाववान् मूर्खत्वादित्याद्यतीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणाय अभावानुभवे अजन्यान्तविशेषणम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अथातीन्द्रियाभावानुभवेऽपि अनुपलब्धेरेव प्रमाणत्वं नानुमानस्येति नातिव्याप्ति-रितिवाच्यम्। अतीन्द्रियस्य धर्माधर्मादेरुपलम्भस्य सत्त्वेऽपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वस्यावश्यवक्तव्यत्वात्। योग्यानुपलब्धिश्च न उपलम्भयोग्यस्य प्रतियोगिनोऽनुपलब्धिः। स्तम्भे पिशाचभेदस्य अनुपलब्धिगम्यत्वा सम्भवात्। पिशाचस्यातीन्द्रियतया लौकिकसन्निकर्षजन्योपलब्धियोग्यत्वाभावात्। नापि योग्ये अधिकरणे प्रतियोग्यनुपलब्धिः। आत्मनि धर्माद्यभावस्यानुपलब्धि-गम्यत्वापत्तेः। अधिकरणस्यात्मन उपलब्धियोग्यत्वात्। किन्तु योग्याचासावनुप-लब्धिश्चेति कर्मधारयः। अनुपलब्धेर्योग्यताच तर्कितप्रतियोगिसत्त्वप्रसञ्जित-प्रतियोगिकत्वम्। यो अभावः प्रमेयः स्यात् तस्य यः प्रतियोगी तस्य सत्त्वेन अधिकरणे तर्कितेन प्रसञ्जितमापादनयोग्यं प्रतियोगि उपलब्धिस्वरूपं यस्य अनुपलम्भस्य तत्त्वं तदनुपलब्धेर्योग्यत्वमित्यर्थः।

तथाहि स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलम्भः स्यादित्यापादन-सम्भवात् तादृशभूतले घटाभावोऽनुपलब्धिगम्यः। स्तम्भे पिशाचभेदोऽप्यनुपलब्धिगम्य एव। स्तम्भे यदि तादात्म्येन पिशाचसत्त्वं स्यात्तदा स्तम्भस्य प्रत्यक्षत्वे अतीन्द्रियस्य पिशाचस्यापि प्रत्यक्षोपलब्धिः स्यादित्यापादनसम्भवात्। आत्मनि धर्माधर्मसत्त्वेऽपि तयोरतीन्द्रियतया निरुक्तोपलम्भापादनासम्भवान्न धर्माधर्मा-द्यभावस्यानुपलब्धिगम्यत्वम्। अधिकरणेन्द्रियसन्निकर्षात् भूतलादेः प्रत्यक्षोपलब्धे-रावश्यकत्वेऽपि तद्गताभावेन सहेन्द्रियसन्निकर्षासम्भवादभावस्यानुपलब्धिगम्यत्वमेव। अतएवोक्तं भाष्यकृता असन्निकृष्टस्येति। विशेषणतासम्बन्धेनाभावेन्द्रियसन्निकर्षस्तु नैयायिकाभिमतोऽस्मिन्नये नादरणीयः।

नन्वनुपलब्धिरुपलम्भाभावः सोऽप्यनुपलब्धिगम्यएवेत्यनवस्थापत्तिरितिचेन्न। प्रतियोगिज्ञानाभावस्य हि चक्षुरादिवत् सत्तामात्रेण प्रतियोग्यभावज्ञानहेतुता न तु ज्ञाततया। येनानवस्था स्यात्।

योग्यानुपलब्धिस्तु योग्यास्मरणमपि। भाष्ये प्रमाणाभावपदं योग्यास्मरणस्या-प्युपलक्षणम्। तेन यो अहनि गृहे प्रातरवस्थितो मध्यन्दिने केनचित् पृच्छ्यते किमस्मिन् गृहे प्रातर्माथुरः कश्चित् पुरुषो दीर्घतमः शुक्लवासा लोहितवर्णः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



समायात इति, स तदानीमेव योग्यस्मरणानुदयात् तत्र प्रातरागमनाभावं विनैवेन्द्रियव्यापारमवधारयन् नेति प्रतिवक्ति। प्रातर्यद्यसावस्मिन् गृहे समायातः स्यात्तदात्रैवावस्थितेन मयावश्यमेव दृष्टः स्यात् दृष्टश्चायं स्मर्त्तव्यश्च स्यादित्यापादन-सम्भवात्। तत् सिद्धं योग्यानुपलब्धेः प्रमाणान्तरत्वम्। एतावन्त्येवैतन्मते प्रमाणानि।

पौराणिकास्तु सम्भवैतिह्ययोरपि प्रमाणान्तरत्वं मन्यन्ते। तथाहि सम्भवो भूयःसहचारदर्शनजन्यज्ञानम्। सच सम्भवति ब्राह्मणे विद्या। सम्भवति खार्य्यां द्रोणाढ़कप्रस्था इत्यादौ प्रमाणम्। ऐतिह्यमपि इह वटे यक्षः प्रतिवसतीति-होचुर्वृद्धा इत्यादिवाक्यम्। तदपि तत्प्रतीतौ प्रमाणमिति।

मीमांसकमते सम्भवस्यानुमानेऽन्तर्भावः। खारीत्वस्य द्रोणाद्यविनाभूतत्वात्। ऐहिह्यस्यापि आप्तप्रवक्तृकत्वनिश्चये शब्देऽन्तर्भावएव। अनाप्तप्रवक्तृकत्वे अनिर्द्दिष्ट-प्रवक्तृकत्वे च अप्रमाणतैव। प्रतिभाख्यमपि प्रमाणान्तरं कैश्चिदिष्यते। श्वस्ते भ्राता आगन्तेत्यादिकम्। तदपि न प्रमाणान्तरमनिश्चायकत्वात्। अतो यत् काश्यपीये धर्म्माधर्म्मस्वर्षीणां प्रतिभागम्यमास्थितं तदयुक्तम्। धर्म्माधर्म्मयो-र्योगजसन्निकर्षादेवावगमात्। लोकप्रसिद्धिरपि प्रत्यक्षाद्यन्तर्गतैवेति न प्रमाणान्तरम्। तस्मात् षड़ेव प्रमाणानि। तथाच रामायणे। राम षड़्युक्तयो लोके याभिः सर्व्वोऽव दृश्यत इति।

शकाब्दे व्योमपञ्चाष्टभूमिते शौरिवासरे।
शुक्ले नवम्यां वैशाखे टीकेयं पूर्णतां गता॥
नवद्वीपासन्नभूमौ श्रीमद्भागीरथीतटे।
ग्रामं पूर्व्वस्थलीं नाम विद्धि वासस्थलीं मम॥

इति श्रीमद्भारतेश्वरीप्रसादलब्धमहामहोपाध्यायोपाधिकश्रीकृष्णनाथ-
शर्म्मविरचिता प्रतिपादिका नामार्थसंग्रह-
टीका समाप्ता।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १२४ | ८ | तु | न तु |
| १२४ | २५ | र्गतया | र्गततया |
| १२४ | २७ | उप | उपा |
| १६२ | १२ | तृतीम | तृतीय |
| १७० | २२ | विद्यन्त | भिद्यन्त |
| १८१ | २४ | स्वार्यं | स्वार्थं |
| १८५ | १७ | अत्यन्त्यायां | अत्यन्तायां |
| १८६ | ११ | त्यन्ता | त्यत्यन्ता |
| १९७ | १० | त्यन्त | त्यत्यन्त |
| १९७ | १४ | विव | भिव |
| २०४ | ७ | माना | मना |
| २१२ | २१ | श्यक्त | श्यक |
| २१६ | ११ | त्त | त |
| २१७ | ७ | साज्या | माज्या |
| २१९ | ६ | धेय | धेयत्व |
| २२१ | १ | विधानेन | विधाने न |
| २४८ | १६ | धानस्ये | धानस्यै |
| २६८ | २२ | नन्व | लघु |
| २८२ | २० | मत | मतान्तर |

---

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यत्तूक्तं कर्त्तुरनभिधाने देवदत्तेन पचतीति तृतीयाप्रसङ्ग इति । तत्र तृतीया हि कर्त्तृप्रतिपत्त्यर्थं तद्गतसङ्ख्याप्रतिपत्त्यर्थं वा । तत्र कर्त्ता तु भावनाक्षेपाल्लभ्यत इति न तत्र तृतीयापेक्षा । तत्सङ्ख्या तु आख्यातेनैव प्रतीयत इति न तत्राप्यपेक्षा । यथाहुः—

सङ्ख्यायां कारके वा धीर्विभक्त्या हि प्रवर्त्तते ।
उभयञ्चात्र तल्लिङ्गं भावना लिङ्विभक्तितः ॥ इति ।

---

कर्म्माद्यर्थेषु विधानात् । एवञ्च कस्यैकत्वादौ स्वादिविभक्तीनामेकवचनादिविधानमित्याकाङ्क्षायामर्थान्तरस्य कर्म्मादेरेव एकत्वादौ एकवचनादीनि प्रयोक्तव्यानि सन्निहितत्वादिति सिद्धान्तितम् । यथोक्तं काशिकायाम्—

"बहुषु बहुवचनं भवति बहुत्वमस्य वाच्यं भवतीति यावत् । कर्म्मादयोऽप्यपरे विभक्तीनामर्था वाच्यास्तदीये बहुत्वे बहुवचनं कर्म्मादिषु बहुषु बहुवचनमित्यर्थः" इति ।

तर्हि तिङ्विभक्तीनामेकवचनादिकं कस्यैकत्वादौ प्रयोक्तव्यानीत्याकाङ्क्षायां लः कर्म्मणीति सूत्रेण तिङामपि कर्म्मत्वादिकं वाच्यमित्यङ्गीकृतम् । तदुक्तं महाभाष्ये—

सुपां कर्म्मादयोऽप्यर्थाः सङ्ख्या चैव तथा तिङामिति ।

व्याख्यातञ्चैतत् तत्रैव—

"सुपां सङ्ख्या चैवार्थः कर्म्मादयश्च । तथा तिङा"मिति ।

एवञ्च सुपामिव तिङामपि अपरार्थस्य कर्म्मादेरेकत्वादौ एकवचनादिकं प्रयोक्तव्यमित्येवंरीत्या प्रयोगसाधनाय लः कर्म्मणीति सूत्रेण तिङां कर्म्मकर्त्त्राद्यर्थकत्वमङ्गीकृतं न तु वस्तुतो वाच्यवाचकभावसम्बन्धबोधनायेति ।

चापत्त्यन्तरं निराकरोति यत्तूक्तमिति । तृतीयायाः प्रयोजनद्वयमुपन्यस्य तदुभयत्राप्यनपेक्षां दर्शयन्ननर्थकत्वं प्रतिपादयति तृतीया हीति । तत्र प्रमाणमाह यथाहुरिति । सङ्ख्यायामिति । सङ्ख्यायामेकत्वादौ कारके कर्त्तृत्वादौ च धीर्बुद्धिर्विभक्त्या तृतीयादिविभक्त्यैव प्रवर्त्तते उत्पद्यते । अत्र यजेतेत्यादौ तु तदुभयमेव भावनाक्षेपात् लिङ्विभक्तितश्च सि ? ( । अतो विभक्तेर्निष्प्रयोजनतया प्रातिपदिकार्थमात्रे प्रथमेति भावः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



साधनत्वादिवाचकद्वितीयाद्यभावे, वस्तुतः शेषशेषिणोः सहोच्चारणम्। यथा यस्य पर्णमयी जुहूर्भवतीति। अत्र हि न द्वितीयादिविभक्तिः श्रूयते। केवलं पर्णता-जुह्वोः समभिव्याहारमात्रम्। तस्मादेव च पर्णताया जुह्वङ्गत्वम्।

न चानर्थक्यं, जुहूशब्देनापूर्वलक्षणात्। तदयं वाक्यार्थः। पर्णतया अवत्तहविर्धारणद्वारा यदपूर्वसाधनं तद्भावयेदिति।

---

इति सामान्यलक्षणमुपेक्षितम्। एतल्लक्षणस्य श्रुत्यादिव्याहतत्वं विवृणोति समभिव्याहारश्चेति। आदिना कर्तृत्वादिग्रहणम्। द्वितीयादेरेव तद्वाचकत्वादाह द्वितीयादीति। एतेन कर्मत्वकरणत्वादिबोधकद्वितीयादिघटितायाः श्रुतेर्व्यावृत्तिः।

ननु द्वितीयादिविरहे कथं शेषशेषिभावबोधकत्वसम्भव इत्यत आह वस्तुत इति। तात्पर्यादित्यर्थः। तथाच ययोः पदयोः सहोच्चारणं तदर्थयोः शेषशेषिभावबोधकत्वं तात्पर्यादेवावसेयमिति भावः। शेषशेषिणोः अङ्गाङ्गिवाचकपदयोः। एतेन लिङ्गादिव्यावृत्तिः। लिङ्गादिविनियोगस्थले शेषशेषिवाचकपदविरहात्।

वाक्यमुदाहरति यथेति। यस्येति। यस्य यजमानस्य जुहूर्दर्शपूर्णमासीयपात्रविशेषः पर्णमयी पलाशवृक्षावयवसम्भूता भवति, न स पापं श्लोकं शृणोतीत्युत्तरप्रतीकेनान्वयः। पलाशे किंशुकः पर्ण इति त्रिकाण्डीस्मरणम्। अत्र श्रुतौ। पर्णता-जुह्वोः पर्णपदजुहूपदयोः। समभिव्याहारमात्रं सहोच्चारणमात्रम्। पर्णतायाः पलाशकाष्ठत्वस्य, जुह्वङ्गत्वं जुहूपकारकत्वम्। अथ जुहूपकारकत्वं यदि जुहूजनकत्वं तर्हि पर्णताभिधानमनर्थकम्। काष्ठान्तरस्यापि तज्जनकत्वसम्भवादित्यत आशङ्कां परिहरति न चेति। आनर्थक्यमिति पर्णताभिधानस्येति शेषः।

निराकरणे हेतुमाह जुहूशब्देनेति। अपूर्वलक्षणादिति। यद्यपि पर्णमयी जुहूर्भवतीति वाक्ये जुहूपदस्य जुहूपूर्वलक्षणायां पर्णमयत्वानुपपत्तिस्तथापि पर्णताजुह्वोः सहोच्चारणबलेन पर्णतया जुहूं कुर्यादिति यद्विधिवाक्यं कल्पनीयं तत्रैव जुहूपदे जुहूपूर्वलक्षणाभिप्रेतेति बोध्यम्। अतएव तद्वाक्यार्थमेव दर्शयति तदयमिति। अवत्तेति। अवत्तं अवदानादवदायोत्पादितं यद्धविस्तद्रूपं तस्य धारणद्वारा यदपूर्वसाधनं साध्यं

For Private And Personal

